CC-O. In Public Domain. Digitized by eGangotri

वैयाकरण

सिद्धान्तकौमुदी-रहस्यम्

(सोत्तरा-प्रश्नावली)

सिद्ध-प्रयोग-सूची सहितम्

(तृतीय खण्डम्)

सम्पादकः

पण्डित श्रीचन्द्रधरशुक्लः

(व्याकरण विभागाध्यक्षः)

राजगोपाल संस्कृत महाविद्यालय, अयोध्या

भारतीय विद्या प्रकाशन

Sri Vidyabharathi Book Centre, Sringeri

वाराणसी दिल्ली

प्रकाशक—
© भारतीय विद्या प्रकाशन
CC-O. In Public Domain. Digitized by eGangotri
पो० बा० नं० ११०८ कचौड़ी गली, वाराणसी–२२१००१
१. यू. बी. जवाहर नगर, बंग्लो रोड, दिल्ली–११०००७

अन्य प्राप्ति स्थान—
भारतीय बुक कारपोरेशन
१. यू० बी० जवाहर नगर, बंग्लोरोड दिल्ली–११०००७

VIDYA PRAKASHAN BHARATIYA
REVISED PRICE

प्रथम संस्करण–अक्टूबर १९८७
द्वितीय ,, 1988
चतुर्थ 1991
दि 1990

निवेदन—

छात्रों की सुविधा के लिए अन्य गाइडों तथा प्रश्नोत्तरियों का भी प्रकाशन किया गया है। प्रत्येक वर्षों की भांति इस बार भी सफलता के लिए भारतीय विद्या प्रकाशन की ही गाइडों का अध्ययन करें।

मुद्रक—
एस के. प्रिन्टर्स
जुरी, वाराणसी।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

दो शब्द

इस बढ़ती हुई महँगी में ग्रन्थों का मूल्य बढ़ जाने से छात्र प्राय: मूल ग्रन्थ ही खरीद लेते हैं। किन्तु फक्किकाओं तथा दुरूह प्रयोगों के लिए टीकाग्रन्थों की आवश्यकता होती है। उसके लिए द्रव्य की कठिनाई देखकर छात्रों कतिपय सहायक ग्रन्थों में फक्किका ग्रन्थ या प्रश्नोत्तरी ले लेते हैं। विद्वान् अध्यापक प्राय: प्रश्नोत्तरी देखते नहीं इसलिए उनका शुद्ध होना भी असम्भव हो गया है। इसलिए हमने सिद्धान्तकौमुदी-रहस्यम् की रचना की। इसमें प्राय: प्रष्टव्य समस्त प्रयोगों और फक्किकाओं का विवेचन किया गया है और सत्र का निर्देश कर दिया गया है। अन्त में दो परिशिष्ट जोड़ दिये गये हैं, जिनमें प्रथम परिशिष्ट में सिद्ध-प्रयोग-सूची है। तथा द्वितीय में प्रश्न पत्र के मूलरूप हैं। ग्रन्थ को पूर्णरूपेण छात्रों को ध्यान में रखकर लिखा गया है। इस प्रकार इसे सब प्रकार से उपयोगी बनाया गया है।

आशा है विज्ञजन इसे देखकर मेरा उत्साह बढ़ावेंगे तथा मुद्रण जन्य अशुद्धियों को सुधार लेंगे। मेरा विश्वास है कि इससे छात्र प्रसन्न होंगे।

वाराणसी

प्रबोधिनी एकादशी — चन्द्रधर शुक्ल

२०४४ बिक्रम

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

प्रकरण-सूची

सिद्ध-प्रयोग-सूची

क्रम सं०		पृष्ठाङ्क
१.	शैषिकप्रकरणम्	१
२.	प्राग्दिव्यतीयप्रकरणम्	३६
३.	प्राग्वहतीयप्रकरणम्	३१
४.	प्राग्घितीयप्रकरणम्	३७
५.	छयद्विधिप्रकरणम्	३९
६.	अर्हीयप्रकरणम्	४२
७.	कालाधिकारप्रकरणम्	४९
८.	ठञ्विधिप्रकरणम्	५३
९.	भावकर्मार्थप्रकरणम्	५३
१०.	पाञ्चमिकप्रकरणम्	५६
११.	मत्वर्थीयप्रकरणम्	६१
१२.	प्राग्दिशीयप्रकरणम्	७०
१३.	प्रागिवीयप्रकरणम्	७३
१४.	स्वार्थिकप्रकरणम्	८०
१५.	द्विरुक्तप्रकरणम्	८६
	तिङन्ते —	
१६.	भ्वादिप्रकरणम्	९२
१७.	अदादिप्रकरणम्	१५२
१८.	जुहोत्यादिप्रकरणम्	१७३
१९.	प्रश्नपत्राणि	१८३

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सिद्धान्तकौमुदीरहस्यम्

तृतीयः खण्डः

नमः श्रीरामभद्राय जानकीमङ्गलाय च ।
श्रीचन्द्रधरशुक्लेन रहस्यं संप्रकाश्यते ॥

अथ शैषिकप्रकरणम्

शेषे—अपत्याधिकारसूत्रात् चतुरर्थ्यन्तादन्योऽर्थः शेषः। चातुरर्थिकप्रकरणान्ते शेषे सूत्रपाठादवगम्यते। तेन इतः परं विहिता ये प्रत्ययाः ते पूर्वोक्तानर्थान् विहाय परत्रोक्तेषु अनुक्तेषु वा अर्थेषु यथायथं अणादयप्रत्ययाः भवन्ति इति सूत्रार्थः। तेन चक्षुषा गृह्यते चाक्षुषं रूपमित्यादौ उत्तरसूत्रेऽनुपात्तेऽपि ग्रहणेऽर्थे अनेन अणादयो भवन्ति।

चाक्षुषम् रूपम्—चक्षुषा गृह्यते इति अर्थे 'शेषे' इत्यनेनाणि अनुबन्धलोपे सुबन्तात् तद्धितोत्पत्तिरिति सिद्धान्तपक्षमनुसृत्य चक्षुष् टा अ इत्यस्य 'कृत्तद्धितसमासाश्चेति' प्रातिपदिकसंज्ञायाम् 'सुपो धातुप्रातिपदिकयोः' इत्यनेन सुपो लुकि एकदेशविकृतन्यायेन सौ अनुबन्धलोपे णित्वात् 'तद्धितेष्वचामादेः' इत्यनेन आदिवृद्धौ नपुंसकत्वे सोरमि 'अमि पूर्वः' इत्यनेन पूर्वरूपे चाक्षुषम् इति सिद्ध्यति।

श्रावणः—(ई० ३२)। श्रवणेन गृह्यते इत्यर्थे 'शेषे' इत्यनेनाणि तद्धितान्तत्वात् प्रातिपदिकत्वेन सुपो लुकि भत्वात् 'यस्येति चे'त्यकारलोपे, आदिवृद्धौ एकदेशविकृतन्यायेन सौ सीः रुत्वे विसर्गे श्रावण इति सिद्धम्।

दार्षदाः—दृषदि पिष्टाः इत्यर्थे 'शेषे' इत्यनेनाणि तद्धितान्तत्वात् प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ एकदेशविकृतन्यायेन जसि दीर्घे सस्य रुत्वे विसर्गे च दार्षदा इति सिद्धम्।

शेषे लक्षणं चाधिकारश्च। ननु चाक्षुषादीनां 'तस्येदमि'त्यनेन दार्षदादीनां 'संस्कृतं भक्षाः' इत्यनेनाणि सिद्धे नेदं विधिसूत्रम्। उत्कयादौ आर्द्रवृक्ष-काश-शाल-प्रभृतिशब्दपाठेन प्राग्दीनेष्वर्थेषु घादयो न प्रवर्तन्ते इति ज्ञापनेन निवृत्त्यर्थत्वलाभात्। 'अन्यथा वृद्धाच्छः' इत्यनेनैव सिद्धे तद्वैयर्थ्यं स्पष्टमेव। एवं जाताधि-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri
काराद् प्राक् पाठसामर्थ्येन साकल्यप्रयोजनलाभाच्च नेदमधिकारसूत्रम्। अन्यथा जाताधिकारानन्तरं 'प्रावृषष्ठप्' इत्यादिभिः सह राष्ट्रावारेत्यादीनामपि पाठे सन्निहिते जातार्थे घादयः स्युः तदुत्तरेषु भवाद्यर्थेषु 'प्राग्दीव्यतोऽण्' इत्यणादयः स्युः इत्यर्थे पूर्वपाठो व्यर्थः स्याद्, ज्ञापकस्य सजातीयत्वे दोषतादवस्थ्यात्। चार्त्रंपुक्तादिभ्यो यदि छस्तर्हि चतुरर्थ्यामेव इति नियमसम्भवाच्च। एवं अधिकारार्थत्वे स्थिते चाक्षुषमित्यत्रो गृह्यमाणत्वादिप्रकारकबोधाय विधायकत्वमपि सुवचमिति दिक्।

राष्ट्रियः (३० ५०, ५३) राष्ट्रे जातः भवो वा इत्याद्यर्थे 'राष्ट्रावारपाराद्घखौ' इत्यनेन घप्रत्यये तद्धितान्तत्वात् प्रातिपदिकत्वे सुपो लुकि घस्य 'आयनेयीनीयियः फढे'त्यादिना इयादेशे भत्वेन 'यस्येति चे'ति अकारस्य लोपे एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे सिद्धम्।

अवारपारीणः—अवारपारे भवः जातो वा इत्याद्यर्थे 'राष्ट्रावारपाराद्घखौ' इत्यनेन ख प्रत्यये 'आयनीयीनीयियः फढखे'त्यादिना ईनादेशे भसंज्ञायां 'यस्येति च' इति अकारलोपे सौ रुत्वे विसर्गे अवारपारीणः इति सिद्धम्।

पारीण (३६) पारे जात इत्याद्यर्थेषु 'अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यम्' इत्यनेन वार्तिकेन खप्रत्यये प्रातिपदिकत्वे सुपो लुकि खस्य 'आयनेयीनीयियः फढे'त्यादिना खस्य ईनादेशे 'यस्येति चे'त्यकारलोपे नस्य णत्वे एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे सिद्धिः।

ग्रामीणः—ग्रामे जात इत्यर्थे 'ग्रामाद् यखञौ' इत्यनेन पक्षे खञि तद्धितान्तत्वात् प्रातिपदिकत्वेन सुपो लुकि खस्य ईनादेशे 'यस्येति चे'त्यकारलोपे नस्य णत्वे एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे ग्रामीणः। पक्षे यत् ग्राम्यः इति।

कौक्षेयकः (५०) कुक्षौ (कोशे) भवः इत्यर्थे 'कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु' इत्यनेन अस्यर्थे ढकञ् प्रत्यये तद्धितान्तत्वात् प्रातिपदिकत्वेन सुपो लुकि ढस्य एयादेशे 'यस्येति चे'त्यकारलोपे ञित्वादादिवृद्धौ एकदेशविकृतन्यायेन सौ रुत्वं विसर्गे कौक्षेयकः' (असिः) इति सिद्धम्।

वाराणसेयम्। वरं च तत् अनः वरानः वरानसः अदूरभवा नगरी वाराणसी तत्र भवम् इत्यर्थे 'नद्यादिभ्यो ढक्' इति ढकि प्रातिपदिकत्वेन सुपो लुकि ढस्य एयादेशे 'यस्येति चे'तीकारस्य लोपे एकदेशविकृन्यायेन विभक्तिकार्ये सिद्धम्।
Sri Vidyabharathi Book Centre, Sringeri
पाश्चात्यः (७८) पश्चाद् भव इत्यर्थ 'दक्षिणापश्चात् पुरसस्त्यक्' इति

 -O. In Public Domain. Digitized by eGangotri

सूत्रेण त्यक्प्रत्यये प्रातिपदिकत्वे सुपो लुकि किति च इति आदिवृद्धौ विभक्तिकार्ये पाश्चात्यः इति सिद्धम् ।

राङ्कवायणः । रङ्कुर्नाम देशः, रङ्कौ जात इत्यर्थे 'रङ्कोरमनुष्येऽण् च' इत्यनेन अणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ 'ओर्गुणः' इति गुणे अवादेशे एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे राङ्कवः इति, पक्षे अनेन चकारात् ष्फकि फस्यायनादेशे आदिवृद्धौ ओर्गुणे अवादेशे विभक्तिकार्ये राङ्कवायणः इति । मनुष्ये तु 'मनुष्यतत्स्थयोः' इति वुञि राङ्कवकः इति सिद्ध्यति ।

कान्थकम् (६७) वर्णुर्नदस्तस्य समीपदेशो वर्णुस्तद्विषयार्थवाचिकन्था-शब्दात् 'वर्णौ वुक्' इत्यनेन वुकि तद्धितान्तत्वात् प्रातिपदिकत्वेन सुपो लुकि वोरकि आदिवृद्धौ 'यस्येति चे'त्याकारलोपे एकदेशविकृतन्यायेन सौ तस्यामि पूर्व-रूपे कान्थकम् इति । वर्णुदेशवाचकात् कन्थाशब्दात् तु 'कन्थायाष्ठक्' इति ठकि कान्थिकः इति सिद्ध्यति ।

अमात्यः (६६) अमा(सह) भवः इत्यर्थे 'अमेहक्वतसित्रेभ्य एव' इति परि-गणनवार्तिकसहकारेण 'अव्ययात्त्यप्' इति त्यपि प्रातिपदिकत्वेन सौ रुत्वे विसर्गे अमात्यः इति सिद्धम् ।

औपरिष्टः (७०) न च अव्ययात्त्यप अमेहक्व तसित्रेति सूत्रे परिगणनं किमर्थमिति वाच्यम्, परिगणनाभावे सर्वत्राव्ययेऽस्य प्रवृत्त्या उपरिष्टाद् भव इत्यर्थे अणि प्रातिपदिकत्वम् भत्वम् ततः 'अव्ययानां भमात्रे टिलोपः' इति वार्तिकेन टिलोपे आदिवृद्धौ विभक्तिकार्ये 'औपरिष्टः' इत्यस्य सिद्धेः । अन्यथा अत्रापि त्यप स्यात् । अतः परिगणनं कर्तव्यम् इति दिक् ।

अव्ययानां भमात्रे टिलोपः । अव्ययसंज्ञकानां भमात्रे टिलोपो भवति न तत्र 'नस्तद्धिते' इत्यादाविव निमित्तस्यापेक्षेत्यर्थः । तेन उपरिष्टाद् भव इत्यर्थे अणि भत्वात् अनेन टिलोपे विभक्तिकार्ये औपरिष्टः इति सिद्ध्यति । न चैवं आरात् भवः इत्यर्थे 'वृद्धाच्छः' इति छे तस्य इयादेशे अनेन टिलोपे आरीयः इति अनिष्टं रूपं स्यादिति वाच्यम्, बहिर्भव इत्यर्थे 'बहिषष्टिलोपो यञ्च' इति वार्ति-केन यञि टिलोपे च कृते आदिवृद्धौ विभक्तिकार्ये बाह्यः इति सिद्ध्यति ।

अत्र बहिषः अव्ययत्वादेवानेन टिलोपे सिद्धे पुनः टिलोपार्थं वार्तिकमनित्य मिति कल्पनात् । ततः क्वचित् टिलोपो न भवति तेन आरातीयः इत्यत्र टिलोपो नेति दिक् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

निष्ट्यः (५५) निर्गतः वर्णाश्रमेभ्यः इत्यर्थे 'निस्' इत्यस्मात् 'निसो गते' इति वार्तिकसहकारेण गतेऽर्थे 'अव्यायात्त्यप्' इति त्यपि प्रातिपदिकत्वेन 'ह्रस्वात्तादौ तद्धिते' इत्यनेन सस्य षत्वे ष्टुत्वे विभक्तिकार्ये निष्ट्यः इति सिद्ध्यति। चण्डाल इत्यर्थः।

श्वस्त्यम् श्वस्तनम्, शौवस्तिकम् (७९) श्वस् इति अव्ययमनागतेऽह्नि वर्तते। श्वः भव इत्यर्थे 'एषमोह्यःश्वसोऽन्यतरस्याम्' इत्यनेन विकल्पेन त्यपि प्रातिपदिकत्वे विभक्तिकार्ये श्वस्त्यम्। पक्षे सायं चिरमित्यादिना ट्युप्रत्यये तुटि च कृते अनुबन्धलोपे 'यु' इत्यस्य अनादेशे विभक्तिकार्ये 'श्वस्तनम्' इति। पक्षे 'श्वसस्तुट् च' इति तुटि ठकि च कृते प्रातिपदिकत्वे 'ठस्येकः' इति ठस्य इकादेशे 'द्वारादीनां च' इति ऐजागमे शौवस्तिक इत्यस्मात् सौ तस्यामि पूर्वरूपे शौवस्तिकमिति च सिद्धम्।

काकतीरम् (५३) काकतीरे भवमित्यर्थे, तीररूप्योत्तरपदादञ् इत्यनेन अञि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ एकदेशविकृतन्यायेन विभक्तिकार्ये काकतीरम् इति सिद्धम्।

तीररूपान्तादिति नोक्तम् (६५) ननु 'तीररूपान्तादञ्' इति न्यासेनैव सिद्धे सूत्रे उत्तरपदग्रहणम् व्यर्थमिति चेन्न, बहुच्प्रत्ययपूर्वस्य रूपशब्दस्य ञ्यप्रत्यये बाहुरूप्यम् इति क्रियकारकं रूपं स्यात्, कृते चोत्तरपदग्रहणे बहुचः पदत्वाभावात् ञ्यः न भवति इति दिक्।

पौर्वशालः (८०) पूर्वस्यां शालायां भव इत्यर्थे 'तद्धितार्थोत्तरपदे समाहारे च' इत्यनेन समासे 'दिक्पूर्वपदादसंज्ञायां ञः' इति ञप्रत्यये प्रातिपदिकत्वे सुपो लुकि आदि 'वृद्धौ सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' इति पूर्वशब्दस्य पुंस्त्वे यस्येतिचेत्याकारलोपे सौ रुत्वे विसर्गे पौर्वशालः इति सिद्धम्।

असंज्ञायां पूर्वेषुकामशमः (६१) ननु 'दिक्पूर्वपदादसंज्ञायां ञः' इति सूत्रे असंज्ञायामिति व्यर्थमिति चेन्न, सूत्रे पञ्चम्यर्थे सप्तमी। तेन असंज्ञाभूतात् दिक्पूर्वपदात् ञो भवतीत्यर्थः। तथाच पूर्वेषुकामशम्यां भव इत्यर्थे अण् एव भवति न ञः। अत्र पूर्वेषुकामशमी-शब्दः संज्ञावाचकः। ततः प्राचां ग्रामनगराणाम् इत्यनेनोत्तरपदवृद्धौ आदिवृद्धौ च विभक्तिकार्ये पूर्वेषुकामशमः इति सिद्ध्यति।

पौर्वमद्रः (४४) पूर्वेषु मद्रेषु भव इत्यर्थे तद्धितार्थोत्तरपदे-इति समासे 'मद्रेभ्योऽञ्' इति अञि प्रातिपदिकत्वेन सुपो लुकि 'दिशोमद्राणाम्' इत्यस्य

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

मद्रपर्युदासात् अप्रवृत्त्या आदिवृद्धौ भत्वे 'यस्येति च' इत्यल्लोपे एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे पौर्वमद्रः इति ।

शैवपुरम् (६४) उत्तरदेशे शिवपुरे भवम् इत्यर्थे 'उदोच्यग्रामाच्च बह्वचोऽन्तोदात्तात्' इत्यनेन अणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ भत्वे 'यस्येति च' इत्यकारलोपे एकदेशविकृतन्यायेन सौ तस्यामि पूर्वरूपे शैवपुरमिति सिद्धम् । अत्र शिवस्य पुरमिति विग्रहे षष्ठीसमासे जाते समासस्य इत्यनेनान्तोदात्तता शिवपुरशब्दस्य बोध्या । शिवपुरम् नाम ग्रामविशेषः ।

माहिकिप्रस्थः (५३) महिकिप्रस्थनाम्नि ग्रामे भव इत्यर्थे 'प्रस्थोत्तरपदपलद्यादिकोपधादण्' इत्यणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ भत्वे 'यस्येति च' इत्यकारलोपे एकदेशविकृतन्यायेन सौ तस्य रुत्वे विसर्गे माहिकिप्रस्थ इति सिद्धम् ।

काण्वाः । कण्वस्य गोत्रापत्यमित्यर्थे 'गर्गादिभ्यो यञ्' इति यञि तद्धितोत्तरकार्ये काण्व्यः इति । काण्व्यस्य छात्राः इत्यर्थे 'कण्वादिभ्यो गोत्रे' इत्यनेन अणि प्रातिपदिकत्वेन सुपो लुकि भत्वे यस्येतिचेत्याकारलोपे आदिवृद्धौ 'आपत्यस्य च तद्धितेऽनाति' इति यकारलोपे एकदेशविकृतन्यायेन जसि दीर्घे सस्य रुत्वे विसर्गे काण्वाः इति सिद्धम् ।

दाक्षाः (३४) दक्षस्य गोत्रापत्यमित्यर्थे 'अत इञ्' इत्यनेन इञि तद्धितोत्तरकार्ये दाक्षिः इति । ततः दाक्षेः छात्राः इत्यर्थे 'इञश्च' इत्यनेन इञन्तादणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ भत्वे 'यस्येति च' इतीकारलोपे एकदेशविकृतन्यायेन बहुवचने जसि दीर्घे सस्य रुत्वे विसर्गे दाक्षाः इति सिद्धम् ।

गोत्र किं-सौतङ्गमीयम् । ननु 'इञश्च' इत्यत्र गोत्रपदानुवृत्तिः पूर्वसूत्रे गोत्रग्रहणं च किमर्थमिति चेत् श्रूयताम् । यद्यपि अपत्याधिकारादन्यत्र लौकिकमेव गोत्रं गृह्यते न शास्त्रीयम् तथापि 'यूनि लुक्' इति सूत्रोक्तभाष्यमनुसृत्यात्र सूत्रद्वयेऽपि शास्त्रीयमेव गोत्रं गृह्यते, तेन सुतङ्गमस्य निवासः इत्यर्थे 'सुतङ्गमादिभ्य इञ्' इति इञि ततो निष्पन्नात् सौतङ्गमिशब्दात् सौतङ्गमेरिदमित्यर्थे 'वृद्धाच्छः' इत्यनेन छः भवति, न तु इञन्तत्वादण्; इञः गोत्रार्थकत्वाभावात् । ततः छस्य ईयादेशे प्रातिपदिककार्ये सौतङ्गमीयमिति सिद्ध्यति ।

पाणिनीयम् (७४) पणिनः गोत्रापत्यं पाणिनः पाणिनेरिदं पाणिनीयम् तत्यत्र छो भवति न त्वण् । अत्र ... युवप्रत्ययान्तत्वात् इति गोत्रग्रहणं नुदद्वृत्तिश्च कृता इति दिक् ।

Sri Vidyadhirathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

न द्व्यचः प्राच्यभरतेषु (३९) प्राच्येषु भरतेषु च गोत्रेषु वर्तमानाविञन्ताद् द्व्यचः अण् न भवति इत्यर्थः । न च भरतानामपि प्राच्यत्वात् प्राच्यग्रहणेनैव भरतानामपि ग्रहणे सिद्धे भरतग्रहणं व्यर्थमिति चेन्न, भरतग्रहणं ज्ञापकं भवति यत् 'अन्यत्र प्राच्यग्रहणमि'ति । तेन 'इञः प्राचाम्' इत्यनेन भरतेभ्यो विहितस्य लुक् न भवति । ततश्च औद्दालकिः पिता औद्दालकायनः पुत्रः इत्यत्र युवप्रत्ययस्य लुक् न । इदं अर्हादिगोपुच्छेत्यत्र कैयटेन उक्तमिति दिक् ।

शालीयः (५०) शालायां जातः इत्यर्थे 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' इत्यनेन शालाशब्दस्य वृद्धत्वात् 'वृद्धाच्छः' इत्यनेन छे प्रातिपदिकत्वात् सुपो लुकि छस्येयादेशे भत्वे 'यस्येति च' इत्याकारलोपे एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे शालीयः इति सिद्धम् ।

तदीयः । तस्मिन् भवः इत्यर्थे त्यदादीनि चेत्यनेन वृद्धसंज्ञायाम् 'वृद्धाच्छः' इत्यनेन छे प्रातिपदिकत्वात् सुपो लुकि छस्येयादेशे भत्वे एकदेशविकृतयान्येन सौ रुत्वे विसर्गे तदीयः इति सिद्धम् ।

एणीपचनीयः (४५) एणीपचने भव इत्यर्थे 'एङ् प्राचां देशे' इति वृद्धत्वे 'वृद्धाच्छः' इति छे प्रातिपदिकत्वेन सुपो लुकि छस्येयादेशे भत्वादल्लोपे एकदेश-विकृतन्यायेन सौ रुत्वे विसर्गे एणीपचनीयः इति साधुः ।

देवदत्तीयः (६३) देवदत्ते भव इत्यर्थे 'वा नामधेयस्य वृद्धसंज्ञा वक्तव्या' इत्यनेन नामवाचकस्य विकल्पेन 'वृद्धाच्छः' इत्यनेन छे प्रातिपदिकत्वात् सुपो लुकि ईयादेशे भत्वादल्लोपे एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे सिद्धम् । पक्षे 'तत्र भव' इत्य-नेनाणि आदिवृद्धौ प्रातिपदिककार्ये दैवदत्तः इति सिद्धयति ।

भावत्कः, भवदीयः (५०, ५८) भवतः इदमित्यर्थे 'त्यदादीनि च' इत्यनन वृद्धत्वे 'भवतष्ठक्छसौ' इति ठकि छसि वा कृते प्रातिपदिकत्वेन सुपो लुकि ठकः, 'इसुसुक्तान्तात् कः' इति कादेशे छस्य ईयादेशे ठकि परे कित्वादादिवृद्धौ भत्वे-एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे भावत्कः । सिति च इति पदत्वेन जश्त्वे विभक्तिकार्ये भवदीय इति सिद्धम् ।

काशिका (७१) काश्यां भवा इत्यर्थे 'काश्यादिभ्यष्ठञ्ञिठौ' इत्यनेन पक्षे ञिठि कृते प्रातिपदिकत्वेन सुपो लुकि 'ठस्येकः' इति इकादेशे भत्वे 'यस्येति च' इतीकारलोपे आदिवृद्धौ स्त्रीत्वविवक्षायां टापि ततः सौ हल्ङ्यादिलोपे

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

काशिका। पक्षे ठञि सुपो लुकि इकादेशे भत्वे इलोपे आदि वृद्धौ स्त्रीत्वविवक्षायां 'टिड्ढाणञ्' इति ङीपि ततः सौ 'हलङ्यादिलोपे' काशिकी इति सिद्धम्। अत्र ञिठ इकारः उच्चारणार्थः। उभयत्र ञकारस्यैवानुबन्धे स्वरे विशेषाभावेऽपि स्त्रीप्रत्यये ङीप्टापोः विशेषार्थमेव ञकारस्य व्यत्ययेन पाठ इति बोध्यम्।

कास्तीरकी (७३) कास्तीरं नाम ग्रामः वाहीकेषु प्रसिद्धः। कास्तीरे भव इत्यर्थे वृद्धसंज्ञायाम् 'वृद्धाच्छः' इति छं प्रबाध्य 'वाहीकग्रामेभ्यश्च' इति ठञि प्रातिपदिकत्वेन सुपो लोपे आदिवृद्धौ ठस्येकादेशे भत्वे अलोपे टिड्ढेति ङीपि ततः सौ हलङ्यादिलोपे कास्तीरिकी। पक्षे ञिठि ङीपोऽप्राप्तौ टापि कास्तीरिका इति सिद्धयति।

सौदर्शनिकी (६५) सौदर्शनं नाम ग्राम उशीनरेषु प्रसिद्धः। सौदर्शने भव इत्यर्थे 'विभाषोशीनरेषु' इति पक्षे ठञि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ ठस्येकादेशे भत्वे अलोपे टिड्ढेति ङीपि ततः सौ हलङ्यादिलोपे सौदर्शनिकी इति। पक्षे ञिठि ङीपोऽप्राप्तौ टापि सौदर्शनिका इति। पक्षे 'वृद्धाच्छः' इति छे तस्येयादेशे टापि सौदर्शनीया इति सिद्धयति।

ओर्देशे ठञ्। (६०) उवर्णान्ताद् देशवाचिनः ठञ् भवतीति सूत्रार्थः। नच 'काश्यादिभ्यष्ठञ्ञिठौ' इत्यतः ठञोऽनुवृत्तेः पुनः ठञ् ग्रहणं व्यर्थमिति वाच्यम्, 'एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सहवा निवृत्तिः' इति नियमेन ञिठोनुवृत्तिवारणाय ठञ् ग्रहणम्। तेन निषादकर्षूग्रामवाचकाद् ठञि उगन्ताद् परत्वाद् ठस्य कादेशे 'केणः' इति ह्रस्वत्वे आदिवृद्धौ प्रातिपदिककार्ये नैषादकर्षुकः इत्येव रूपं भवति। स्त्रीत्वे च केवलं ङीपि रूपं सिद्धति। एवं दाक्षिकर्षूः इत्यत्र वृद्धाच्छं प्रबाध्य परत्वादनेन ठगेव भवति नतु छः। तेन दाक्षिकर्षुकः इत्येव सिद्धयति।

वृद्धात्प्राचाम् (४१) उवर्णान्तात् प्राग्देशवाचिनो वृद्धादेव ठञ् भवतीति सूत्रार्थः। ननु शाकजम्बूर्नाम ग्रामः प्राग्देशे प्रसिद्धः। ततः तत्र भव इत्यर्थे 'ओर्देशे ठञ्' इत्यनेनैव ठञि सिद्धे इदं सूत्रं व्यर्थमिति चेत्, प्राग्देशवाचिनः यदि ठञ् तर्हि वृद्धादेव इति नियमार्थत्वात्। तेन मल्लवास्तुनामकात् प्राग्देशीयग्रामवाचकात् नानेन ठञ्, किन्तु अणेव ओर्गुणे आदिवृद्धौ प्रातिपदिककार्ये माल्लवास्तवः इति सिद्धयति। न च यत्र यत्र शुद्धनियमस्तत्र तत्र विपरीतनियम इति रीत्या वृद्धादेवहि प्राचामेवेति विपरीतनियमः कुतो नेति वाच्यम्, अप्राग्देशवाचिनः उवर्णान्तस्य वृद्धस्याभावात् विपरीतनियमस्यानवकाशत्वात्।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ऐरावतक: (४१) ऐरावतं नाम 'धन्व (मरु) प्रदेशः' तत्र भव इत्यर्थे 'धन्वयोपधाद् वुञ्' इति वुञ् प्रातिपदिकत्वे सुपो लुकि वुञः आकदेशे आदिवृद्धौ भत्वे अलोपे एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे ऐरावतक: इति सिद्धम्। धन्वशब्द: मरुप्रदेशवाचकः। स च अमरोक्तादिशा पुलिङ्गः। भाष्ये तु अष्टकं नाम धन्व इति दर्शनेन नपुंसकत्वमपि ज्ञायते।

मालाप्रस्थक: ६१ मालाप्रस्थे भव इत्यर्थे 'प्रस्थपुरवहान्ताच्च' इत्यनेन वुञ् प्रातिपदिकत्वेन सुपो लुकि वोरकादेशे भत्वे अलोपे आदिवृद्धौ एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे मालाप्रस्थक: इति सिद्धम्।

जनपदतदवध्योश्च (७६) जनपदवाचिनस्तदवधिवाचिनश्च वृद्धात् वुञ् प्रत्ययः शैषिको भवति इत्यर्थः। स चासौ अवधिश्चेति तदवधिः जनपदश्च तदवधिश्च तयोः जनपदतदवध्योः इति कर्मधारयोत्तरं द्वन्द्वः। अत्र तत्पदेन जनपदरूप एवावधिः लभ्यते नतु ग्रामरूपः। तेन जनपदवाचिनः आदर्शकः इत्युदाहरणम्, अत्र आदर्शो नाम जनपदः तत्र भवार्थे वुञ् प्रत्ययो बोध्यः। जनपदावधेश्च श्यामायनकः। नायं जनपदः किन्तु जनपदावधिः।

नच जनपदत्वादेव सिद्धे अवधिग्रहणं व्यर्थमिति वाच्यम्, जनपदावधौ वुञ् एव यथा स्यान्नान्यत्र इति ज्ञापनाय तदावश्यकत्वात्। तेन जनपदावधिवाचिनः त्रिगर्तशब्दात् 'तौत्तरपदाच्छः' इत्यनेन छो न भवति किन्तु वुञेव, तेन त्रैगर्तकः इति सिद्ध्यति।

आङ्गक: (४२) अङ्गेषु भव: इत्यर्थे 'अवृद्धादपि बहुवचनविषयात्' इत्यनेन वुञि प्रातिपदिकत्वेन सुपो लुकि वोरकादेशे भत्वे 'यस्येति च' इत्यलोपे आदिवृद्धौ एकदेशविकृतन्तायेन सौ रुत्वे विसर्गे सिद्धम्।

दार्वक: (३७) दार्वासु जात इत्यर्थे वृद्धाज्जनपदात् 'अवृद्धादपि बहुवचनविषयात्' इत्यनेन वुञि प्रातिपदिकत्वेन सुपां लुकि वोरकादेशे भत्वे आलोपे आदिवृद्धौ एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे सिद्धम्।

विषयग्रहणं किं वार्त्तन: (३८) वर्तनी च वर्तनी च वर्तनी च वर्तन्यः। वर्तनीषु भव इत्यर्थे 'तत्र भवः' इत्यणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ भत्वे यस्येति चेतीकारलोपे एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे वार्तनः इति सिद्ध्यति। नचात्र 'अवृद्धादपि बहुवचनविषयात्' इत्यनेन वुञ् कुतो नेति वाच्यम्, बहुव-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

चनविषयत्वाभावात् । नच एकशेषेण बहुत्वं वर्तत एवेति वाच्यम्, बहुवचनादित्येव बहुवचनविषयत्वे सिद्धे विषयग्रहणं एकशेषेण लब्धे बहुवचनान्तत्वेऽस्याप्रवृत्तिं ज्ञापयति । तेन वार्तन इत्यत्र न वुञ् किन्तु अणेवेति दिक् ।

बाहुवर्तकः (४१) बहुवर्ते भव इत्यर्थे 'कच्छाग्निवक्त्रगर्तोत्तरपदात्' इत्यनेन वुञि प्रातिपदिकत्वेन सुपो लुकि वोरकादेशे भत्वे अल्लोपे आदिवृद्धौ एकदेश विकृतन्यायेन सौ रुत्वे विसर्गे बाहुवर्तकः इति सिद्धम् ।

नागरकः चोरः शिल्पी वा । नगरे भव इत्यर्थे कुत्सने शिल्पिनि वा गम्ये 'नगरात् कुत्सनप्रावीण्ययोः' इत्यनेन वुञि प्रातिपदिकत्वेन सुपो लुकि वोरकादेशे भत्वे अलोपे आदिवृद्धौ एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे नागरकः इति सिद्धम्। अकुत्सने तु अणि नागराः ब्राह्मणाः इति । अत्राकुत्सनेऽर्थे 'कत्र्यादिभ्यो ढकञ्' इति ढकञ् कुतो नेति वाच्यम्, कत्र्यादिषु संज्ञाशब्देन साहचर्यात् संज्ञायां 'नागरेयकः' इति ढकञि सिद्धत्येव । 'नागरिकः' इति तु प्रामादिक एव इति बहवः । अन्यत्र नागरिकोऽपि साधुः ।

आरण्यकः (६२)अरण्ये भव इत्यर्थे 'अरण्यान्मनुष्ये' इति वुञि प्रातिपदिकत्वेन सुपो लुकि वोरकि आदिवृद्धौ भत्वे अलोपे एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे सिद्धम्।

माहिषिकः (७५) महिषिक जनपदे जातः इत्यर्थे 'कोपधादण्' इति अणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ भत्वे अलोपे एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे सिद्धम् ।

काच्छकं हसितम् (७१) काच्छे जातमित्यर्थे 'मनुष्यतत्स्थयोर्वुञ्' इति वुञि प्रातिपदिकत्वेन सुपो लुकि वोरकादेशे आदिवृद्धौ भत्वे अल्लोपे एकदेशविकृतन्यायेन सौ तस्यामि पूर्वरूपे काच्छकमिति सिद्धम् । अत्र हसितस्य मनुष्यस्थत्वाद् वुञ् एव नतु 'कच्छादिभ्यश्च' इत्यनेनाण् ।

साल्वकः । साल्वे जात इत्यर्थे 'कच्छादिभ्यश्च' इति अणि प्राप्ते 'अपदातौ साल्वात्' इत्यनेन पदातिभिन्ने वुकि प्रातिपदिकत्वात् सुपो लुकि वोरकादेशे आदिवृद्धौ भत्वे अल्लोपे एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे साल्वकः इति सिद्धम् । इदं सूत्रं अपदातावेवेति नियमार्थम् तेन साल्वको ब्राह्मणः इत्यत्र 'मनुष्यतत्स्थयोर्वुञ्' इति वुञ् न भवति ।

Sri Vidyabharathi Book Centre, Sringeri

गहीयः (६८) गहे देशविशेषे भव इत्यर्थे 'गहादिभ्यश्छः' इति छे प्रातिपदिक-

CC-O. In Public Domain. Digitized by eGangotri

त्वेन सुपो लुकि छस्य ईयादेशे भत्वे अल्लोपे एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे गहीय इति सिद्धम् ।

मुखतीयम् । मुखतः इदमित्यर्थे 'गहादिभ्यश्छः' इति छे प्रातिपदिकत्वेन सुपो लुकि छस्य ईयादेशे भत्वे 'मुखपार्श्वतसोर्लोपश्च' इति टेर्लोपे एकदेशविकृतन्यायेन सौ तस्यामि पूर्वरूपे मुखतीयम् इति सिद्धम् ।

नच अव्ययानां भमात्रे टिलोपविधानात् टेर्लोपार्थः मुखपार्श्वतसोर्लोपश्च इति वार्तिकं व्यर्थमिति वाच्यम्, 'अव्ययानां भमात्रे टिलोपः' इत्यस्य बहिषष्टिलोपविधानेनानित्यत्वज्ञापनात् ।

राजकीयम् (८२) राज्ञः इदमिति विग्रहे 'वृद्धाच्छः' इति छे 'राज्ञः क च' इति नस्य कादेशे प्रातिपदिकत्वात् सुपो लुकि छस्येयादेशे एकदेशविकृतन्यायेन सौ तस्यामि पूर्वरूपे राजकीयमिति सिद्धम् ।

ब्राह्मणकीयः (८३) ब्राह्मणको नाम जनपदः वाहीकप्रसिद्धः । यत्र ब्राह्मणा आयुधजीविनः आसन् । एभिः ब्राह्मणकगणराज्यं स्थापितमासीत् । ब्राह्मणके जातमित्यर्थे 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' इत्यनेन वृद्धत्वात् 'कोपधादण्' इति अणि प्राप्ते तं प्रबाध्य 'वृद्धादकेकान्तखोपधात्' इति छे प्रातिपदिकत्वेन सुपो लुकि छस्येयादेशे भत्वे अलोपे एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे ब्राह्मणकीयः इति सिद्धम् ।

युष्मदीयः । (७६) युवयोः युष्माकं वा अयमित्यर्थे 'त्यदादीनि च' इति वृद्धत्वात्प्राप्तं छं प्रबाध्य 'युष्मदस्मदोरन्यतरस्यां खञ् च' इति पक्षे छे प्रातिपदिकत्वात् सुपो लुकि 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति युवादेशस्यापि निवृत्तौ छस्येयादेशे एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे युष्मदीयः इति सिद्धम् । पक्षे खञि खस्य ईनादेशे 'तस्मिन्नणि च युष्माकास्माकौ' इति युष्माकादेशे भत्वादलोपे आदिवृद्धौ णत्वे विभक्तिकार्ये यौष्माकीणः इति सिद्धम् । पक्षे अणि युष्माकादेशे आदिवृद्धौ भत्वादलोपे विभक्तिकार्ये यौष्माकः इति च सिद्ध्यति ।

युष्मदस्मदोरन्यतरस्यां खञ्च । न चात्र यथासंख्यं कुतो नेति वाच्यम्, युष्मदस्मदोः अन्यतरस्यां, खञ् इति योगविभागः क्रियते । तेन युष्मदस्मदोश्छः खञ् भवति युष्मदस्मदोः छखञौ वा भवतः । पक्षे यथाप्राप्तमण् विधायते तेन यथासंख्यस्याप्रवृत्त्या उभाभ्यां प्रत्ययत्रयं भवति इति दिक् ।

Sri Vidyabharathi Book Centre, Sringeri

तस्मिन्नणि च युस्माकास्माकौ । अत्र 'तस्मिन्' इति तच्छब्देन पूर्वसूत्रेण

 CC-O. In Public Domain. Digitized by eGangotri

साक्षाद् विहितः खञ् गृह्यते। तेन खञि अणि च युष्मदस्मदोः यथासंख्यं युष्माक, अस्माक इत्येतावादेशौ स्तः इत्यर्थो लभ्यते। न च यथा स्थान्यादेशयोः यथासंख्यं भवति तथैव निमित्तादेशौ प्रति कुतो नेति वाच्यम्, खञणौ इति वक्तव्ये पृथग्विभक्तिनिर्देसामर्थ्यात् यथासंख्याप्रवृत्तेः।

अयं भावः—'तस्मिन्' इति 'अणि च' इति योगो विभज्यते। ततः खञि युष्मदस्मदोः युष्माकास्माकौ भवतः इति, अणि च युष्मदस्मदोः युष्माकास्माकौ भवतः इत्यर्थः स्वीक्रियते। तेन चकारात् छस्यानुवृत्तिर्न भवति तथा च छे युष्मदीयः अस्मदीय इत्येव सिद्धयति नतु आदेशः इति दिक्।

तावकीनः तावकः।७८। तव अयमित्यर्थे 'त्यदादीनि च' इति वृद्धत्वाच्छे प्राप्ते 'युष्मदस्मदोरन्यतरस्यां खञ्' इत्यनेन खञि प्रातिपदिकत्वात् सुपो लुकि खस्येनादेशे 'तवकममकावेकवचने' इत्यनेन युष्मदः तवकादेशे आदिवृद्धौ भत्वे अलोपे एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे तावकीन इति सिद्धम्। पक्षे अणि तावकः इति सिद्धयति।

मामकीनः। ६८। मम अयमित्यर्थे 'त्यदादीनि च' इति वृद्धत्वात् प्राप्तं छं प्रबाध्य पक्षे युस्मदोरन्यतरस्यां खञ्' इति खञि प्रातिपदिकत्वात् सुपो लुकि 'तवकममकावेकवचने' इति अस्मदः ममकादेशे भत्वे अलोपे खस्येनादेशे आदिवृद्धौ एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे मामकीनः इति। पक्षे अणि मामकः इति सिद्धयति।

त्वदीयः। ६०। तव अयमिति विग्रहे 'त्यदादीनि च' इति वृद्धत्वात् प्राप्तं प्रबाध्य युष्मदस्मदोः इत्यादिना छे प्रातिपदिकत्वेन सुपो लुकि छस्य ईयादेशे प्रत्ययोत्तरपदयोश्च' इति मपर्यन्तस्य त्वादेशे अतो गुणे इति पूर्वरूपे एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे त्वदीयः इति सिद्धम्। अत्र विभक्तिपरकत्वाभावात् शेषे लोपो न भवति।

मामकः मदीयः।८२।मम अयमित्यर्थे 'त्यदादीनि च'इति वृद्धत्वात् युष्मदस्मदोरिति छे प्रातिपदिकत्वेन सुपो लुकि छस्य ईयादेशे 'प्रत्ययोत्तरपदोश्च' इति मपर्यन्तस्य ईयादेशे अतो गुण इति पूर्वरूपे एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे मदीयः इति सिद्धम्। पक्षे अणि मामकः इति।

Sri Vidyabharathi Book Centre, Sringeri

प्रत्ययोत्तरपदयोश्च ! एकार्थयोः मपर्यन्तयोः युष्मदस्मदोः त्व-म-इत्यादेशौ

CC-O. In Public Domain. Digitized by eGangotri

रतः प्रत्यये परे उत्तरपदे च परे इत्यर्थः । उत्तरपदे परे उदाहरणं तु समासे त्वपुत्रो मत्पुत्रः इति ।

परावराधमोत्तमपूर्वाच्च । पर अवर अधम उत्तमपूर्वाच्च अर्थात् यत् प्रत्ययः भवति शैषिक इत्यर्थः । न च परावराधमेभ्यः इति न्यायेन अर्थात् पदानुवृत्ता उक्तार्थलाभे पूर्वग्रहणं व्यर्थमिति वाच्यम्, पूर्वग्रहणमत्र पूर्वविप्रतिषेधग्रहणार्थम् । तेन परार्द्धयम् इत्यत्र दिक्पूर्वपदत्वेऽपि परेण 'दिक्पूर्वपदाट्ठञ् च' इत्यनेन पाक्षिकोऽपि ठञ् न भवति किन्तु यदेवेति दिक् ।

मध्यमः । मध्ये भव इत्यर्थे 'मध्यान्मः' इति मप्रत्यये प्रातिपदिकत्वेन सुपो लुकि एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे सिद्धम् ।

सायम्प्रातिकः । ५४ । सायं प्रातर्भव इति विग्रहे 'तद्धितार्थोत्तरपदे समाहारे च' इति समासे 'कालाट्ठञ्' इत्यनेन ठञि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ ठस्येकादेशे 'अव्ययानां भमात्रे टिलोप' इति टेर्लोपे एकदेशविकृतन्यायेन सौ तस्य रुत्वे विसर्गे सायम्प्रातिक इति सिद्धम् । न चात्र 'सायंचिरमि' त्यादिना ट्युट्युलौ कथं नेति वाच्यम्, 'नस्तद्धिते' सूत्रे भाष्ये तथा प्रयोगदर्शनेन तयोरप्रवृत्तेः ।

नचैवं शर्वरीशब्दाट्ठञ् शार्वरिकस्येति भाव्यम्, कुतः 'शार्वरस्य तमसो निषिद्धये' इति कालिदासः । अनुदितोषसरागा इति भारविः, समानकालीनं प्राक्कालीनमित्यादिप्रयोगाः सिद्ध्यन्ति इति वाच्यम्, अपभ्रंशा एव एते इति प्रामाणिकाः अन्ये तु अमुकः पुरतः इत्यादीनामिव अव्युत्पन्नाः पृषोदरादयः इति वदन्ति ।

शारदिकम् (५३) शरदि ऋतौ भवमित्यर्थे 'श्राद्धे शरदः' इति सूत्रेण ठञि प्रातिपदिकत्वेन सुपो लुकि ठस्येकादेशे आदिवृद्धौ एकदेशविकृतन्यायेन विभक्तिकार्ये शारदिकमिति सिद्धम् । न च 'तत्र जातः' इति सूत्रं यावत् कालाधिकारस्योक्तत्वेन अत्र कालाट्ठञ् इत्यनेन ठञ् कुतो नेति वाच्यम्, सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् ऋत्वर्थे इत्यणोऽपवादकत्वेन सूत्रारम्भस्यावश्यकत्वात् । शरच्छब्दस्य संवत्सरवाचित्वे तु पूर्वेणैव सिद्धिरिति दिक् ।

शारदिकः, शारदो वा रागः, आतपो वा (६१) शरदि ऋतौ भव इत्यर्थे विभाषा रोगातपयोरित्यनेन विकल्पेन ठञि प्रातिपदिकत्वेन सुपो लुकि ठस्येकादेशे आदिवृद्धौ एकदेशविकृतन्यायेन सुपि विभक्तिकार्ये शारदिकः इति ।

Sri Vidyabharathi Book Centre, Sringeri

 CC-O. In Public Domain. Digitized by eGangotri

पक्षे 'ऋतोषण्' इत्यणि प्रातिपदिकत्वे सुपो लुकि आदिवृद्धौ एकदेशविकृतत्वेन विभक्तिकार्ये शारदः रोगः आतपो वा इति सिद्ध्यति।

नैशम्। निशाया भवमित्यर्थे कालाट्ठञं प्रबाध्य 'निशाप्रदोषाभ्यां च' इत्यनेन विकल्पेन ठञि ठस्येकादेशे प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ भत्वादल्लोपे एकदेशविकृतन्यायेन विभक्तिकार्ये नैशिकमिति। पक्षे अणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ भत्वादल्लोपे एकदेशविकृतन्यायेन सुपि नैशमिति सिद्धम्।

द्वारादीनां च (५८) अत्र न य्वाभ्यामिति सूत्रे पदान्ताभ्यामिति वर्जमनुवर्तते। तेन द्वारादीनां गणपठितानां य्वाभ्यामुत्तरपदस्यादेरचः स्थाने न वृद्धिः किन्तु पूर्वौ तु ताभ्यामैजागमौ भवतः इत्यर्थ लभ्यते। अत्र स्वाध्याय-स्वग्रामशब्दपाठे तदादिविधिरपि कल्प्यते, अन्यथा दौवारिकः इत्येव स्यात् दौवारपालिकः इति न सिद्ध्येत्। तदादिविधावस्य प्रवृत्तिकल्पने तु स्वाभाविकम्, स्वाराज्यम्, इत्यत्रापि ऐजागमः स्यादिति नियमार्थं स्वाध्यायशब्दः कल्प्यते। नियमाकारश्च स्वशब्दादिपदयोरैजागमश्चेत्तर्हि स्वाध्याय-स्वग्राम-शब्दयोरेव नान्येषाम्। तेन स्वाभाविकमित्यादि सिद्धयति।

शौवस्तिकम् (५९,६१,७२) श्वस् इत्यस्मात् श्वः जातमित्यर्थे 'श्वसस्तुट् च' इति ठञि तस्य तुडागमे च कृते सुपो लुकि ठस्येकादेशे आदिवृद्धौ प्राप्तायां द्वारादीनां च' इत्यनेन वकारात् पूर्वमैजागमेन औकारे एकदेशविकृतन्यायेन सुपि विभक्तिकार्ये शौवस्तिकमिति सिद्धम्।

तैषम् (५०) तिष्ये भव इत्यर्थे तिष्यशब्दात् 'कालाट्ठञ'प्रबाध्य 'सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्' इति अणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ भत्वेन अलोपे 'तिष्यपुष्ययोर्नक्षत्राणि' इति यलोपे एकदेशविकृतन्यायेन विभक्तिकार्ये तैषम् इति, जातार्थे तु श्रविष्ठाफल्गुनी—इत्यादि सूत्रेण यलोपो बोध्यः।

प्रावृषेण्यः (८०) प्रावृषि वर्षायां भव इत्यर्थे 'प्रावृष एण्यः' इति एण्यप्रत्यये प्रातिपदिकत्वेन सुपो लुकि एकदेशविकृतन्यायेन विभक्तिकार्ये प्रावृषेण्य इति सिद्धम्।

प्रावृषिकः (७९) प्रावृषि जात इत्यर्थे 'प्रावृषष्ठप्' इत्यनेन ठपि प्रातिपदिकत्वेन सुपो लुकि ठस्येकादेशे एकदेशविकृतन्यायेन विभक्तिकार्ये प्रावृषिक इति सिद्धम्।

वार्षिकं वासः। वर्षासु साधु इत्यर्थे 'वर्षाभ्यष्ठक्' इत्यनेन ठकि प्रातिपदिकत्वेन सुपो लुकि ठस्येकादेशे भत्वेन अल्लोपे आदिवृद्धौ एकदेशविकृतन्यायेन सुपि

Sri Vidyabharathi Book Centre, Sringeri

 CC-O. In Public Domain. Digitized by eGangotri

विभक्तिकार्ये सिद्धम् । न च 'तत्र साधुः' इतिसाध्वधिकारस्य शेषाधिकारबहिर्भूतत्वात् कथं साध्वर्थे शैषिकः प्रत्यय इति वाच्यम्, कालात्साधुपुष्प्यत्पच्यमानेषु इति कालवाचकानां साध्वर्थेऽपि ठग्विधानात् ।

हैमनम् । हेमन्ते भवमित्यर्थे 'सर्वत्राण् च तलोपश्च' अणि अकारविशिष्टतलोपे च कृते प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ एकदेशविकृतन्यायेन स्वादिकार्ये हैमनमिति सिद्धम् ।

न चात्र टिलोपः कुतो नेति वाच्यम् 'अन्' इत्यनेन प्रकृतिभावात् । तकारस्य लोपोऽकारस्य तु 'यस्येति चे' त्यनेन लोप इति पक्षे तु यस्येति चेति लोपस्याभीयत्वेन, स्थानिवद्भावेन वा टिलोपाप्राप्तेः ।

हैमन्तम् (८२) हेमन्ते भवमित्यर्थे पक्षे ऋत्वणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ यस्येति चेति अलोपे एकदेशविकृतन्यायेन विभक्तिकार्ये हैमन्तमिति सिद्धम् । न च अत्र अणि कृते तलोपः कुतो नेति वाच्यम् । तलोपस्य सर्वत्राण् इति प्रतिपदोक्तेन अणा सन्नियोगशिष्टत्वात् ।

भाष्ये तु हैमन्तहैमनशब्दयोः समानार्थयोः स्वीकारेण उभाभ्यां सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् इत्यनेन ऋत्वणि हैमनम्, हैमन्तमित्युभयं सिद्धयतीति ।

चिरन्तनम् (५८) चिरं भव इत्यर्थे 'सायं चिरं प्राह्णे प्रगेऽव्ययेभ्यटघ्युट्युलौ तुट् च' इति टघु प्रत्यये युवोरनाकौ इति अनादेशे ततः लुटि प्रातिपदिकत्वेन सुपो लुकि एकदेशविकृतन्यायेन विभक्तिकार्ये चिरन्तमिति सिद्धम् । न च अन्तरङ्गत्वात्, अनादेशं प्रबाध्य पूर्वं तुटि मृत्युः इत्यादाविव अनादेशो न स्यादिति वाच्यम्, 'अनद्यतने लुट्' इत्यादिसूत्रे 'अनद्यतने' इति निर्देशेन तुटः प्रागेव अनादेशविधानज्ञापनेनादोषात् ।

प्राह्णेतनम् ।६५। प्राह्णः सोढोऽस्येत्यर्थे सायंचिरंप्राह्णे-इत्यादिना टघु प्रत्यये अनादेशे तुटि प्रातिपदिकत्वेन सुपो लुकि एदन्तत्वेन निपातने एकदेशविकृतन्यायेन विभक्तिकार्ये प्राह्णेतनमिति सिद्धम् । एवं प्राह्णे जातमित्यर्थे टघु प्रत्यये अनादेशे तुटि प्रातिपदिकत्वे सुपो लुकि प्राप्ते घकालतनेषु इत्यनेन अलुकि विभक्तिकार्ये रूपसिद्धे ।

अपरहैमनः (५१) हेमन्तस्य अपरम् अपरहेमन्तः । अपरहेमन्ते जात इत्यर्थे 'सर्वत्राण् च तलोपश्च' इत्यणि तलोपे च कृते प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ प्राप्तायां '[illegible]' इत्यनेन उत्तरपदस्य [illegible] वृद्धौ एकदेशविकृतन्यायेन विभक्तिकार्ये अपरहैमनः इति सिद्धेः ।

Sri Vidyabharathi Book Centre, Sringeri

 CC-O. In Public Domain. Digitized by eGangotri

पौर्ववार्षिकः (३०) पूर्वासु भव इत्यर्थे 'कालाट्ठञ्' इति ठञ् तद्धितार्थोत्तरपदे समाहारे च' इति समासे प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ अल्लोपे ठस्येकादेशे एकदेशविकृतन्यायेन सुपि विभक्तिकार्ये सिद्धम् । न च 'अवयवादृतोः' इति सूत्रे अवयवग्रहणाभावेऽपि इष्टसिद्धौ तद् ग्रहणं व्यर्थमिति वाच्यम्, पूर्वासु वर्षासु इति विग्रहे यत्र नास्ति अवयवप्रतीतिः पौर्ववार्षिकः इत्यादौ उत्तरपदस्य वृद्ध्यापत्तेः ।

पूर्ववार्षिकः । वर्षाणा पूर्व इति विग्रहे 'पूर्वपराधरोत्तम्' इत्ययेन एकदेशिसमासे पूर्वासुवर्षासु जात इत्यर्थे 'वर्षाभ्यष्ठक्' इति ठकि प्रातिपदिकत्वेन सुपो लुकि ठस्येकादेशे अल्लोपे आदिवृद्धि प्रबाध्य 'अवयवादृतोः' इति उत्तरपदस्यादेरचो वृद्धौ एकदेशविकृतन्यायेन सुपि विभक्तिकार्ये पूर्ववार्षिकः इति सिद्धम् । न च प्रत्ययविधौ तदन्तविधिप्रतिषेधात् कथमिह ठगिति वाच्यम्, ऋतुवाचिनः शब्दात् वृद्धिनिमित्तकप्रत्ययविधाने तदन्तविधिर्वाच्यः स चेदृतुवाची शब्दोऽवयवेभ्यः परः स्यादित्यर्थकेन 'ऋतोवृद्धिमद्विधाववयवानामि'त्यनेन तदन्तविधिविधानात् ।

ऋतोर्वृद्धिमद्विधाववयवानाम् (४१) ऋतुवाचिनः शब्दाद् वृद्धिनिमित्तकप्रत्ययविधाने तदन्तविधिर्वाच्यः स चेदृतुवाची शब्दोऽवयवेभ्यः परः इत्यर्थः । तेन पूर्ववार्षिकः इत्यत्र वर्षाणां पूर्वः इति विग्रहे एकदेशिसमासे अनेन तदन्तविधौ 'वर्षाभ्यष्ठक्' इति ठग् भवति । पूर्वासु वर्षासु भव इत्यर्थे सामानाधिकरण्येन बोधे पूर्वशब्दस्य अवयववृत्तित्वाभावात् तदन्तविधेरभावे 'वर्षाभ्यष्ठक्' इति ठक् न भवति किन्तु 'कालाट्ठञ्' इति ठञ् एव । ञित्कितोर्भेदस्तु स्वरे एव । स्पष्टं चेदं 'येन विधिरि'ति सूत्रभाष्ये इति ।

सुपाञ्चालकः ।४३। सुपाञ्चालेषु जात इत्यर्थे 'जनपदतदवध्योश्चे'ति 'अवृद्धादपि बहुवचनविषयादि'ति नियमेन वुञि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धि प्रबाध्य 'सुसर्वार्धाज्जनपदस्ये'ति उत्तरपदस्य वृद्धौ वुञ् 'युवोरनाकौ' इति अकि भत्वादल्लोपे एकदेशविकृतन्यायेन सुपि विभक्तिकार्ये सिद्धम् ।

न च प्रत्ययविधौ तदन्तविधेरभावेन कथमत्र वुञिति वाच्यम्, येनविधिरित्यत्र भाष्यपठितेन 'जनपदवाचिनः शब्दस्यानन्तरे प्रत्यये विधीयमाने तदन्तविधिः यदि चेत् सुसर्वप्रभृतिभ्यः परः स्यादि' त्यर्थकेन 'सुसर्वार्धदिक्छब्देभ्यो जनपदस्य' इत्यनेन तदन्तविधिविधानात् इति दिक् ।

पौर्वपञ्चालः । ३३ । पूर्वपञ्चालानामयमित्यर्थे अणि णित्वादादिवृद्धौ भत्वादल्लोपे विभक्तिकार्ये पौर्वपञ्चालः इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

न च 'दिशोऽमद्राणा'मित्यनेन पञ्चाल इत्यत्र वृद्धिः कुतो नेति वाच्यम्, अत्र प्रयोगे पूर्वशब्दः देशवाची कालवाची वा न तु दिग्वाची सूत्रे तु दिक्शब्देन दिग्वाचकस्यैव ग्रहणात् न वृद्धिः । इदं च दिशः पाठेन कल्प्यते इति दिक् ।

पूर्वेषुकामशमः । ५९ । पूर्वेषुकामशम्यां भव इत्यर्थे 'तत्र भवः' इत्यणि प्रातिपदिकत्वेन सुपो लुकि 'प्राचां ग्रामनगराणाम्' इति उत्तरपदवृद्धौ भत्वेन पदयस्येतिचेति इकारस्य लोपे एकदेशविकृतन्यायेन विभक्तिकार्ये पूर्वेषुकामशमः इति सिद्धम् ।

नचात्र 'दिक्पूर्वपदादसंज्ञायां ञः' इत्यनेन ञ कुतो नेति वाच्यम्, पूर्वेषुकामशमीशब्दस्य संज्ञात्वादस्याप्रवृत्तेः इति दिक् ।

पूर्वपाटलिपुत्रकः । ३१ । पूर्वपाटलिपुत्रेषु भवः 'इत्यर्थे रोपधेतोः प्राचाम्' इति वुञ्, तस्य कादेशे प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धि प्रबाध्य 'प्राचां ग्रामनगराणामि'ति उत्तरपदस्य वृद्धौ भत्वादलोपे विभक्तिकार्ये पूर्वपाटलिपुत्रकः इति सिद्धम् ।

नचात्र उत्तरपदस्य वृद्धत्वादेव सिद्धे वृद्धिविधानं व्यर्थमिति वाच्यम्, आदिवृद्धिनिवृत्त्यर्थत्वेन तद्विधानस्य सार्थक्यात् ।

अमावास्यः, अमावास्यकः । ५५ । अमावास्यायां जात इत्यर्थे 'अमावास्याया वा' इति वुनि प्रातिपदिकत्वेन सुपो लुकि वोरकादेशे भत्वेन यस्येतिचेत्यकारलोपे एकदेशविकृतन्यायेन विभक्तिकार्ये अमावास्यकः । पक्षे— सिन्धुवेलाद्यृतुनक्षत्रेभ्योऽण्' इति अणि आदिवृद्धौ आकारलोपे एकदेशविकृतन्यायेन विभक्तिकार्ये अमावास्यः इति सिद्धम् ।

अमावास्यः । ५५ । अमावास्यायां जात इत्यर्थे 'अ च' इत्यनेन अकारप्रत्यये भत्वेनाकारलोपे विभक्तिकार्ये सिद्धम् ।

श्रविष्ठा । ३७ । 'श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाऽऽषाढाबहुलाल्लुक्' इति सूत्रस्वरूपम् । श्रविष्ठा, फल्गुनी, अनुराधा, स्वाति, तिष्य, पुनर्वसु, हस्त, विशाखा, आषाढा, बहुला एतेभ्यो नक्षत्रवाचिभ्यः परस्य जातार्थप्रत्ययस्य लुक् स्यात् इति सूत्रार्थः ।

श्रविष्ठः । ५८ । श्रविष्ठासु जात इत्यर्थे 'सन्धिवेलाद्यृतुनक्षत्रेभ्योण्' इत्यणि तस्य श्रविष्ठेत्यादिसूत्रेण लोपे 'लुक्तद्धितलुकि' इत्यनेन स्त्रीप्रत्ययस्य निवृत्तौ स्वादिकार्ये श्रविष्ठः इति सिद्धम् । एवं सर्वः ।

Sri Vidyabharathi Book Centre, Sringeri

 CC-O. In Public Domain. Digitized by eGangotri

लुक्तद्धितलुकि । नच 'एकविभक्ति चापूर्वनि पाते' इति शास्त्रीयोपसर्जनत्वस्यात्राभावेन उपसर्जनस्त्रीप्रत्ययत्वाभावात् कथं श्रविष्ठः इत्यत्र स्त्रीप्रत्ययनिवृत्तिरिति वाच्यम्, अत्र सूत्रे अप्रधानमेवोपसर्जनम् गृह्यते नतु शास्त्रीयम् असम्भवात् ।

चित्रा । चित्रायां जात इत्यर्थे 'तत्र जात' इत्यणि प्रातिपदिकत्वेन सुपो लुकि 'चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानम्' इति जातार्थप्रत्ययस्य लोपे 'लुक्तद्धितलुकि' इति टापः निवृत्तौ जातार्थस्त्रीत्वप्रतिपादनाय पुनः टापि विभक्तिकार्ये चित्रा इति सिद्धम् ।

रोहणी । ४२ । रोहिण्यां जाता इत्यर्थे 'तत्र जातः' इत्यणि प्रातिपदिकत्वेन सुपो लुकि 'चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानम्' इति जातार्थप्रत्ययस्य लोपे 'लुक्तद्धितलुकि' इति गौरादिस्त्रीप्रत्ययस्य ङीपः निवृतौ जातार्थस्त्रीत्वप्रतिपादनाय पुनर्ङीपि विभक्तिकार्ये रोहिणी इति सिद्धम् ।

न च रेवतीरोहिणी नक्षत्रे इति गौरादिषु पाठात् नक्षत्रवाचिन एव ङीपः प्राप्तौ इह जातार्थे नक्षत्रवाचित्वाभावात् कथं ङीविति वाच्यम्, पिप्पल्यादेराकृतिगणत्वात् तत्र स्त्रीत्ववृत्त्योरनयोः प्रवेशेन ङीषः प्रवृत्तौ बाधकाभावात् ।

प्रोष्ठपादो माणवकः । प्रोष्ठपदासु जात इत्यर्थे अणि प्रातिपदिकत्वेन सुपो लुकि 'जे प्रोष्ठपदानामि'ति उत्तरपदवृद्धौ विभक्तिकार्ये सिद्धम् । अत्र जेति नियमात् भवार्थे नाण् ।

स्रौघ्नः । ५२ । स्रुघ्ने प्रायेण भवति इत्यर्थे 'प्राय भवः' इत्यणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ विभक्तिकार्ये सिद्धम् ।

औपनीविकः । ४८ । नीवेः समीपमुपनीवि सामीप्येऽव्ययीभावः उपनीव्यां भवः इत्यर्थे 'उपजानूपकर्णोपनीवेष्ठक्' इति ठकि प्रातिपदिकत्वेन सुपो लुकि तस्येकादेशे कित्वाद वृद्धौ 'यस्येति चेति' इकारलोपे विभक्तिकार्ये औपनीविक इति सिद्धम् ।

ग्रैष्मकम्, ग्रैष्मम् । ५१ । ग्रीष्मे सम्भवति इत्यर्थे 'ग्रीष्मवसन्तादन्यतरस्याम्' इति वुञि प्रातिपदिकत्वेन सुपो लुकि वोरकादेशे ञित्वादादिवृद्धौ विभक्तिकार्ये ग्रैष्मकम् । पक्षे 'सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्' इति अणि ग्रैष्मम् इति सिध्यति ।

मासिकम् । ४१ । Sri Vidyabharathi Book Centre, Sringeri इति ठकि प्रातिपदि-

CC-O. In Public Domain. Digitized by eGangotri

कत्वेन सुपो लुकि ठस्येकादेशे आदिवृद्धौ यस्येति चेति अकारलोपे विभक्तिकार्ये मासिकमिति सिद्धम् ।

कलापकम् । यस्मिन् काले मयूराः कलापिनो भवन्ति स कालः उपचारात् । तत्र देयमृणमित्यर्थे 'कलाप्यश्वत्थयववुसाद् वुन्' इति वुनि प्रातिदिकत्वेन सुपो लुकि वोरकादेशे 'नस्तद्धिते इति टिलोपे विभक्तिकार्ये कलापकमिति सिद्धम्' ।

माद्रनगरः । ४ । ननु 'प्राचां नगरान्ते' इति सूत्रे नगरान्तत्वेन सौह्मनागरः इत्यादौ उभयपदवृद्धौ प्राचां ग्रहणम् व्यर्थमिति चेन्न, मद्रनगरम् इति उदग्देशेऽपि उभयपदवृद्धौ अनिष्टापत्तिः स्यादतः प्राचां ग्रहणस्यावश्यकत्वाद्विति दिक् ।

कौरुजाङ्गलम् । कुरुजङ्गले भवमित्यर्थे अणि प्रातिपदिकत्वेन सुपो लुकि 'जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम्' इत्यनेन विकल्पेन उत्तरपदस्यापि वृद्धौ भत्वेनाकारलोपे प्रातिपदिककार्ये कारुजाङ्गलम्, कौरुजाङ्गलम् इति च सिद्धम् ।

दार्तेयम् । ३४ दृतौ भवमित्यर्थं 'दृतिकुक्षिकलशिवस्त्यहेर्ढञ्' इति ढञि प्रातिपदिकत्वेन सुपो लुकि ढस्येयादेशे आदिवृद्धौ रपरत्वे 'यस्येति चे'तीकारलोपे विभक्तिकार्ये दार्तेयम् इति सिद्धम् ।

आस्तेयम् । ३४ । अस्ति भवम् इत्यर्थे अस्तीति विभक्तिप्रतिरूपकादव्ययात् 'दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्' इति ढञि प्रातिपदिकसंज्ञायाम् ढस्येयादेशे आदिवृद्धौ यस्येति चेतीकारलोपे प्रातिपदिककार्ये आस्तेयमिति सिद्धम् ।

ग्रैवेयम् । ग्रीवासु भवम् इत्यर्थे 'ग्रीवाभ्योऽण् च' इति विकल्पेनाणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ 'यस्येति चे'त्याकारलोपे प्रातिपदिककार्ये ग्रैवम् इति । पक्षे चकारेणानुकृष्टो ढञ् तस्येयादेशे आदिवृद्धौ ग्रैवेयम् इति च सिद्धयति ।

गाम्भीर्यम् । (४९) गम्भीरे भवमित्यर्थे 'गम्भीराञ्ञ्यः' इति ञ्यप्रत्यये प्रातिपदिकत्वेन सुपो लुकि अनुबन्धलोपे आदिवृद्धौ 'यस्येति चे'त्यकारलोपे विभक्तिकार्ये गाम्भीर्यम् इति सिद्धम् ।

पाञ्चजन्यम् । पञ्चजनेषु भवम् इत्यर्थे 'पञ्चजनादुपसंख्यानम्' इत्यनेन ञ्यप्रत्यये अनुबन्धलोपे प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ 'यस्येति चे'त्यकारलोपे विभक्तिकार्ये पाञ्चजन्यमिति सिद्धम् ।

आध्यात्मिकम् । अध्यात्मं भवमित्यर्थे 'अध्यात्मादेष्ठञिष्यते' इति ठञि अनु-

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

बन्धलोपे आदिवृद्धौ ठस्येकादेशे 'यस्येति चे'त्यकारलोपे प्रातिपदिकार्ये आध्यात्मिकमिति सिद्धम् ।

ऐहलौकिकम् । ४४ । इह लोके भवमित्यर्थे 'अध्यात्मादेष्ठञिष्यते' इति ठञि अनुबन्धलोपे प्रातिपदिकत्वेन सुपो लुकि 'अनुशतिकादीनां च' इत्युभयपदवृद्धौ ठस्येकादेशे यस्येति चे'त्यकारलोपे प्रातिपदिककार्ये ऐहलौकिकमिति सिद्धम् ।

शांशपः । ३७ शिंशपाया विकार इत्यर्थे शिंशपाशब्दस्य पलाशादिगणपठित्वात् 'पलाशादिभ्यो वा' इति अञि 'देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात्' इति सूत्रेण आदिवृद्धिं प्रबाध्य आद्यस्य इकारस्य अकारे यस्येति चेत्यनेन भस्याकारस्य लोपे विभक्तिकार्ये शांशपः इति सिद्धम् । चमसः यज्ञपात्रविशेषः तस्य शिंशपा प्रकृतिकाष्ठम् ।

श्रायसम् । ५९ । श्रेयसि भवमित्यर्थे 'तत्र भवः' इति अणि प्रातिपदिकत्वेन सुपो लुकि 'देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात्' इत्यनेन प्राप्तामादिवृद्धिं प्रबाध्य आदिभूतस्यैकारस्याकारे विभक्तिकार्ये श्रायसमिति सिद्धम् ।

जिह्वामूलीयम् । ५४ जिह्वामूले भवमित्यर्थे 'जिह्वामूलाङ्गुलेश्छः,' इति छप्रत्यये प्रातिपदिकत्वेन सुपो लुकि छस्य ईयादेशे 'यस्येति चे'त्यकारलोपे विभक्तिकार्ये जिह्वामूलीयम् इति सिद्धम् ।

अशब्दे किं कवर्गीयो वर्णः । ५३ । कवर्गे भव इत्यर्थे 'वर्गान्ताच्च' इत्यनेन छप्रत्यये प्रातिपदिकत्वेन सुपो लुकि छस्येयादेशे 'यस्येति चे'त्यकारलोपे विभक्तिकार्ये कवर्गीय इति सिद्धम् । न चात्र 'अशब्दे यत्खावन्यतरस्यामिति' यत् खः वा कुतो नेति वाच्यम् । तत्र अशब्दे इत्यनेन वर्गवाचके वर्गशब्दे उभयोः अप्रवृत्तेः । शब्दवाचके वर्गशब्दे तु वर्ग्यः, वर्गीणः वर्गीयः इति त्रीणि रूपाणि भवन्ति ।

सौवम् । ५३ । सुप्सु भवमित्यर्थे 'तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः' इत्यनेन अणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ विभक्तिकार्ये [illegible] इति सिद्धम् ।

षात्वणत्विकः (४२) षत्वणत्वयोर्विधायकं शास्त्रं [illegible] [illegible] व्याख्यानस्तत्र भवमित्यर्थे 'बह्वचोऽन्तोदात्ताट्ठञ्' इति ठञि [illegible] लुकि ठस्येकादेशे आदिवृद्धौ 'यस्येति चे'त्यकार-लोपे विभक्तिकार्ये [illegible] सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

क्रतुयज्ञेभ्यश्च। नचात्र क्रतुयज्ञयोः इति पाठेनैवेष्टसिद्धौ बहुवचनपाठो व्यर्थ इति वाच्यम्, स्वरूपविधिनिरासार्थत्वेन बहुवचनपाठस्य चारितार्थ्यात्। क्रतुयज्ञशब्दौ सोमयागे प्रसिद्धौ। नच एकस्यैवोपादाने सिद्धौ किमुभयोरुपादानेनेति वाच्यम्; तत्सामर्थ्यात् असोमकानामपि यागानां ग्रहणेन असोमकेभ्यः पाकयज्ञशब्देभ्यश्च प्रत्ययः सिद्धयति। नच पूर्वसूत्रेणैव सिद्धे किमर्थमिदं सूत्रमिति वाच्यम्, वाजपेयराजसूयशब्दौ कृदुत्तरपदप्रकृतिस्वरेण मध्योदात्तौ तत्रापि टञ् सिद्धयर्थमस्यावश्यकत्वात्। नचैव अग्निष्टोमशब्दस्य अन्तोदात्तत्वे कथमस्य प्रवृत्तिरिति वाच्यम्, आरम्भसामर्थ्यात्; अन्तोदात्तादपि यज्ञाभिधायिनः अनेनैव टञादिरिति सिद्धान्तात्। आग्निष्टोमिक इत्यत्र नास्य प्रवृत्तिरिति आह।

पूर्ववार्षिक। ५९। वर्षाणां पूर्वं पूर्ववर्षाः तत्र जातः इति विग्रहे 'वर्षाश्यष्ठक्' इति ठकि ठस्येकादेशे 'अवयवादृतोः' इति वृद्धौ "यस्येति च" इति आकारलोपे विभक्तिकार्ये पूर्ववार्षिकः इति। ननु प्रत्ययविधौ तदन्तविधिप्रतिषेधात् कथमिह 'वर्षाश्यष्ठक्' इति ठगिति चेन्न "ऋतोर्वृद्धिमद्विधाववयवानाम्" इति वार्तिकस्य जागरूकत्वात्।

फल्गुनी। ५९। फल्गुन्योर्जातेत्यर्थे 'फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ' इति वार्तिकेन ट प्रत्यये "यस्येति च" इति ईकारलोपे जातार्थस्त्रीत्वे टित्वात् ङीपि विभक्तिकार्ये फल्गुनी इति सिद्धम्।

आग्निष्टोमिकः (४५) अग्निष्टोमस्य व्याख्यानः 'तत्र भव' इत्यर्थे 'क्रतुयज्ञेभ्यश्च' इति ठञि प्रातिपदिकत्वेन सुपो लुकि ठस्येकादेशे ञित्वाद् आदिवृद्धौ भत्वादल्लोपे विभक्तिकार्ये आग्निष्टोमिक इदि सिद्धम्।

पाकयज्ञिकः। ४०। पाकयज्ञानां व्याख्यानः पाकयज्ञः तेषु भव इत्यर्थे ठञि प्रातिपदिकत्वेन सुपो लुकि ठस्येकादेशे ञित्वात् आदवृद्धौ यस्येति चेत्यकारलोपे स्वादिकार्ये पाकयज्ञिकः इति सिद्धम्।

वासिष्ठिकः। ३६। वसिष्ठेन दृष्टो मन्त्रः वसिष्ठस्तस्य व्याख्यानः तत्र भवो वा इत्यर्थे 'अध्यायेष्वेवर्षे, ठञि ठस्येकादेशे आदिवृद्धौ 'यस्येति चे'त्यकारलोपे स्वादिकार्ये वासिष्ठिकः इति सिद्धम्।

छन्दस्यः, छान्दसः। ६३। छन्दसां व्याख्यानः तत्र भवो वा इत्यर्थे 'छन्दसो यदणौ' इति यत् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि विभक्तिकार्ये छन्दस्यः। पक्षे अण् प्रत्यये आदिवृद्धौ विभक्तिकार्ये छान्दसः इति सिद्धम्।

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

औपनिषदः । उपनिषदो व्याख्यानस्तत्र भव इत्यर्थे 'बह्वचोऽन्तोदात्ताद्' इति ठञि प्राप्ते 'अणृगयनादिभ्यः' इत्यनेनाणि प्रातिपदिकत्वेन सुपो लुकि आदि वृद्धौ प्रातिपदिककार्ये औपनिषदः इति सिद्धम् ।

द्व्यजृदिति : । ६३ । अन्वयः-द्व्यज, ऋत, ब्राह्मण, ऋक्, प्रथम, अध्वर, पुरश्चरण नमन, आख्यातात् उक् इति पदच्छेदः । एभ्यः आख्यातान्ताद् ठगिति सूत्रार्थः ।

शौण्डिकः । ३२ । शुण्डिकादागतः इत्यर्थे 'ठगायस्थानेभ्यः' इति प्राप्तं ठगं प्रबाध्य 'शुण्डिकादिभ्योऽण्' इति अणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ 'यस्येति चे'ति अलोपे प्रातिपदिककार्ये शौण्डिक इति सिद्धम् । शुण्डिकम् (चुंगीधर) इत्यर्थः ।

आशौचम् अशौचम्, । ५० । अशुचेरागतमित्यर्थे 'तत आगत' इति अणि 'नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम्' इति नञः परस्यादेरचः नित्यं पूर्वपदस्य तु विकल्पः वृद्धौ 'यस्येति चे'ति अकारलोपे विभक्तिकार्ये आशौचम् पूर्वपदस्य वृद्ध्यभावपक्षे अशौचम् इति सिद्ध्यति ।

कार्कण : । ३७ । कृकणादागत इत्यर्थे 'कृकणपर्णाद् भारद्वाजे' इति छे प्राप्ते तं प्रबाध्य 'शुण्डिकादिभ्योऽण्' इति अणि आदिवृद्धौ 'यस्येति चे'ति अलोपे विभक्तिकार्ये कार्कण इति सिद्धम् ।

हैमवती । ५३ । हिमवतः प्रभवति इत्यर्थे 'प्रभवति' इत्यनेन अणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ स्त्रीत्वात् ङीपि 'यस्येति चे'तीकारलोपे विभक्तिकार्ये हैमवती इति सिद्धम् ।

शारीरकीयः । शारीरकमधिकृत्य कृते ग्रन्थे इत्यर्थे 'अधिकृत्य कृते ग्रन्थे' इति छप्रत्यये तस्य एयादेशे 'यस्येति च' इत्यल्लोपे विभक्तिकार्ये शारीरकीयः इति सिद्धम् ।

किरातार्जुनीयम् । ५९ । किरातश्च अर्जुनश्चेति किरातार्जुनौ तावधिकृत्य कृतो ग्रन्थ इत्यर्थे 'शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः' इति छप्रत्यये प्रातिपदिकत्वेन सुपो लुकि छस्य ईयादेशे 'यस्येति चे'त्यकारलोपे विभक्तिकार्ये किरातार्जुनीयम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

स्रौघ्नः । ५३ । स्रुघ्नोऽभिजनोऽस्येत्यर्थे 'अभिजनश्च' इति अणि प्रातिदिकत्वेन सुपो लुकि आदिवृद्धौ 'यस्येति च'त्यकारलोपे विभक्तिकार्ये स्रौघ्नः इति सिद्धम् । यत्र स्वयं वसति स निवासः; यत्र पूर्वैरुषितं सोऽभिजनः, इति विवेकः ।

आर्क्षोदा द्विजाः । ५५ । ऋक्षोदः पर्वतोऽभिजनो येषां ते आर्क्षोदाः इत्यत्र प्रथमान्तात् ऋक्षोदशब्दात् 'अभिजनश्च' इति अणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ रपरत्वे 'यस्येति च'त्यकारलोपे विभक्तिकार्ये बहुवचने आर्क्षोदा इति सिद्धम् ।

नचात्र 'आयुधजीविभ्यश्छः पर्वते' इति सूत्रेण छः कुतो न इति, आयुधेति विशेषणात् ।

हृद्गोलियाः (ई० ६७) हृद्गोलः पर्वतोऽभिजनो येषामायुधजीविनां ते हृद्गोलीयाः । अत्र 'आयुधजीविभ्यश्छः पर्वते' इति छप्रत्यये छस्य ईयादेशे 'यस्येति च' इत्यलोपे विभक्तिकार्ये हृद्गोलीयाः इति सिद्धम् ।

ताक्षशिलः । ५२ । तक्षशिला अभिजनोऽस्येत्यर्थे 'सिन्धुतक्षशिलादिभ्योऽणञौ' इति प्रथमान्तात् तक्षशिलाशब्दात् अणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ 'यस्येति च'त्यकारलोपे विभक्तिकार्ये ताक्षशिल इति सिद्धम् ।

पायसिकः । ५७ । पयो भक्तिरस्येत्यर्थे 'अचित्ताददेशकालाट्ठक्' इति ठकि, प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ ठस्येकादेशे विभक्तिकार्ये पायसिकः सिद्धम् ।

तैत्तिरीयाः । ५९ । तित्तिरिणा प्रोक्तमधीयते इत्यर्थे 'तित्तिरिवरतन्तुखण्डिकोखाच्छण्' इति छणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ छस्य ईयादेशे भत्वेन 'यस्येति च'ेतीकारलोपे विभक्तिकार्ये तैत्तिरीयः इति प्रथमाबहुवचने रूपम् ।

काश्यपिनः । ४३ । काश्यपेन प्रोक्तमधीयते इत्यर्थे 'काश्यपकौशिकाभ्यामृषिभ्यां णिनिः' इति णिनिप्रत्यये प्रातिपादिकत्वेन सुपो लुकि आदिवृद्धौ विभक्तिकार्ये बहुवचने जसि काश्यपिनः इति सिद्धम् ।

आलम्बिनः (ई० ५८) आलम्बिनः=वैशम्पायनशिष्याः । आलम्बिना प्रोक्तमधीयते इति विग्रहे 'कलापिवैशम्पायनान्तेवासिभ्यश्च' इति णिनि प्रत्यये 'प्रोक्ताल्लुक्' इति लुकि णित्त्वादादिवृद्धौ विभक्तिकार्ये आलम्बिनः इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

 CC-0. In Public Domain. Digitized by eGangotri

पुराणप्रोक्तेषु ब्राह्मणकल्पेषु । ४३ । तृतीयान्तात् प्रोक्तार्थे णिनिः स्यात् यत् प्रोक्तम् पुराणप्रोक्ताश्चेत् ब्राह्मणकल्पास्ते भवन्ति इत्यर्थः । अत्र पुराणपदं न ग्रन्थपरं किन्तु चिरन्तनपरम् । तेन पुराणेन चिरन्तनेन मुनिना प्रोक्ताः इति लभ्यते ।

भाल्लविनः, भल्लुनामकेन पुराणमुनिना प्रोक्ताः भाल्लविनः इति । अनेन णिनि सुपो लुकि आदिवृद्धौ ओर्गुणे अवादेशे भाल्लविनशब्दात् अध्येत्रर्थे अणि तस्य लुकि बहुवचने जसि भाल्लविन इति सिद्धयति । इदं ब्राह्मणे उदाहरणम् । पैङ्गीकल्पः कल्पे तु पिङ्गेन पुरातनेन मुनिना प्रोक्तम् इत्यर्थे अनेन णिनि सुपो लोपे आदिवृद्धौ सौ उपधादीर्घे सुलोपे नलोपे पैङ्गीकल्प इति सिद्धयति ।

याज्ञवल्कानि ब्राह्मणानि । ननु 'पुराणप्रोक्तेषु ब्राह्मणकल्पेषु' इति सूत्रे पुराणपदं व्यर्थमिति चेन्न, याज्ञवल्क्येन प्रोक्तानि इत्यर्थे यज्ञवल्कशब्दात् यञि ओदिवृद्धौ याज्ञवल्क्यात् अणि प्रातिपदिकत्वेन सुपो लुकि 'आपत्यस्य च तद्धितेऽनाति' इति यलोपे बहुवचने जसि रूपम याज्ञवल्कानि इति । यदि अत्र पुराणपदं न स्यात् तर्हि अत्रापि णिन्प्रित्यये उक्तं रूपं न सिद्धयेत् । अतः पुराणग्रहणं कृतम् । नागेशास्तु शाट्यायनादितुल्यकालत्वात् याज्ञवल्क्यादिभ्यो णिनिप्रतिषेध इति तद्विषयता च नेति वचनमेवारब्धम्, इति भाष्यबलेन याज्ञवल्क्यस्याधुनिकोक्तिः न समीचीनेति वदन्ति ।

आश्मरथः । ३५ । अश्मरथ्येन प्रोक्त इत्यर्थे अणि 'आपत्यस्य च तद्धितेऽनाति' इति यलोपे विभक्तिकार्ये आश्मरथः इति सिद्धम् । पुराणप्रोक्तेषु इति सूत्रे पुराणपदाभावे अत्रापि णिनिः स्यात् ।

कालपाः । ५७ । कलापिना प्रोक्तमधीयते इत्यर्थे तृतीयान्तात् कलापिन्-शब्दात् 'कलापिनोऽण्' इति अणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पिकलापिकौथुमि— इत्यादिवार्तिकेन टिलोप एकदेशविकृतन्यायेन प्रातिपदिकत्वात् जसि विभक्तिकार्ये कलापाः इति सिद्धम् ।

पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः । इह मण्डूकप्लुत्या णिनिरित्युनुवर्तते । पाराशर्येण प्रोक्तं भिक्षुसूत्रं भिक्षुत्वसम्पादकं सूत्रमधीयते इत्यर्थे शिलालिना प्रोक्तं नटसूत्रं नटत्वसम्पादकमधीयते इति चार्थे णिनिः भवति इति सूत्रार्थः ।

Sri Vidyabharathi Book Centre, Sringeri

 CC-O. In Public Domain. Digitized by eGangotri

पाराशरिणः । ५१ । पराशरशब्दात् अनन्तरापत्येऽपि गोत्रत्वेनोपचारात् 'गर्गादिभ्यो यञ्' इति यञि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ अल्लोपे विभक्तिकार्ये पाराशर्यः इति सिद्ध्यति । ततः पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयते इति विग्रहे 'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः' इति णिनिप्रत्यये प्रातिपदिकत्वेन सुपो लुकि 'आपत्यस्य च तद्धितेऽनाति' इति यलोपे एकदेशविकृतन्यायेन प्रातिपदिकत्वात् जसि विभक्तिकार्ये पराशरिणः इति सिद्धम् ।

सौदामनी । ३१ । सुदाम्ना अद्रिणा एकदिक् इत्यर्थे तृतीयान्तात् सुदामन्-शब्दात् 'तेनैकदिक्' इति अणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ टिलोपे प्राप्ते 'अन्' इति प्रकृतिभावे 'टिड्ढाणञ्' इत्यनेन अणन्तत्वात् ङीपि विभक्तिकार्ये सौदामनी इति सिद्धम् ।

क्षौद्रम् । ५० । क्षुद्राभिः कृतमित्यर्थे 'क्षुद्राभ्रमरवटरपादपादञ्' इति अञि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ 'यस्येति चे'त्यकारलोपे विभक्तिकार्ये क्षौद्रम् ।

वाटरम् । ३८ । वटरेण कृतमित्यर्थे 'क्षुद्राभ्रमरवटरपादपादञ्' इति अणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ 'यस्येति चे'त्यकारलोपे प्रातिपदिकार्ये वाटरम् इति सिद्धम् ।

सावहित्रम् । ५१ । संवोढुः स्वमित्यर्थे 'वहेस्तुरणिट् च' इति वार्तिकेन संपूर्वात् तृजन्तात् च वहेरणि इटि च कृते आदिवृद्धौ यणि स्वादिकार्ये सांवहित्रम् इति सिद्धम् । न चात्र ढत्वं कुतो नेति वाच्यम्, ढत्वादीनामसिद्धत्वात् अलौकिक-विग्रहवाक्ये पूर्वमिट् ततो निमित्ताभावान्न ढत्वादि इति दिक् ।

सामिधेनी । ४२ । समिदाधीयते अनेनेति विग्रहे षष्ठ्यन्तात् समित्शब्दात् 'समिधामाधाने षेण्यण्' इति वार्तिकेन षेण्यण्प्रत्यये षित्वात् ङीषि 'हलस्तद्धितस्य' इति यलोपे आदिवृद्धौ विभक्तिकार्ये सामिधेनी ऋक् इति सिद्धम् ।

आधिदैविकम् । ५८ । अधिदेवे भवम् इत्यर्थे 'अध्यात्मादेष्ठञिष्यते' इति वार्तिकेन ठञि प्रातिपदिकत्वेन सुपो लुकि ठस्येकादेशे 'अनुशतिकादीनां च' इत्युभयपदवृद्धौ 'यस्येति च' इत्यलोपे विभक्तिकार्ये आधिदैविकम् इति सिद्धम् ।

सैरिकम् । ४८ । सीरस्येदमित्यर्थे 'हलसीराट्ठक्' इति ठकि प्रातिपदिकत्वेन सुपो लुकि ठस्येकादेशे आदिवृद्धौ 'यस्येति चे'ति अल्लोपे विभक्तिकार्ये सैरिकम् इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

काकोलूकिका । ६७ । काकोलूकस्य वैरमित्यर्थे "द्वन्द्वाद्वुन्वैरमैथुनिकयोः' इति वुनि वोरकादेशे "यस्येति" च इत्यलोपे स्त्रीत्वाट्टापि 'प्रत्ययस्थात्-इतीत्वे विभक्त्यादिकार्ये उक्तं रूपं सिद्धम् । वूनि तु स्त्रीत्वं लोकात् ।

देवासुरम् । ५८ । देवासुरयोर्वैरमित्यर्थः । देवासुरयोरिदमित्यर्थे "द्वन्द्वाद् वुन वैरमिथुनिकयोः" इति वुनि प्राप्ते "वैरे देवासुरादिभ्यः प्रतिषेधः" इति वार्तिकेन तन्निषेधे अणि आदिवृद्धौ "यस्येति च" इत्यलोपे विभक्तिकार्ये देवासुरम् इति सिद्धम् ।

काठकम् । ५८ । क०न प्रोक्तमधीयते कठाः तेषां धर्मः आम्नायः (वेदाभ्यासः) वा काठकम् । अत्र "चरणाद्धर्माम्नाययोरिति वक्तव्यम्" इति वुञि ञित्वादादिवृद्धौ वोरकादेशे "यस्येति च" इत्यलोपे विभक्तिकार्ये काठकम् इति ।

गार्गम् । ४३ । गार्ग्यस्येदमित्यर्थे 'सङ्घाङ्कलक्षणेष्वञ्यञिञामण्' इति अणि प्रातिपदिकत्वेन सुपो लुकि 'यस्येति चे'त्यकारलोपे 'आपत्यस्य च तद्धितेऽनाति' इति यलोपे आदिवृद्धौ विभक्तिकार्ये गार्गम् इति सिद्धम् ।

छान्दोग्यम् । ५९ । छन्दोगानां धर्म आम्नायो वा छान्दोग्यम् । अत्र "छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः' इति यञ्प्रत्यये आदिवृद्धौ "यस्येति च" इत्यलोपे विभक्तिकार्ये छान्दोग्यम् इति सिद्धम् ।

नाट्यम् । ५१ । नटानां धर्मः आम्नायो वेत्यर्थे 'छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः' इति ञ्यप्रत्यये आदिवृद्धौ अल्लोपे विभक्तिकार्ये नाट्यम् इति ।

नच 'चरणाद् धर्माम्नाययो' इत्युक्तत्वात् कथं नटशब्दस्यात्र ग्रहणमिति वाच्यम्, छन्दोगादिसाहचर्यात् नटशब्दादपि धर्माम्नाययोरेव, प्रत्ययविधानकल्पनेनादोषात् ।

कौपिञ्जलः । ५८ । कुपिञ्जलस्यापत्यमित्यर्थे 'कौपिञ्जलहास्तिपदादण्' इति सूत्रे कौपिञ्जले इति निर्देशात् 'अत इञ' इति पक्षे इञं प्रबाध्य निपातनादणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ 'यस्येति चे'ति अकारलोपे कौपिञ्जलः इति सिद्धम् । ततः अनेन सूत्रेण अणन्तात् कौपिञ्जस्येदमत्यर्थे पुनरणि आदिवृद्धौ अल्लोपे विभक्तिकार्ये कौपिञ्जल इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

आथर्वणः । ५७ । अथर्वण प्रोक्तो वेदः अथर्वा तमधीते आथर्वणिकः 'वसन्तादिभ्याष्ठक्' इति टक् । आथर्वणिकस्यापत्यमित्यर्थे "आथर्वणिकस्येकलोपश्च इति अणि इको लोपे।चकृते'दाण्डिनायन'–इति टिलोपाभावे विभक्तिकार्ये आथर्वणः इति सिद्धम् ।

आरातीयः । ५८ । अम्भावः "अव्ययात्यप्" इत्यम अम् 'इहक्वतसित्र एभ्य' एवं अव्ययेभ्य त्यप्प्रत्ययो भवतीत्यर्थक 'अमेहक्वत सित्रेभ्य एव' इति वार्तिकेन परिमणितं वार्तिककृता तेन उपरिरिष्टाद् भवः 'औपरिष्टः, इत्यत्र उपरिष्टादित्य व्ययस्य परिगणितेष्वनन्तभर्वावात् न त्यप् किन्तु अणेव । ननु औपरिष्टः इत्यत्र अणि सति 'अव्ययानां म भात्रे टिलोपे इति वार्तिकेन यथा टिलोपो' भवति तथैव आरादित्यव्ययात् छस्य ईयादेशे आरातीयः इत्यत्राऽपि टिलोपः कुतो नेति चेन्न अनित्योऽयं वहिषष्टि लोप विधानात् ।

॥ इति शैषिकप्रकरणम् ॥

अथ प्राग्दीव्यतीयप्रकरणम्

तस्य विकारः । ५३ । विकार इत्यर्थे षष्ठ्यन्तादणादयः प्रत्ययाः भवन्तु इत्यर्थः ।

आश्मः । अश्मनो विकार इत्यर्थे 'तस्य विकारः' इत्यनेनाणि प्रातिपदित्वेन सुपो लुकि आदिवृद्धौ 'अश्मनो विकारे टिलोपो वक्तव्यः' इति अन् भागस्य लोपे एकदेशविकृतन्यायेन प्रातिपदिकत्वात् स्वादिकार्ये आश्मः इति सिद्धम् ।

मार्त्तिकः । ४१ । मृत्तिकया विकार इत्यर्थे षष्ठ्यन्तात् मृत्तिकाशब्दात् 'तस्य विकार' इत्यणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ रपरत्वे अल्लोपे स्वादिकार्ये मार्त्तिकः इति सिद्धम् ।

मायूरः । मयूरस्यावयवो विकारो वेत्यर्थे 'अवयवे च प्राण्योषधिवृक्षेभ्यः' इत्यनेन अवयवे विकारे वार्थे अणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ टिलोपे विभक्तिकार्ये मायूरः इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

बैल्वम् । ५९ । विल्वस्यावयवो विकारो वेत्यर्थे 'विल्वादिभ्योऽण्' इति अणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ टिलोपे स्वादिकार्ये बैल्वम् इति सिद्धम् ।

तैत्तिडीकम् । तित्तिडीकस्य विकारः अवयवो वेत्यर्थे 'कोपधाच्च' इत्यनेनाणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ टिलोपे स्वादिकार्ये तैत्तिडीकमिति सिद्धम् ।

जातुषम् । ५४ । जतुनो विकार इत्यर्थे 'त्रिपुजतुनोः षुक्' इति अणि षुगागमे च कृते प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ टिलोपे विभक्तिकार्ये जातुषम् इति सिद्धम् ।

कापित्थम् । ५८ । कपित्थस्यावयवो विकारो वेत्यर्थे 'अनुदात्तादेश्च' इत्यणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ अल्लोपे विभक्तिकार्ये कापित्थमिति सिद्धम् ।

पालाशम् । पलाशस्य विकार इत्यर्थे 'पलाशादिभ्यो वा' इत्यनेनाणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ टिलोपे विभक्तिकार्ये पालाशम् इति सिद्धम् ।

आश्मनम्, अश्ममयम् । ५३ । अश्मनः विकार इत्यर्थे 'मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः' इति सूत्रेण मयटि प्रातिपदिकत्वेन सुपो लुकि अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वात् 'नलोपः प्रातिपदिकान्तस्ये'ति नलोपे विभक्तिकार्ये अश्ममयम् इति सिद्धम् । पक्षे तस्य विकार इत्यनेनाणि आदिवृद्धौ टिलोपे प्राप्ते 'अन' इत्यनेन प्रकृतिभावे विभक्तिकार्ये आश्मम् इति सिद्धम् । नचात्र विकारेऽर्थे 'अश्मनो विकारे टिलोपो वक्तव्यः'' इत्यनेन विकारे टिलोपः कुतो नेति वाच्यम्, वार्तिके पाषाणवाचकस्य अश्मन्शब्दस्यैव ग्रहणात् । अत्र तु कल्माषाङ्घ्रिनामकस्य राज्ञः पत्न्यां वसिष्ठेन उत्पादितः पुत्र अश्मकः तद्वाचकस्य अश्मन् शब्दस्य ग्रहणमिति टिलोपप्राप्तेरभावात् ।

आप्यम् । ३८ । न च 'एकाचो नित्यं मयटमिति' वार्तिकेन एकाचः त्वच् वच् आदिशब्दात् मयटः विधानेन अप् शब्दस्याप्येकाच्त्वेन नित्यं मयटि अम्मयमित्येव रूपं स्यात् कथं आप्यम् अम्मयम् इति विकल्पेन मयडिति वाच्यम्. आप्यम् इत्यत्र विकारप्रत्ययस्याभावात् । तत्र तु अपामिदमित्यर्थे तस्येदमित्यणि आदिवृद्धौ आपम् इति ततः स्वार्थे 'गुणवचनब्राह्मणादिभ्यः कर्मणि' इति सूत्रेण यञि टिलोपे विभक्तिकार्ये आप्यम् सिद्ध्यतीति दिक् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कथं पैष्टी सुरा । न च यदा पिष्टस्य विकार इत्यर्थे 'पिष्टाच्च' इत्यनेन मयटि पिष्टमयम् इति सिद्धयति तदा ङीपि पिष्टमयी इति वक्तुं शक्यम् कथं पैष्टी इति वाच्यम्, पिष्टस्येदमिति सामान्यविवक्षायाम् 'तस्येदमि' त्यणि आदिवृद्धौ टिलोपे अणन्तत्वात् 'टिड्ढेति' ङीपि प्रातिपदिककार्ये पैष्टी इति सिद्धम् ।

ऐन्द्रायुधम् । ५५ । इन्द्रायुधस्य विकार इत्यर्थे 'तालादिभ्योऽण्' इति सूत्रेण 'अनुदात्तादेश्च इति प्राप्तमञं प्रबाध्य अणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ 'यस्येति चेति' टिलोपे विभक्तिकार्ये ऐन्द्रायुधमिति सिद्धम् ।

सौवर्णः । ३६ । सुवर्णस्य विकार इत्यर्थे 'अनुदात्तादेश्च' इति प्राप्तं अञं प्रबाध्य 'जातरूपेभ्यः परिमाणे' इति अणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ यस्येति चेत्यकारलोपे विभक्तिकार्ये सौवर्णः इति सिद्धम् ।

जातरूपेभ्यः परिमाणे । नचात्र सूत्रे जातरूपेभ्यः इति बहुवचनं किमर्थम् इति वाच्यम् पर्यायग्रहणार्थं बहुवचनस्य सार्थक्यात् । तेन हाटकः सौवर्णः इत्यादयोऽपि सिद्ध्यन्ति इति दिक् ।

शौकम् । १४ । शुकस्यावयवो विकारो वेत्यर्थे 'प्राणिरजतादिभ्योऽञ्' इति अञि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ यस्येति चेत्यकारलोपे विभक्तिकार्ये शौकमिति सिद्धम् ।

बाकम् । ३७ । बकस्यावयवो विकारो वेत्यर्थे 'प्राणिरजतादिभ्योञ् इति अञि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ यस्येति चेति अकारलोपे विभक्तिकार्ये बाकम् इति सिद्धम् ।

राजतम् । ४० । रजतस्य विकारोऽवयवो वेत्यर्थे 'प्राणिरजतादिभ्योञ्' इति अञि प्रातिपादिकत्वेन सुपो लुकि आदिवृद्धौ यस्येति चेति अकारलोपे विभक्तिकार्ये राजतम् इति सिद्धम् ।

१० ञितश्च तत्प्रत्ययात्—(ई० ५९) तयोः विकारावयवयोः प्रत्ययः तत्प्रत्ययः तस्मात् तत्प्रत्ययात् । ञितो विकारावयव प्रत्ययः तदन्तादञ् स्याद् विकारावयवयोरेवेत्यर्थः । मयटोऽपवादः । शामोलम, दाधित्थम्, कापित्थम् इत्याद्युदाहरणानि ।

शामीलम् । शम्याः विकारः अवयवो वा शमीलम्, शम्या ष्लञ् । शामोलस्य विकारोऽवयवो वेत्यर्थे अञि "यस्येति च" इत्यलोपे पर्जन्यवल्लक्षणया आदिवृद्धौ

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

विभक्तिकार्ये 'शामीलम्' इति । एवं दधित्थस्य विकारोऽवयवो वा दधित्थस्य 'अनुदात्तादित्वादञ्' कापित्थम् इति ।

क्रीतवत्परिमाणात् । ४८ । प्राग्वहतेष्ठक् इत्यारभ्य क्रीतार्थे ये प्रत्यया येनोपाधिना परिमाणाद् विहितास्ते तथैव विकारेऽतिदिश्यन्ते इति सूत्रार्थः, अणादीनामपवादः । तेन क्रीतार्थे 'असमासे निष्कादिभ्यः' इत्यनेन विहितस्य ठनः निष्केण क्रीतमितिवत् निष्कस्य विकारः नैष्किकः इत्यत्रापि प्रवृत्तिर्भवति । न च परिमाणन्तु सर्वतः इति नियमेन आरोहणपरिणाहाभ्यां येन मीयते तस्यार्थस्य परिमाणशब्देन प्रतिपादनात् कथं शत्यः शतिक इत्यत्रानेन विकारेऽर्थे अपरिमाणे उन्यतोः प्रवृत्तिरिति वाच्यम्, अत्र परिमाणशब्देन संख्याया अपि ग्रहणेनादोषात् । अत्र मानं च 'वाहीदगोपुच्छ'—इति सूत्रे संख्याया वक्तव्यमिति भाष्यमेव ।

शत्यः, शतिकः । ४२ । शतस्य विकार इत्यर्थे 'क्रीतवत् परिमाणात्' सूत्रसहकारेण 'शताच्च ठन्यतो' इत्यनेन विकारेऽर्थे ठनि पक्षे यति च कृते प्रातिपदिकत्वे सुपो लुकि यस्येति चेत्यकारलोपे विभक्तकार्ये शत्यः । पक्षे ठनि ठस्येकादेशे टिलोपे विभक्तिकार्ये शतिकः इति सिद्धम् ।

नच संख्यायाः परिमाणवाचकत्वाभावे कथं शत-शब्दात् विकारे प्रत्यय इति, वाच्यम्, अमुसूत्रे परिमाणपदेन परिच्छेदकमात्रस्य ग्रहणम् 'आर्हात्' इति सूत्रस्थभाष्यबलेन ज्ञापितत्वात् ।

ऐणेयम् । ३९ । एण्या अवयवो विकारो वेत्यर्थे 'एण्या ढञ्' इति ढञि प्रातिपदिकत्वे सुपो लुकि आदिवृद्धौ ढस्यैयादेशे यस्येति चेति ईकारलोपे विभक्तकार्ये ऐणेयम् इति सिद्धम् ।

द्रव्यम् । द्रोः विकारोऽवयवो वेत्यनेन यत् प्रत्यये प्रातिपादिकत्वेन सुपो लुकि ओर्गुणे 'वान्तो यि प्रत्यये' इति अवादेशे विभक्तिकार्ये द्रव्यम् इति सिद्धम् । द्रुवृक्षः तस्य विकारः द्रव्यम् इत्यर्थः ।

द्रुवयम् । द्रोः विकारोऽवयवो वेत्यर्थे 'माने' इत्यनेन वय प्रत्यये प्रातिपदिकत्वेन सुपो लुकि प्रातिपदिकार्ये द्रुवयम् इति सिद्धम् । द्रुवयमिति मानार्थकम् ।

आमलकम् । ५३ । आमलक्या विकारोऽवयवो वेत्यर्थे 'नित्यं वृद्धशरादिभ्य'

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

इति मयटि 'फले लुक्' इति-लुकि 'लुक्तद्धितलुकि' इति ङीषो लुकि सरोमादेशे आमलकम् इति सिद्धम् ।

नैयग्रोधम् । ४७ । न्यग्रोधस्य विकारोऽवयवो वेत्यर्थे तस्य विकार इत्यनेन अणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ प्राप्तायां न्यग्रोधस्य इति तन्निषेधेन ऐजागमविधाने च कृते प्रातिपदिककार्ये नैयग्रोधम् इति सिद्धम् ।

जाम्बवम् । ५६ । जम्ब्वाः विकारोऽवयवो वेत्यर्थे 'जम्ब्वा वा' इति विकल्पेनाणि आदिवृद्धौ गुणेऽवादेशे यस्येति चेति अकारलोपे विभक्तिकार्ये जाम्बवम् इति सिद्धम् । जम्ब्वाः फलमित्यर्थः ।

जम्बु । ५६ । जम्ब्वा विकार इत्यर्थे पक्षे 'ओरञ्' इति अञि प्रातिपदिकत्वेन सुपो लुकि 'फले लुक्' इति अञो लुकि नपुंसकह्रस्वत्वे प्रातिपदिककार्ये जम्बु इति सिद्धम् ।

जम्बुः । ५९ । जम्ब्वा विकार इत्यर्थे जम्ब्वा इत्यस्य विकल्पत्वेन 'ओरञ्' इति अञि प्रातिपदिकत्वेन सुपो लुकि तस्य 'लुप् च' इति लुपि 'लुपि युक्तवद्व्यक्तिवचने' इति युक्तवद्भावेन विशेष्यलिङ्गवचने प्रबाध्य स्त्रीत्वे एकवचने च जाते ऊङि जम्बूः इति सिद्धम् ।

व्रीहयः । ५६ । व्रीहीणां विकारोऽवयवो वेत्यर्थं 'तस्य विकार' इत्यणि 'फलपाकशुषामुपसंख्यानम्' इति तस्य लोपे 'लुपि युक्तवद्व्यक्तिवचने' इति युक्तवद्भावेन पुंस्त्वे विभक्तिकार्ये प्रथमाबहुवचने व्रीहय इति सिद्धम् ।

मुद्गाः । ५५ । मुद्गानां विकारोऽवयवो वेत्यर्थे 'बिल्वादिभ्योऽण्' इत्यणि प्रातिपदिकत्वेन सुपो लुकि 'फलपाकशुषामुपसंख्यानम्' इति अणो लुकि 'लुपि युक्तवद्व्यक्तिवचने' इति युक्तवद्भावेन पुंस्त्वे एकदेशविकृतन्यायेन सूत्रप्रवृत्तौ प्रथमाबहुवचने जसि विभक्तिकार्ये मुद्गाः इति सिद्धम् ।

पाटलानि पुष्पाणि । पाटलायाः विकारोऽवयवो वा पुष्पमित्यर्थे बिल्वादिभ्योऽणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ टिलोपे 'पुष्पमूलेषु बहुलम्' इति बहुलग्रहणात् विकारप्रत्ययस्य लोपाभावे प्रथमाबहुवचने जसि विभक्तिकार्ये पाटलानि पुष्पाणि इति सिद्धम् ।

कंसीयम्, कांस्यम् । ५८ । कंसाय हितमित्यर्थे छप्रत्यये तस्य ईआदेशे कंसीयम्, तस्य विकार इत्यर्थे कंसीयपरशव्ययोर्यञञौ लुक् च' इति यञ्प्रत्यये

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri
ठस्य लुकि च कृते प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ यस्येति चेत्यकारलोपे विभक्तिकार्ये कांस्यम् इति सिद्धम् ।

इति प्राग्दीव्यतीयप्रकरणम्

अथ प्राग्वहतीयप्रकरणम्

माशब्दिकः । माशब्दं कार्षीः इति य आह स इत्यर्थे माशब्द इत्यस्मात् निर्विभक्तिकात् 'तदाहेति माशब्दादिभ्य उपसंख्यानम्' इति वार्तिकेन ठकि ठस्येकादेशे आदिवृद्धौ टिलोपे विभक्तिकार्ये माशब्दिक इति सिद्धम् ।

स्वागतिकः । स्वागतमित्याह इत्यर्थे स्वागतशब्दात् 'तदाहेति माशब्दादिभ्य उपसंख्यानम्' इति ठकि ठस्येकादेशे वृद्धिं प्रबाध्य 'नय्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्' इति ऐजागमे प्राप्ते 'स्वागतादीनां च' इति निषधे आदिवृद्धौ टिलोपे विभक्तिकार्ये स्वागतिकः इति सिद्धम् ।

व्याडिः । ५६ । व्यडस्यापत्यं पुमान् इत्यर्थे 'अत इञ्' इति इञि प्रत्यये आदिवृद्धौ टिलोपे विभक्तिकार्ये व्याडिः इति सिद्धम् । नचात्र 'नय्वाभ्यामि' त्यादिना ऐज् कुतो नेति वाच्यम्, स्वागतादीनामिति निषेधात् ।

प्राभृतिकः । ४१ । प्रभृतमाहेत्यर्थे 'आहौ प्रभूतादिभ्यः' इति ठकि ठस्येकादेशे आदिवृद्धौ टिलोपे विभक्तिकार्ये प्राभृतिकः इति सिद्धम् ।

सौखशायनिकः । ४५ । सुखशयनं पृच्छतीत्यर्थे 'पृच्छतौ सुस्नातादिभ्यः' इति वार्तिकेन ठकि ठस्येकादेशे आदिवृद्धिं प्रबाध्य 'अनुशतिकादीनां च' इत्युभयपदवृद्धौ टिलोपे विभक्तिकार्ये सौखशायनिक इति सिद्धम् ।

पारदारिकः । परदारान् गच्छतीत्यर्थे 'गच्छतौ परदारादिभ्यः' इति ठकि आदिवृद्धौ ठस्येकादेशे टिलोपे विभक्तिकार्ये पारदारिक इति सिद्धम् ।

आक्षिकम् । ४० । अक्षैर्जितमिति विग्रहे 'तेन दीव्यति खनति जयति जितम्' इति ठकि आदिवृद्धौ ठस्येकादेशे यस्येति चेत्यकारलोपे विभक्तिकार्ये आक्षिकमिति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

मारीचिकम् । मरीचिभिः संस्कृतमित्यर्थे 'संस्कृतम्' इत्यनेन ठकि आदिवृद्धौ ठस्येकादेशे प्रातिपदिकत्वेन सुपो लुकि टिलोपे विभक्तिकार्ये मारीचिकम् इति सिद्धम् ।

दाधिकम् । दध्ना संस्कृतमित्यर्थे 'संस्कृतमि'त्यनेन ठकि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ ठस्येकादेशे टिलोपे विभक्तिकार्ये दाधिकमिति सिद्धम् ।

आकर्षिकः, आकर्षिकी । आकर्षः निकषोपलः । आकर्षेण चरति इत्यर्थे 'आकर्षात् ष्ठल् इति ष्ठल्' प्रत्यये अनुबन्धलोपे टिलोपे ठस्येकादेशे विभक्तिकार्ये आकर्षिकः । षित्वात् 'षिद्गौरादिभ्यश्चे'ति ङीषि आकर्षिकी इति च सिद्ध्यति । आकषात् इति पाठान्तरम् । तस्मिन् पक्षे आकषिकः आकषिकी इति रूपम् । अर्थस्तु निकषोपल एव । अयं पाठः 'आकर्षात्पर्पादेः' इति कारिकापाठात् अननुगुणः, तेन न प्रामाणिकः । केवलं माधवेन कषधातुः उपन्यस्तः ।

श्वगणिकः । ५८ । श्वगणेन चरति इत्यर्थे 'श्वगणाट्ठञ् च' इति चकारात् ष्ठनि प्रादिपदिकत्वेन सुपो लुकि ठस्येकादेशे यस्येति चेति अकारलोपे श्वगणिकः षित्वात् ङीषि श्वगणिकी । पक्षे ठञ् आदिवृद्धौ श्वागणिको इति सिद्ध्यति ।

नचात्र 'द्वारादीनां च' इत्यनेन ऐजागमः कुतो नेति वाच्यम्, 'श्वादेरिञि' इति सूत्रस्थेन 'इकारादाविति वाच्यम्' इति वार्तिकेन तन्निषेधात् ।

शौवापदम्, श्वापदम् । ४७ । श्वापदस्य इदमित्यर्थे तस्येदमिति अणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ प्राप्तायां 'पदान्तस्यान्यतरस्याम्' इति विकल्पेनैजागमे यस्येति चेति अकारलोपे विभक्तिकार्ये शौवापदम् । पक्षे आदिवृद्धौ श्वापदमिति ।

धानुष्कः । ५७ । धनुषा जीवतीत्यर्थे 'वेतनादिभ्यो जीवति' इति ठञि प्रातिपदिकत्वेन सुपो लुकि 'इसुसुक्तान्तात् कः' इति ठस्येकादेशे आदिवृद्धौ इणः षः इति षत्वे विभक्तिकार्ये धानुष्कः इति सिद्धम् ।

वीवधिकः । ५७ । वीवधेन हरति इत्यर्थे 'विभाषा विवधात्' इति सूत्रसहकारेण 'वीवधाच्चेति वक्तव्यमि'ति वार्तिकेन एकदेशविकृतन्यायेन वा वीवधशब्दात् तृतीयान्तात् ष्ठनि प्रातिपदिकत्वेन सुपो लुकि ठस्येकादेशे टिलोपे वीवधिकः, षित्वात् ङीषि वीवधिकी इति सिद्ध्यति । विवधवीवधशब्दौ उभतोः बद्धशिक्ये

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

स्कन्धवाह्यं काष्ठे वर्तते। लोके 'वहंगा' इति। हिन्दीभाषायाम् 'कहार' येन वंशदण्डेन भारं वहन्ति तत् काष्ठं वीवधः' इति भावः।

वीवधिकी। ५५। वीवधेन हरतीत्यर्थे 'विभाषा विवधात्' इति विकल्पपक्षे 'प्राग्वहतेष्ठक्' इति ठकि ठस्य इकादेशे 'यस्येति च' इत्यकारलोपे स्त्रीत्वविवक्षायां 'टिड्ढाणञ्'—इति ङीपि विभक्तिकार्ये उक्तं रूपं सिद्धम्।

कौटिलिकः। ४४। कुटिलकया हरति व्याधान् अङ्गारान् वेत्यर्थे 'अण् कुटिलिकायाः, इत्यणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ यस्येति चेति अकार-लोपे विभक्तिकार्ये कौटिलिक इति सिद्धम्। स च व्याधः कमारश्च। कुटिलिका व्याधानां गतिविशेषः. कर्मारोपकरणभूतं अङ्गारगहणसमर्थं लौहनिर्मितं साधनम्।

कृत्रिमम्। ५८। कृत्या निर्वृत्तम् 'इत्यर्थे क्त्रेर्मम् नित्यम्' इति मप्प्रत्यये प्रातिपदिकत्वेन सुपो लुकि विभक्तिकार्ये कृत्रिमम् इति सिद्धम्।

औजसिकः। ४७। ओजसा वर्तते इत्यर्थे 'ओजः सहोम्भसा वर्तते' इति ठकि प्रातिपदिकत्वेन सुपो लुकि ठस्येकादेशे यस्येति चेत्यकारलोपे विभक्तिकार्ये औजसिकः इति सिद्धम्।

आनुलोमिकः। ५४। अनुलोमं वर्तते इत्यर्थे द्वितीयान्तात् अनुलोमशब्दात् 'तत्प्रत्यनुपूर्वमीपलोमकूलम्' इति ठकि प्रातिपदिकत्वेन सुपो लुकि ठस्येकादेशे आदिवृद्धौ यस्येति चेत्याकारलोपे विभक्तिकार्ये आनुलोमिकः इति सिद्धम्।

प्रातिकूलिकः। ४१। प्रतिकूलं वर्तते इत्यर्थे 'तत्प्रत्यनुपूर्वमीपलोमकूलम्' इति ठकि प्रातिपदिकत्वेन सुपो लुकि ठस्येकादेशे आदिवृद्धौ यस्येति चेति अकार-लोपे विभक्तिकार्ये प्रातिकूलिकः इति सिद्धम्।

आनुकूलिकः। ५६। अनुकूलं वर्तते इत्यर्थे 'तत्प्रत्यनुपूर्वमीपलोमकूलम्' इति ठकि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ टिलोपे विभक्तिकार्ये आनुकूलिकः इति सिद्धम्।

पारिपार्श्विकः। पारिपार्श्वं वर्तते इत्यर्थे 'परिमुखं च,' इति चकारेण पार्श्व-शब्दस्य ग्रहणेन ठकि प्रातिपदिकत्वेन सुपो लुकि ठस्येकादेशे आदिवृद्धौ टिलोपे विभक्तिकार्ये पारिपार्श्विक इति सिद्धम्।

वार्धुषिकः। ५६। वृद्धिं प्रयच्छति इत्यर्थे 'प्रयच्छति गर्ह्यम्' इति ठकि

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

'वृद्धेर्वृ धुषिभावो वक्तव्यः' इति वार्तिकेन वृधुषिभावे आदिवृद्धौ रपरत्वे ठस्येकादेशे यस्येति चेति ईकारलोपे विभक्तिकार्ये वार्धु षिकः इति सिद्धम् ।

दशैकादशिकी । ५८ । एकादशग्रहणं तु दश प्रयच्छतीत्यर्थे 'कुसीददशैकादशात् ष्ठन्ष्ठचौ' इति ष्ठन् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि ठस्येकादेशे अल्लोपे विभक्तिकार्ये दशैकादशिकः, नारी चेत् षित्वात् ङीषि दशैकादशिकी इति च सिद्ध्यति ।

न च एकादश च ते च ते दश चेति विग्रहे समासे संख्यायाः अल्पीयस्याः इति दशशब्दस्य पूर्वनिपाते टच् कुत इति वाच्यम् । इहैव सूत्रे तादृशप्रयोगदर्शनेन समासान्तटचो निपातनेनादोषात्, न च संख्यायां तत्पुरुषस्य (डज्) वाच्यः इत्यनेन डच् कुतो नेति वाच्यम् अस्य वार्तिकस्य अव्ययपूर्वपदकत्वे एव प्रवृत्तेः । उत्तमर्ण एव तद्धितार्थः ।

सामाजिकः । ४० । समाजं रक्षतीत्यर्थे द्वितीयान्तात् 'रक्षति' इत्यनेन ठकि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ ठस्येकादेशे यस्येति चेति अकारलोपे विभक्तिकार्ये सामाजिक इति सिद्धम् ।

शाब्दिकः । शब्दं करोति इत्यर्थ 'शब्ददर्दुरं करोति' इति ठकि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ ठस्येकादेशे अल्लोपे विभक्तिकार्ये शाब्दिकः इति सिद्धम् ।

मैनिकः । ५७ । ५७ । मीनं हन्तीत्यर्थे 'पक्षिमत्स्यमृगान् हन्ति' इति सूत्रे स्वरूपस्य पर्यायाणां विशेषाणां च ग्रहणम्' इति वार्तिकबलेन मत्स्यपर्यायात् अपि ठकः प्राप्तौ मत्स्यपर्यायेषु मीनस्यैवेति नियमेन मीनशब्दादेव ठकि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ ठस्येकादेशे यस्येति चेत्यकारलोपे विभक्तिकार्ये मैनिकः इति सिद्धम् ।

मार्गिकः । ५७ । मृगान् हन्तीत्यर्थे 'पक्षिमत्स्यमृगान् हन्ति' इत्यनेन ठकि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ रपरत्वे ठस्येकादेशे यस्येति चेत्यकारलोपे विभक्तिकार्ये मार्गिकः इति सिद्धम् ।

पारिपन्थिकः । परिपन्थं तिष्ठति हन्ति इत्यर्थे 'परिपन्थं च तिष्ठति' इति ठकि प्रातिपदिकत्वेन सुपो लुकि [illegible] आदिवृद्धौ ठस्येकादेशे यस्येति चेति अकारलोपे विभक्तिकार्ये पारिपन्थिकः इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

'संज्ञायां ललाटकुक्कुटौ पश्यति' इत्यनेन
लालाटिकः । ललाटं पश्यति इत्यर्थे
ठकि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ टिलोपे प्रातिपदिककार्ये लालाटिक
इति सिद्धम् ।

यात्रम् । ३८ । यातुर्धर्म्यम् इत्यर्थे 'ऋतोऽञ्' इति अञ् प्रत्यये प्रातिपदिकत्वेन
सुपो लुकि आदिवृद्धौ यणि विभक्तिकार्ये यात्रम् इति सिद्धम् ।

वंशस्त्रम् । ५५ । विशसितुर्धर्म्यम् इत्यर्थे विशसितु रिड्लोपश्चाण् च वक्तव्यः'
इति वार्तिकेन अङि इटः लोपे च प्रातिपदिकत्वेन सुपो लुकि ऋकारस्य यणि
आदिवृद्धौ विभक्तिकार्ये वैशस्त्रमिति सिद्धम् ।

'विभाजयितुर्णिलोपश्चाञ्च
वैभाजित्रम् । ५८ । विभाजयितुर्धर्म्यम् इत्यर्थे
वक्तव्यः' इति वार्तिकेन अञि णिलोपे च कृते प्रातिपदिकत्वेन सुपोलुकि यणि
आदिवृद्धौ विभक्तिकार्ये वैभाजित्रम् इति सिद्धम् ।

लावणिकः । लवनं पण्यमस्येत्यर्थे 'लवणाट्ठञ्' इति ठञि प्रातिपदिकत्वेन
सुपो लुकि ठस्येकादेशे आदिवृद्धौ अल्लोपे विभक्तिकार्ये लावणिकः इति सिद्ध ।

शलालुकः । ४० । शलालु पण्यमस्येत्यर्थे 'शलालुनोऽन्यतरस्याम्' इति ष्ठनि
प्रातिपदिकत्वेन सुपो लुकि 'इसुसुक्तान्तात् कः' इति ठस्य कादेशे विभक्तिकार्ये
शलालुकः इति । षित्वान् ङीषि शलालुकी इति । पक्षे ठकि शालालुकः शालालुकी
इति च सिद्धम् ।

धानुष्कः । ४३ । धनुः प्रहरणमस्य इत्यर्थे 'तदस्य प्रहरणम्' इति ठकि प्राति-
पदिकत्वेन सुपो लुकि आदिवृद्धौ 'इसुसुक्तान्तात् कः' इति ठस्य कादेशे 'इणः
षः' इति षत्वे विभक्तिकार्ये धानुष्कः इति सिद्धम् ।

शाक्तीकः । शक्तिः प्रहरणमस्येत्यर्थे 'शक्तियष्टयोरीकक्' इति ईकक्
प्रत्यये प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ टिलोपे विभक्तिकार्ये शाक्तीकः
इति सिद्धम् ।

आस्तिकः । ३६ । अस्ति परलोकः इत्येव मतिर्यस्येत्यर्थे "अस्ति नास्ति
दिष्टं मतिः' इति ठकि आदिवृद्धौ ठस्येकारलोपे विभक्तिकार्ये आस्तिकः इति
सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

दैष्टिकः । ५४ । दिष्टमिति मतिर्यस्येत्यर्थे 'अस्ति नास्ति दिष्टं मतिः' इति

CC-O. In Public Domain. Digitized by eGangotri

ठकि प्रातिपादिकत्वेन सुपो लुकि आदिवृद्धौ ठस्येति चेत्यकारलोपे प्रातिपदिककार्ये दैष्टिकः इति सिद्धम् ।

छात्रः । गुरोर्दोषाणामावरणम् छत्रम् तच्छीलमस्य इत्यर्थे 'छात्रादिभ्यो णः' इति णप्रत्यये प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ विभक्तिकार्ये छात्रः इति सिद्धम् ।

कार्मस्ताच्छील्ये । ७ । कर्मन्शब्दात् ताच्छील्येऽर्थे णे परतः टिलोपो निपात्यते इति सूत्रार्थः । तेन कार्मः इति सिद्धयति । नच नस्तद्धिते इत्यनेव टिलोपविधानेन रूपसिद्धे इदं सूत्रं व्यर्थमिति वाच्यम्, अन् इति प्रकृतिभावेन टिलोपासिद्धेः । नच अणि एव अन् इत्यस्य प्रवृत्तौ कथं निषेध इति वाच्यम्, अण् कार्यं ताच्छीलके णेऽपि' इति कल्पनेन प्रकृतिभावप्राप्तौ सूत्रविधानस्यावश्यकत्वात् । तेन चुरा शीलमस्येत्यर्थे छात्रादित्वात् णप्रत्ययेऽपि अण्कार्ये टिड्ढेति भवति । तेन चौरी इति सिद्धयति ।

कार्मः । कर्मशीलः इत्यर्थे 'छत्रादिभ्योः णः' इति णे आदिवृद्धौ नस्तद्धिते इति टिलोपे प्राप्ते 'अण् कार्यं ताच्छीलके णेऽपीति' ज्ञापनेन अन् इति प्रकृतिभावे 'कार्मस्ताच्छील्ये' इति टिलोपनिपातनेन कार्म इति सिद्धम् ।

चौरी—(ई० ५९) चुरा शीलमस्याः इति विग्रहे छत्रादिभ्यो इति ण प्रत्यये आदिवृद्धौ यस्येति च इत्यलोपे अणि सति यत्कार्यं तत्ताच्छील्ये णेऽपि भवति इति वचनात् ङीपि विभक्ति इति वचने प्रमाण तु कार्मस्ता-च्छील्ये इति सूत्रस्याऽतत्र हिशीलार्थेऽन् प्रत्यये प्रवृत्तौ प्रकृतिभावविधाय 'अत्' इति सूत्रस्याऽप्रवृत्तौ 'नस्तद्धिते' इत्यमेन् टि लोपे सिद्धेऽलोप निपातार्थं कार्म-स्ताच्छील्य इति सूत्रं व्यर्थं सत् ज्ञापयति-अणि सतीति ।

कर्माध्ययने वृत्तम् । ५९ । तदस्येत्यनुवर्तते । ततश्च प्रथमान्तात् षष्ठ्यर्थे ठक् स्यात् यदि अध्ययनविषये वृत्ता या क्रिया सा चेत् प्रथमान्तार्थः । एकमन्य-वृत्तमस्य इति ऐकान्यिकः इति उदाहरणम् ।

ऐकान्यिकः । ४५ । एकमन्यद्वृत्तमस्येत्यर्थे 'तद्धितार्थोत्तरपदे समाहारे च' इति समासे कर्माध्ययने वृत्तमिति ठकि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ ठस्येकादेशे यस्येति चेत्यकारलोपे विभक्तिकार्ये ऐकान्यिक इति सिद्धम् ।

सांस्थानिकः । ५१ । संस्थाने व्यवहरति इत्यर्थे क्रौञ्चान्तप्रस्तारसंस्थानेषु

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

व्यवहरति' इति ठकि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ ठस्येकादेशे यस्येति चेत्यकारलोपे त्रिभक्तिकार्ये सांस्थानिकः इति सिद्धम् ।

आकर्षात् । ५९ । आवसथात् ष्ठल् इति सूत्रे षित्प्रत्ययबोधनाय इदं श्लोकवार्तिकम् —

आकर्षात् पर्पादेर्भस्त्रादिभ्यः कुसीदसूत्राच्च ।
आवसथात् किसरादेः षितः षडेते ठगधिकारे ॥

अयं भावः—अत्र ठगधिकारे एते षट् प्रत्ययाः षितः । यथा—आकर्षात् ष्ठल् पर्पादिभ्यः ष्ठन्, भस्त्रादिभ्यः ष्ठन्, आवसथात् ष्ठल्, किसरादिभ्यः ष्ठन्, इति षट् सूत्रैः विहिताः षट्प्रत्ययाः षितः इति वार्तिकार्थः । तेन प्राग्वहतेष्ठक्, नौद्व्यच-ष्ठन् एते न षितः इति दिक् ।

इति प्राग्वहतीय ठगधिकारप्रकरणम् ।

—: ० :—

अथ प्राग्घितीयप्रकरणम्

धुर्यः, धौरेयः । धुरं वहतीत्यर्थे द्वितीयान्तात् धुर 'शब्दाद् धुरो यड्ढकौ' इति ढकि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ ढस्य एयादेशे विभक्तिकार्ये धौरेयः इति सिद्धम् । पक्षे यत् प्रत्यये हलि चेति दीर्घे प्राप्ते 'न भकुर्छुराम्' इति दीर्घनिषेधे धुर्यः इति सिद्धम् ।

पद्याः । ४२ । पादौ बिध्यन्ति इत्यर्थे 'विद्ध्यधनुषा' इति यत् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि 'पद्यत्यदर्थे' इति पद्भावे विभक्ति कार्ये पद्याः इति सिद्धम् । शर्करा इत्यर्थः ।

धेनुष्या । ५३ । धेनुरेव इत्यर्थे 'संज्ञायां धेनुष्या इति धेनुशब्दस्य षुगागमे यत् प्रत्यये च संज्ञायाम् निपातिते टापि धेनुष्या इति सिद्धम् । अधमर्णेन उत्तमर्णाय या धेनुर्दोहनाय दीयते सा बन्धके स्थिता धेनुः धेनुष्या भवति ।

नौवयोधर्म विष० । ३ । नौ-वयो-धर्म-विष-मूल-मूल-सीतातुलाभ्यस्तार्व-प्राप्य-वध्यानाम्य-सम-समितसंमितेषु' इति समग्रं सूत्रम् । तत्र नौवयो आदिशब्देभ्यः तार्यादिष्वर्थेषु क्रमेण यत् प्रत्ययो भवति इति सूत्रार्थः । उदाहरणानि—

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

नावा तार्यम्-नाव्यम् नौशब्दात् यद् प्रत्यये 'वान्तो यि प्रत्यये' इति वान्तादेशे नाव्यम् इति । एवं वयसा तुल्यो वयस्यः । धर्मेण प्राप्यम् धर्म्यम् । विषेण वध्यो विष्यः । मूलेन आनाम्यम् मूल्यम् । मूलेन समः मूल्यः । सीतया संमितं सीत्यम् । तुलया संमितं तुल्यम् ।

मूल्यम् । ४० मूलेनानाम्यम् इत्यर्थे नौवयोधर्म इत्यादिना यत् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि यस्येति चेत्यकारलोपे विभक्तिकार्ये मूल्यम् इति सिद्धम् ।

सीत्यम् । ३६ । सीतया समितमित्यर्थे 'नौवयोधर्म—' इति यत् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि यस्येति चेत्यकरलोपे सीत्यम् इति सिद्धम् ।

पथ्यम् । ४७ । पथः अनपेतमित्यर्थे 'धर्मपथ्यर्थन्यायादनपेते' इति पञ्चम्यन्तात् यत् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि भत्वात् टिलोपे विभक्तिकार्ये पथ्यम् इति सिद्धम् ।

हृद्यः । ५५ । हृदयस्य प्रिय इत्यर्थे 'हृदयस्य प्रिय' इत्यनेन यत् प्रातिपदिकत्वेन सुपो लुकि 'हृदयस्य हृल्लेख्—' इति हृदयस्य हृदादेशे विभक्तिकार्ये हृद्यः इति सिद्धम् ।

सामन्यः । ५३ । सामसु साधुः' इत्यर्थे 'तत्र साधुः' इति यत प्रत्यये प्रातिपदिकत्वेन सुपो लुकि विभक्तिकार्ये सामन्यः इति सिधद्म् । अत्र साधुः इत्यस्य प्रवीणः, कुशलो वार्थः, नतु हितमिति तस्मै हितमिति वक्ष्यमाणत्वात् ।

शरण्यः । ४६ । शरणे साधुरित्यर्थे 'तत्र साधुः' इति यत् प्रत्यये प्रातिपदिकत्वेत सुपो लुकि यस्येति चेत्यकारलोपे विभक्तिकार्ये शरण्यः इति साधुः ।

साक्तुकः । ४४ । सक्तुषु साधुरित्यर्थे 'गुडादिभ्यष्ठञ्' इति ठञ् प्रत्यये प्रातिपकित्वात् सुपो लुकि आदिवृद्धौ ठस्येकादेशे विभक्तिकार्ये साक्तुकः इति सिद्धम् । यवाः इति शेषः ।

पाथेयम् । ४७ । पथि साधुरित्यर्थे 'पथ्यतिथिवसतिस्वपतेर्ढञ्' इति ढञि प्रातिपदकत्वेन सुपो लुकि आदिवृद्धौ टिलोपे ठस्येयादेशे विभक्तिकार्ये पाथेयन् इति सिद्धम् ।

अतिथेयम् (५९) अतिथिषु साधु रित्यर्थे' पथ्यतिथिवसतिस्वपतेर्ढञ्' इति ढञि ढस्येयादेशे आदिवृद्धौ 'यस्येति च' इतीलोपे विभक्तिकार्ये आतिथेयम् इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सभ्यः । ४३ । सभायां साधुरित्यर्थे 'सभाया यः' इतिय प्रत्यये प्रातिपदिकत्वेन सुपो लुकि टिलोपे विभक्तिकार्ये सभ्यः इति सिद्धम् ।

सतीर्थ्यः (५८) वसतीति वासी, समाने तीर्थे गुरौ वसतीति विग्रहे 'समानतीर्थेवासी' इति समान शब्दात् यति 'तीर्थये' इति समानस्य समावे 'यस्येति च' इति अ लोपे विभक्तिकार्ये सतीर्थ्यः इति सिद्धम् ।

इति प्राग्घितीयप्रकरणम् ।

अथ छ-यद्विधिप्रकरणम्

नभ्यम् । नाभये हितमित्यर्थे 'उगवादिभ्यो यत्' इति यत् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि 'नाभि नभं च' इति नाभेर्नभादेशे यस्येति चेत्यकारलोपे विभक्तिकार्ये नभ्यम् इति सिद्धम् । रथस्य नाभिप्रदेशे तैलदानं हितं भवति । अञ्जनम् तैलसेकः ।

शून्यम् । ५३ । शुने हितमित्यर्थे 'उगवादिभ्यो यत्' इति यत्प्रत्यये प्रातिपदिकत्वेन सुपो लुकि 'शुनः सम्प्रसारणं वा च दीर्घत्वम्' इति सम्प्रसारणे पूर्वरूपे विकल्पेन दीर्घे च कृते विभक्तिकार्ये शुन्यम् शून्यम् इति च सिद्धम् ।

विभाषा हविरपूपादिभ्यः । ३६ । हविर्विशेषवाचिभ्योऽपूपादिभ्यश्च प्राक्क्रीतीयेष्वर्थेषु यत् वा स्यात् इति सूत्रार्थः । हविशब्दात् गवादिगणे पाठेन नित्यं यत्, हविर्विशेषवाचकेभ्यस्तु विभाषया व्याख्यानात् । नच गवादिगणपाठादेव हविर्विशेषस्यापि यत् स्यादिति वाच्यम्, विरोधाभावात् । तत्र स्वरूपग्रहणस्यैवौचित्यात् । न चात्र हविर्विशेषवाचकानां ग्रहणम् इत्यत्र किं प्रमाणमिति वाच्यम्, उगवादिभ्यो यत् इति इति सूत्रे चरव्यास्तण्डुला इति उदाहरणे छयतःप्राप्तौ पूर्वविप्रतिषेधेन यद् विधानपरभाष्यस्यैव प्रमाणत्वात् ।

अपूप्यम् । ४० । अपूपेन क्रीतमित्यर्थे 'विभाषा हविरपूपादिभ्यः' इति विकल्पेन यत् प्रत्यये प्रातिपदिकत्वेन सुपो लुंकि यस्येति चेत्यकारलोप विभक्तिकार्ये अपूप्यमिति सिद्धम् । [illegible] इति छप्रत्यये छस्य ईयादेशे अलोपे विभक्तिकार्ये अपूपीयम् इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Srinagar

 CC-O. In Public Domain. Digitized by eGangotri

शङ्कव्यम । ५८ । शङ्कवे हितमित्यर्थे 'तस्मै हितम्' इति यत् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि 'ओर्गुणे' 'वान्तो यि प्रत्यये' इति अवादेशे प्रातिपदिककार्ये शङ्कव्यम् इति सिद्धम् । दारु इति शेषः ।

नस्यम् । नासिकायै हितमित्यर्थे 'शरीरावयवाद् यत्' यत् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि 'पद्दन्' ईति नासिकाया नस् आदेशे प्रातिपदिककार्ये नस्यम् इति सिद्धम् ।

शीर्षण्यः । ४५ । शिरसे हितमित्यर्थे 'शरीरावयवाद्यत्' इति यत् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि 'ये च तद्धिते' इति शिरःशब्दस्य शीर्षन्नादेशे टिलोपे प्राप्ते 'ये चाभावकर्मणोः' इति प्रकृतिभावे णत्वे प्रातिपदिककार्ये शीर्षण्यः इति सिद्धम् ।

वृष्यम् । वृषाय हितमित्यर्थे 'खलयवमाषतिलवृषब्रह्मणश्च' इति यत् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि टिलोपे प्रातिपदिककार्ये वृष्यमिति सिद्धम् । अत्र अकारान्तः वृषशब्दो गृह्यते, ननु नकारान्तः वृषन्शब्दः, तेन वृष्णे हितमिति वाक्यमेव ।

ब्रह्मण्यम् । ५४ । ब्रह्मणे हितमित्यर्थे 'खलयवमाषतिलब्रह्मणश्च' इति यत् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि टिलोपे प्राप्ते 'ये चाभावकर्मणोः' इति प्रकृतिभावे ब्रह्मण्यम् इति सिद्धम् । अत्रापि ब्रह्मन्शब्दो ब्राह्मणवाचकः—नतु वेदवाचकः तेन ब्रह्मणे वेदाय हितमित्यर्थे वाक्यमेव ।

अजथ्या । ३९ । अजेभ्यो हिता इत्यर्थे 'अजाविभ्यां थ्यन्' इति थ्यन् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि स्त्रीत्वे टापि सवर्णदीर्घे विभक्तिकार्ये अजथ्या इति सिद्धम् । लिङ्गविशिष्टपरिभाषया इदं थ्यन् अजाशब्दादपि भवतीति विशेषः ।

आत्मनीनम् । ४६ । आत्मने हितमित्यर्थे 'आत्मन्विश्वजनभोगोत्तरपदात् खः' इति खप्रत्यये प्रातिपदिकत्वेन सुपो लुकि 'आत्माध्वानौ खे' इति प्रकृतिभावात् टिलोपो न, खस्य आयनेयनेयीयः इत्यादिना ईनादेशे विभक्तिार्ये आत्मनीनम् इति सिद्धम् ।

१५ विश्वजनीयम् (ई० ६७) विश्वस्य जनो 'विश्वजनः अथवा विश्व जनो यस्येति बहुव्रीहौ विश्वजन शब्दात् 'प्राक्क्रीताच्छः' इतिछप्रत्यये छस्यईयादेशे यस्येति च' इत्यस्यापि विभक्तिकार्ये उक्तं रूपं सिद्धम् । 'आत्माध्वानौ खे' इति

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

सूत्रेणात्र हितमित्यर्थे ख प्रत्ययस्तु न विश्वजनशब्दात् 'कर्मधारयादेवेष्यते इति वार्तिकव्याख्यानात् ।

सर्वजनीनः ५६ । सर्वजनाय हितमित्यर्थे 'सर्वजनाट्ठञ् खश्च' इति ख प्रत्यये प्रातिपदिकत्वेन सुपो लुकि खस्य ईनादेशे यस्येति चेत्यकारलोपे विभक्तिकार्ये सर्वजनीनः सिद्धम् ।

पौरुषेयः ।५५। पुरुषस्य वधः इत्यर्थे तस्येदमिति प्राप्तमणं प्रबाध्य, 'पुरुषस्य विकार इत्यर्थ प्राणिरजतादिभ्योऽञ्' इति प्राप्तमञ' प्रबाध्य पुरुषस्य समूह इत्यर्थे तस्य समूह' इति प्राप्तमयबाध्य, पुरुषेण कृतो ग्रन्थ इत्यर्थे कृते ग्रन्थ इति प्राप्तमणं प्रबाध्य, पुरुषेण कृतः प्रासाद इत्यर्थे केनाप्यभावे पुरुषाद्वधविकारसमूहत्तेन कृतेषु' इति ढञ् प्रत्यये प्रातिकत्वेन सुपो लुकि आदिवृद्धौ ढस्येयादेशे आलोपे विभक्तिकार्ये पौरुषेय इति सिद्धम् ।

एकाकिनोऽपि परितः पौरुषेयवृता इव । ३७ । पुरुषाणां समूह इत्यर्थे पुरुषाद्वध—इत्यादि वार्तिकेन ढञि पौरुषेय इति रूपं सिद्ध्यति । साधनप्रकारस्तु पौरुषेयवत् बोध्यः ।

तदर्थं विकृतेः प्रकृतौ । ६६ । तस्मै इदं तदर्थम् 'सामान्ये नपुंसकम्' तत् पदेन विकृतेर्ग्रहणम् । अत्र तदर्थमिति सप्तम्यर्थे प्रथमा, तेन विकृतवाचकात् चतुर्थ्यन्तात् तदर्थाया प्रकृतौ वाच्यर्यां प्रत्ययः स्यात् इति सूत्रार्थः सम्पद्यते । यथा-अङ्गारेभ्य एतानि अङ्गारीयाणि काष्ठानि । अत्र काष्ठानि प्रकृतिः (अङ्गाराः विकृतयः) ततः छ ।

अचार्यभागीनः—(६० ८५) आचार्य भोगाय हितमित्यर्थ 'आत्मन्विश्वजनभोगोत्तरपदात् खः' इति ख प्रत्यये खस्यईनादेशे यस्येति च' इत्यलोपे आचार्यादणत्वं च' इति वार्तिकेन णत्वाऽभावे विभक्तिकार्य आचार्य भोगीनः इति सिद्धम् ।

औपधेयम् (५९) उपधीयते इत्युपधिः (रथाङ्गम्) तदेव औपधेयम् । 'उपधिशब्दात्-स्वार्थेइण्प्रटे' इति ढञि आदिवृद्धौ णस्य एयादेशे यस्येति च' इतीकार लोपे विभक्तिकार्ये औपधेयम् इति सिद्धम् ।

आर्षभ्यः । ४२ । ऋषभस्य अयमित्यर्थे 'ऋषभोपानहोर्ञ्यः' इति ञ्यप्रत्यये प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ रपरत्वे यस्येति चेति अकारलोपे विभक्ति-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri
कार्ये आर्षभ्यः इति सिद्धम्। यः वत्सः ऋषभावस्था (यौवनम्) प्राप्त्यर्थं पोष्यते स ऋषभ इत्युच्यते।

वारत्रम्। ५५। वरत्राय इदमित्यर्थे 'चर्मणोऽञ्' इति अञ् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ यस्येति चेत्यकारलोपे विभक्तिकार्ये वारत्रम् इति सिद्धम्।

प्राकारीयाः। २९। प्राकारः आसामिष्टकानां स्यात् इत्यर्थे 'तदस्य तदस्मिन् स्यात्' इत्यनेन प्रथमान्तात् प्रकारशब्दाच् छ प्रत्यये छस्य ईयादेशे अलोपे बहुवचनविवक्षायां विभक्ति कार्ये प्राकारीयाः इति सिद्धम्।

प्रासादीयम् दारु। ५८। प्रासादोऽस्य स्यादित्यर्थे 'तदस्य तदस्मिन् स्यादि' ति छप्रत्यये प्रातिपदिकत्वेन सुपो लुकि छस्य ईयादेशे अल्लोपे विभक्तिकार्ये प्रासादीयम् इति सिद्धम्।

प्राकारीयः देशः। ४२। प्राकारोऽस्मिन् देशे स्यादित्यर्थे 'तदस्य तदस्मिन् स्यादि' ति छप्रत्यये प्रातिपदिकत्वेन सुपो लुकि छस्य ईयादेश आलोपे विभक्तिकार्ये प्राकारीयो देश इति सिद्धम्।

पारिखेयी भूमिः। परिखा अस्मिन् स्यादित्यर्थे 'परिखाया ढञ्' इति ढञि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ ढस्य एयादेशे अलोपे स्त्रीत्वात् ढञन्तत्वाच्च टिड्ढेति ङीपि विभक्तिकार्ये पारिखेयी भूमिः।

इति छयतोः पूर्णोऽवधिः।

अथ आर्हीयप्रकरणम्

असमासे निष्कादिभ्यः। ५३। अर्हात् इति तेन क्रीतम् इति यावत् अनुवर्तते। तेन निष्कादिभ्योऽसमासे ठक् स्यादार्हीयेष्वर्थेषु इत्यर्थः सम्पद्यते। तेन निष्केण क्रीतमित्यर्थे अनेन ठकि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ अलोपे विभक्तिकार्ये नैष्किकम् इति सिद्ध्यति। समासे परमनैष्किकः इत्यादौ तु 'प्राग्वतेष्ठञ्' इति ठञ् एव। परिमाणान्तस्यासंज्ञाशाणयोरित्युत्तरपदवृद्धिश्च।

ननु निष्कशब्दादेव ठग्विधानात् तदन्तविधेरभावेन समासे ठकः प्राप्तिरेव
Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

नास्ति । तत्र ठकः निषेधाय असमासग्रहणं व्यर्थमिति, न च प्रातिपदिकाधिकारस्य आपञ्चमाध्यायपर्यन्तत्वात् तदन्तविधिसत्त्वेन समासे ठकः प्राप्तौ तन्निषेधाय समासग्रहणस्यावश्यकत्वमिति वाच्यम्, निष्कादीनां विशिष्यगृहीतत्वेन 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति' इति परिभाषया तदन्तविधिनिषेधात् । ठकोऽप्राप्तौ असमासग्रहणं व्यर्थमिति चेत् व्यर्थं सत् ज्ञापकं भवति इतः प्राक्तदन्तविधिरिति ? तेन ठकः निवृत्त्यर्थं असमासग्रहणस्यावश्यकत्वात् । अत एव सुगव्यम्, यवापूप्यम्, इत्यादौ यत् सिद्ध्यति । नच उत्तरत्र तदन्तविध्यभावज्ञापनस्य किं फलमिति वाच्यम्, 'संख्यापूर्वपदानां तदन्तग्रहणं प्राग्वतेरिष्यते तच्चालुकि' इति वार्तिकेन तदन्तविधेर्नियमनात् द्विशूर्पिकम् इत्यादौ शूर्पादञ् न किन्तु औत्सर्गिकः ठञ् एव, तेन त्रिशूर्पिकमिति सिद्ध्यतीति दिक् ।

परमनैष्किकः । ४२ । परमनिष्केण क्रीतमित्यर्थे 'प्राग्वतेष्ठञ्' इति ठञि प्रातिपदिकत्वेन सुपो 'लुकि परिमाणान्तस्यासंज्ञाशाणयोः' इति उत्तरपदवृद्धौ ठस्येकादेशे यस्येति चेति अकारलोपे विभक्तिकार्ये परमनैष्किकः इति सिद्धम् ।

अत्र आर्हीयः ठग् न 'असमासे निष्कादिभ्यः' इत्यत्र असमासग्रहणात् । अत एव ज्ञापकाच्च परमनिष्कशब्दात् ठञ्, अन्यथा तदन्तविधेरभावात् ठञपि न स्यात् ।

यवापूप्यम् । यवापूपाय हितमित्यर्थे 'विभाषा हविरपूपादिभ्यः' इति यत् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि यस्येति चेत्याकारलोपे विभक्तिकार्ये यवापूप्यमिति सिद्धम् । नच यवापूपशब्दस्य अपूपादिगणे पाठाभावात् तदन्तविधेरप्यभावात् कथं यत् प्रत्यय इति वाच्यम् 'असमासे निष्कादिभ्यः' इति सूत्रे असमासग्रहणेन इतः पूर्वं तदन्तविधेः ज्ञापनेन तदन्तात् प्रत्ययोत्पत्तौ बाधकाभावात् ।

द्विशौर्पिकम् (ई० ५९) द्विशूर्पेण क्रीतं द्विशौर्पिकम् । अत्र 'प्राग्वतेष्ठञ्' इति ठञि ठस्य इकादेशे आदिवृद्धौ 'यस्येति च' इत्यलोपे विभक्तिकार्ये द्विशौर्पिकम् इति । इत ऊर्ध्वं तु 'संख्यापूर्वपदानाम्' इति वार्तिकस्य प्रत्युदाहरणमिदम् । अत्र वार्तिके 'अलुकि' इत्युक्तत्वात् 'शूर्पादञन्यतरस्याम्' इति अञ् प्रत्ययो न भवति ।

अर्धद्रौणकम् । ४४ । अर्धद्रोणेन क्रीतमित्यर्थे 'प्राग्वतेष्ठञ्' इति ठञि प्रातिपदिकत्वेन सुपो लुकि ठस्येकादेशे आदिवृद्धिं प्रबाध्य 'अर्धात्परिमाणस्य पूर्वस्य तु वा' इति उत्तरपदवृद्धौ पूर्वपदस्य च विकल्पेन आदिवृद्धौ अलोपे विभक्तिकार्ये आर्धद्रौणिकम्, पक्षे अर्धद्रौणिकमिति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

नातः परस्य । ४५ । अर्धात् परस्य परिमाणाकारस्य वृद्धिर्न स्यात् पूर्वपदस्य तु वा ञिति णिति किति चेत्यर्थः । नच सूत्रे अतः पदाभावेऽपि अर्धप्रस्थिकमित्यादेः सिद्धौ तद् ग्रहणम् व्यर्थमिति वाच्यम्, आर्धकौडविकम् इत्यत्रापि वृद्धिनिषेधः स्यात् । न च तपकरणं किमर्थमिति वाच्यम्, अर्धखार्यां भवा अर्धखारी, सा भार्या यस्य स अर्धखारीभार्य इत्यत्र वृद्धेरप्राप्तौ वृद्धिनिमित्तस्येति पुंवद्भावनिषेधो न स्यात् ।

शतिकम् । ५६ । शतेन क्रीतमित्यर्थे 'शताच्च 'ठन्यतावशतेः' इति ठनि प्रातिपदिकत्वेन सुपो लुकि ठस्येकादेशे अलोपे विभक्तिकार्ये शतिकम् । पक्षे यत्, अलोपे शत्यमिति च सिद्ध्यति ।

बहुकः । ४० । बहुभिः क्रीत इत्यर्थे 'संख्याया अतिशदन्तायाः कन्' इति कनि प्रातिपदिकत्वेन सुपो लुकि विभक्तिकार्ये बहुकः इति सिद्धम् ।

तावतिकः, तावत्कः । 'यत्तदेतेभ्यः इति वतुपि 'बहुगणवतुडति संख्या' इति संख्यासंज्ञायाम् तावता क्रीत इत्यर्थे 'संख्याया अतिशदन्तायाः कन्' इति कनि प्रातिपदिकत्वेन सुपो लुकि 'वतोरिड्वा' इति विकल्पेन विभक्तिकार्ये तावतिकः इडभावपक्षे तावत्कः इति सिद्धम् ।

त्रिंशकः, त्रिंशत्कः । ५५ । त्रिंशता क्रीत इत्यर्थे 'विंशतित्रिंशद्भ्या ड्वुन-संज्ञायाम्'' इति असंज्ञायाम् ड्वुनि प्रातिपदिकत्वेन सुपो लुकि डित्त्वेन टिलोपे वोरकादेशे विभक्तिकार्ये त्रिंशकः इति सिद्धम् । संज्ञायाम् तु अनेन सूत्रेण योग-विभागात् कनि विभक्तिकार्ये त्रिंशत्क इति सिद्धम् । नचानेन सूत्रेण केवलं ड्वुनो विधानात् कथं कनिति वाच्यम्, योगविभागेन कनोऽपि सिद्धेः ।

अधिकः । ५४ । अर्धेन क्रीत इत्यर्थे 'अर्धाच्चेति वक्तव्यमिति' वार्तिकेन टिठन् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि ठस्येकादेशे यस्येति चेत्यकारलोपे विभक्ति-कार्ये अधिकः सिद्धम् ।

प्रतिकः । ५८ । कार्षापणेन क्रीत इत्यर्थे 'कार्षापणाट्टिठन् वक्तव्यः प्रतिरा-देशश्च' इति वार्तिकेन टिठन् प्रत्यये कार्षापणशब्दस्य स्थाने प्रति इत्यादेशे प्राति-पदिकत्वेन सुपो लुकि ठस्येकादेशे इलोपे विभक्तिकार्ये प्रतिकः । टित्वात् पक्षे ङीपि प्रतिकी, प्रत्यादेशाभावे कार्षापणिकः । टित्वात् ङीपि च कार्षापणिकी इति सिद्ध्यति' ।

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

शातमानम् । ४३ । शतमानेन क्रीतमित्यर्थे 'शतमानविंशतिकसहस्रवसनादण्' इति इत्यनेन अणि प्रातिपदिकत्वे सुपो लुकि आदिवृद्धौ यस्येति चेति अकारलोपे विभक्तिकार्ये शतमानम् इति सिद्धम् ।

साहस्रम् । ४१ । सहस्रेण क्रीतमित्यर्थे 'शतमानविंशतिकसहस्रवसनादण्' इत्यनेन अणि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ यस्येति चेत्यकारलोपे प्रातिपदिककार्य साहस्रम् इति सिद्धम् ।

वासनम् (ई. ५६) वसनेन क्रीतमिति विग्रहे 'शतमानविंशतिकसहस्रवसनादण्' इति अणि आदिवृद्धौ अलोपे विभक्तिकार्ये वासनम् इति सिद्धम् ।

द्विकंसम् । ५४ । द्वाभ्यां कंसाभ्यां क्रीतमित्यर्थे 'संख्याया अतिशदन्तायाः' इति कनि प्रातिपदिकत्वेन सुपो लुकि 'अध्यर्धपूर्वाद्द्विगोर्लुगसंज्ञायाम्' इति तस्य लुकि एकदेशविकृतन्यायेन विभक्तिकार्ये द्विकंसम् इति सिद्धम् ।

बहुनिष्कम् । ४१ । बहुनिष्केण क्रीतमित्यर्थे 'संख्याया अतिदन्ताया कन्' इति कनि प्रातिपदिकत्वेन सुपो लुकि 'द्वित्रिपूर्वान्निष्कात्' इति सूत्रस्थेन 'बहुपूर्वाच्चेति वक्तव्यम्' इति वार्तिकेन कनो लुकि विभक्तिकार्ये 'बहुनिष्कम् इति । लुगभावे उत्तरपदस्य वृद्धौ ठस्य इकादेशे 'यस्येति' इत्यकारलोपे विभक्तिकार्ये 'बहुनैष्किकम्' इति सिद्धम् '

खारीकम् । ५६ । खार्या क्रीतमित्यर्थे 'खार्या ईकन्' इति सूत्रे 'केवलायाश्चेति वक्तव्यम् इति वार्तिकबलेन केवलात् तृतीयान्तात्खारीशब्दादपि ईकन्प्रत्यये प्रातिपदिकत्वेन सुपो लुकि 'यस्येति च' इतीकारलोपे विभक्तिकार्ये खारीकम् इति सिद्धम् ।

द्विपाद्यम् । ३७ । द्वाभ्यां पादाभ्यां क्रीतमित्यर्थे 'पणपादमाषशताद्यत्' इति यत् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये द्विपाद्यम् इति सिद्धम् ।

द्विशाणम् । ४६ । द्वाभ्यां शाणाभ्यां क्रीतमित्यर्थे 'द्वित्रिपूर्वादण च' इति सूत्रेण प्रातिपदिकत्वेन सुपो लुकि 'परिमाणान्तस्यासंज्ञाशाणयोः' इत्यत्र संज्ञाशाणपर्युदासादुत्तरपदवृद्ध्यभावे आदिवृद्धौ 'यस्येति च' इत्यकारलोपे

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

विभक्तिकार्ये 'द्विशाणम्' । प्रकृतसूत्रेण चकारात् यत्प्रत्यये तु 'द्विशाण्यम्' इति । ठञि तु तस्य 'अध्यर्धपूर्वाद द्विगोलु'गसंज्ञायाम्' इत्यनेन लुकि द्विशाणम् इति च सिद्ध्यति ।

यशस्यः । ४३ । यशसो निमित्तं संयोग उत्पातो वेत्यर्थे 'गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत्' इति यत्प्रत्यये प्रातिपदिकत्वेन सुपो लुकि विभक्तिकार्ये यशस्यः इति सिद्धम् ।

सार्वभौमः । ४७ । सर्वभूमेरीश्वरः इत्यर्थे सर्वभूमिशब्दात् 'तस्येश्वरः' इति अण्प्रत्यये प्रातिपदिकत्वात् सुपो लुकि 'अनुशतिकादीनां च' इत्युभयपदवृद्धौ भत्वाट्टिलोपे विभक्तिकार्ये 'सार्वभौमः' इति सिद्धम् ।

लौकिकः । ५५ । लोकेषु विदितः इत्यर्थे 'लोकसर्वलोकाट्ठञ्' इति ठञि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ ठस्य इकादेशे 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये 'लौकिकः' इति सिद्धम् ।

शतिकः, शत्यः । ५६ । शतमस्मिन् वृद्धिः, आयः लाभः, शुल्कः, उपदा वा दीयते इत्यर्थे 'तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते इति सूत्रविधानात् 'शताच्च ठयतावशते' इति ठनि प्रातिपदिकत्वेन सुपो लुकि ठस्य इकादेशे 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये 'शतिकः' इति । यत्प्रत्यये तु 'शत्यः' इति सिद्धम् ।

आढकीना । ३९ । आढकं सम्भवति अवहरति पचति वेत्यर्थे 'आढकाचितपात्रात्खोऽन्यतरस्याम्' इत्यनेन खप्रत्यये प्रातिपदिकत्वेन सुपो लुकि खस्य ईनादेशे यस्येति च, इत्यकारलोपे स्त्रीत्वाट्टापि विभक्तिकार्ये 'आढकीना' इति । पक्षे ठञि ठस्येकादेशे आदिवृद्धौ टिड्ढेति ङीपि आढकिकी इति सिद्धम् ।

आचितिकी । ४० । आचितं सम्भवति अवहरति पचति वेत्यर्थे 'आढकाचि—, इति विकल्पपक्षे 'प्राग्वहतेष्ठक्' ठञ् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि पर्जन्यवल्लक्षणन्यायेन ञित्वादादिवृद्धौ ठस्य इकादेशे 'यस्येति च, इत्यकारलोपे स्त्रीत्वात् 'द्विगोः' ङीपि विभक्तिकार्ये 'आचितिकी इति सिद्धम् ।

द्विकुलिजिकी । ४५ । द्विकुलिजं सम्भवति, अवहरति, पचति वेत्यर्थे 'अर्हादगोपुच्छसंख्यापरिमाणाट्ठक्' इत्यत्र परिमाणपर्युदासात् ठगभावे 'प्राग्वहतेष्ठक्, इति ठञि प्रातिपदिकत्वेन सुपो लुकि तस्य 'अध्यर्धपूर्वाद्द्विगोलु'गसंज्ञायाम्' इति लुकि प्राप्ते तं प्रबाध्य 'कुलिजाल्लुक्खौ च, इत्यनेन विभाषया लुकि

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

स्त्रीत्वात् 'द्विगोः' इति ङीपि विभक्तिकार्ये 'द्विकुलिजीना'। खप्रत्यये खस्य इनादेशे 'यस्येति च' इत्यकारलोपे स्त्रीत्वविवक्षायां टापि विभक्तिकार्ये 'द्विकुलिजीना' इति। सूत्रे चकारोपादानात् ष्ठप्रत्ययपक्षे ठस्य इकादेशे 'यस्येति च' इत्यकारलोपे स्त्रीत्वविवक्षायां षित्वात् ङीपि विभक्तिकार्ये 'द्वैकुलिजिकी' इति। नचात्र परिमाणान्तत्वादुत्तरपदवृधिद्: कुतो नेति वाच्यम्, परिमाणान्तस्यासंज्ञाशाणकुजानामिति पाठेन वृधिद्निषेधात्।

पञ्चकः। ४४। पञ्च अंशो वस्नं भृतिर्वा अस्येति चेत्यर्थ 'सोऽस्यांशवस्नभृतयः' इति सूत्रेण यथाविहितप्रत्ययविधानात् 'सङ्ख्याया अतिशदन्ताया कन्' अनेन पञ्चन्शब्दात् कनि प्रातिपदिकत्वेन सुपो लुकि अन्तर्वर्तिविभक्त्या पदत्वात् नलोपे विभक्तिकार्ये 'पञ्चकः' इति। अत्र अंशो भागः। वस्नं मूल्यम्। भृतिर्वेतनम् इत्यादयोऽर्थाः।

अष्टकम्। ५६। अष्टावध्यायाः परिमाणमस्येत्यर्थे 'संख्यायाः संज्ञासंघसूत्राध्ययनेषु' इति सूत्रेण यथाविहितप्रत्ययविधानात् स्वार्थे कप्रत्यये नलोपे विभक्तिकार्ये 'अष्टकम्' इति सिद्धम्। पाणिनेः सूत्रमित्यर्थः।

सप्तदश। ५५। सप्तदश मन्त्राः परिमाणमस्य स्तोमस्येत्यर्थे 'स्तोमे डविधिः' इति वार्तिकेन डप्रत्यये प्रातिपदिकत्वेन सुपो लुकि डित्वाट्टिलोपे विभक्तिकार्ये सप्तदश इति सिद्धम्। सोमयागेषु छन्दोगैः क्रियमाणा पृष्ठादिसंज्ञिका स्तुतिः स्तोमः।

पंक्तिविंशति०। ५४। पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम्' इति पूर्णं सूत्रम्। तदस्य परिमाणमित्यर्थे एते रूढिशब्दाः निपात्यन्ते। ते चेत्थम्—

पङ्क्तिः। पञ्च पादा परिमाणमस्येत्यर्थे अनेन तिप्रत्यये टिलोपे चकारस्य कुत्वे अनुस्वारपरसवर्णौ विभक्तिकार्ये पङ्क्तिरिति सिधम्।

विंशतिः। द्वौ दशतौ परिमाणमस्य सङ्घस्येत्यर्थे अनेन शतिच् प्रत्यये प्रकृतेर्विन्भावोऽनुस्वारश्च प्रातिपदिककार्ये विंशत्याद्याः सदैकत्वे इति नियमात् एकवचनमेव विंशतिः इति।

त्रिंशत्। त्रयः दशतः परिमाणमस्य संघस्येत्यर्थे अनेन शत् प्रत्यये प्रकृतेस्त्रिन्भावे निपातिते नकारस्य अनुस्वारे त्रिंशत् इति।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

चत्वारिंशत् । चत्वारो दशतः परिमाणमस्येत्यर्थे अनेन शत् प्रत्यये प्रकृतेः चत्वारिन्भावे नकारस्य नुस्वारे निपातिते सिद्धिः ।

पञ्चाशत् । पञ्च दशतः परिमाणमस्येत्यर्थे शत् प्रत्यये पञ्चादेशे पञ्चाशत् इति सिद्धम् ।

षष्टिः । षट् दशतः परिमाणमस्य संघस्येत्यर्थे तिप्रत्यये प्रकृतेः षष आदेशे जश्त्वाभावे निपातिते ष्टुत्वे षष्टिः इति ।

सप्ततिः । सप्त दशतः परिमाणमस्येत्यर्थे तिप्रत्यये प्रकृतेः सप्तादेशे सिद्धिः ।

अशीतिः । अष्टौ दशतः परिमाणमस्येत्यर्थे तिप्रत्यये प्रकृतेः अशी इत्यादेशे च प्रातिपदिकत्वेन सुः अशीतिः इति सिद्धम् ।

नवतिः । नव दशतः परिमाणमस्येत्यर्थे तिप्रत्यये प्रकृतेः नवादेशे प्रातिपदिककार्ये नवतिः इति सिद्धम् ।

शतम् । दश दशतः परिमाणमस्येत्यर्थे तप्रत्यये प्रकृतेः नवादेशे प्रातिपदिकत्वेन सुः तस्यामादेशे शतम् इति सिद्धम् ।

वैरङ्गिकः । ६८ । विरागं नित्यमर्हति इत्यर्थे 'छेदादिभ्यो नित्यम्' इति ठञि प्रातिपादिकत्वेन सुपो लुकि 'विराग विरङ्गं च' इति वार्तिकेन विरागशब्दस्य स्थाने विरङ्गादेशे आदिवृद्धौ ठस्येकादेशे यस्येति चेत्यकारलोपे वैरङ्गिकः इति सिद्धम् ।

अर्घ्यः । ५१ । अर्घमर्हतीत्यर्थे 'दण्डादिभ्यो यत्' यत्प्रत्यये प्रातिपदिकत्वेन सुपो लुकि 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये 'अर्घ्यः' इति सिद्धम् ।

पात्र्यः । ६२ । पात्रमर्हतीत्यर्थे 'पात्राद्घंश्च' इति सूत्रेण चकाराद् यत्प्रत्यये प्रातिपादिकत्वेन सुपो लुकि 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये पात्र्यः इति सिद्धम् ।

कडङ्करीयः । ६४ । कडङ्करं माषमुद्गादिकाष्ठमर्हतीत्यर्थे 'कडङ्करदक्षिणाच्छ च' इति सूत्रेण छप्रत्यये प्रातिपदिकत्वेन सुपो लुकि छस्य इयादेशे 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये कडङ्करीयः इति सिद्धम् ।

दक्षिण्यः । ६४ । दक्षिणामर्हतीत्यर्थे 'कडङ्करदक्षिणाच्छः च' इति सूत्रेण चकाराद् यत् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि यस्येति च' इत्यकारलोपे विभक्तिकार्ये दक्षिण्य इति ।

Sri Vidyabharathi Book Centre, Sringeri

 CC-O. In Public Domain. Digitized by eGangotri

स्थालीविल्याः स्थालीविलीयाः । स्थालीविलमर्हतीत्यर्थे 'स्थालीविलात्' इति यत् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि 'यस्येति चे'त्यकारलोपे प्रातिपदिकत्वेन जसि स्थालीविल्याः पाकयोग्या इत्यर्थः । पक्षे अनेन छप्रत्यये छस्येयादेशे स्थालीविलीया इति च सिद्धयति ।

आर्त्विजीनो यजमानः । ऋत्विजमर्हति इत्यर्थे 'यज्ञर्त्विग्भ्यां घखञौ' इति खञि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ रपरत्वे खस्य ईनादेशे 'यस्येति चे'त्यकारलोपे प्रातिपदिककार्ये आर्त्विजीन इति सिद्धम् । आर्त्विजीनो यजमानः । एवं ऋत्विक् कर्मार्हति इत्यर्थेऽपि खञ् प्रत्ययः । उत्तरव्याख्यायां तु आर्त्विजीनः ऋत्विक् । अयं च विशेषः 'यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानम्' इति वार्तिकेन खञ् भवति ।

यज्ञियो देशः । ५८ । यज्ञानुष्ठानमर्हतीत्यर्थे 'यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानम्' इति वार्तिकेन घ प्रत्यये घस्य इयादेशे अलोपे विभक्तिकार्ये यज्ञियः इति सिद्धम् ।

॥ इति आर्हीयप्रकरणम् ।

अथ ठञधिकारे कालाधिकारप्रकरणम्

पारायणिकः । परायणं वर्तयतीत्यर्थे 'परायणतुरायणचन्द्रायणं वर्तयति' इति ठञि ठस्येकादेशे आदिवृद्धौ सिद्धम् ।

योजनशतिकः । ५७ । योजनशतं गच्छतीत्यर्थे 'क्रोशशतयोजनशतयोरुपसंख्यानम्' इति वार्तिकेन ठञ् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि ञित्वादादिवृद्धौ ठस्य एकादेशे 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये योजनशतिकः इति सिद्धम् ।

पान्थः । ५७ । पन्थानं नित्यं गच्छतीत्यर्थे 'पन्थो ण नित्यम्' इति सूत्रेण

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

द्वितीयान्तात् पथिन्-शब्दात् णप्रत्यये प्रकृतेः पन्थादेशे च कृते प्रातिपदिकत्वेन सुपो लुकि णित्त्वादादिवृद्धौ, स्त्री चेत् टापि विभक्तिकार्ये पान्था इति। पुरुषस्तु पान्थः इति।

वा रपथिकम्। ५६। वारिपथेन गच्छति आहृतं वेत्यर्थे 'आहृतप्रकरणे वारिजङ्गलस्थलकान्तार-पूर्वादुपसंख्यानम्' इति वार्तिकेन ठञि प्रत्यये प्रातिपदिकत्वेन सुपो लुकि ञित्वादादिवृद्धौ ठस्येकादेशे टिलोपे विभक्तिकार्ये पारिपथिकम् इति सिद्धम्।

द्विमास्यः। ८१। द्वौ मासौ भूतः इत्यर्थे द्वितीयान्तात् मासशब्दात् 'द्विगोर्यप्' इति यप्प्रत्यये प्रातिपदिकत्वेन सुपो लुकि 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये द्विमास्यः इति सिद्धम्।

षाण्मासिकः। ५५। षण्मासं भूतः इत्यर्थे 'षण्मासाण्ण्यच्च' इति सूत्रे यपोऽप्यनुवर्तनात् यप्प्रत्यये 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये 'षण्मास्य' इति। ण्यत्पक्षे आदिवृद्धौ 'षाण्मास्यः' इति। चकारात् ठञि कृते आदिवृद्धौ ठस्य इकादेशे षाण्मासिकः' इति सिद्ध्यति।

समीनः। ६८। समामधीष्टो भृतो भूतो भावी वेत्यर्थे 'समायाः खः' इति इति खप्रत्यये प्रातिपदिकत्वेन लुकि खस्य ईनादेशे 'यस्येति च' इत्याकारलोपे विभक्तिकार्ये समीनः इति सिद्धम्।

संख्यायाः संवत्सरसंख्यस्य च। ६१। सङ्ख्यायाः परस्य संवत्सरसंख्याशब्दस्योत्तरपदस्य वृद्धिः स्याद् ञिदादाविति सूत्रार्थः नन्वस्मिन् सूत्रे संवत्सरग्रहणाभावेऽपि द्विसांवत्सरिकः इत्यत्र संवत्सररूप द्वादशपरिमाणत्वात् 'परिमाणान्तस्यासंज्ञाशाणयोः' इत्यनेनैवोत्तरपदवृद्धिसिद्धौ संवत्सरग्रहणं व्यर्थमिति चेत्? न, परिमाणग्रहणे कालपरिमाणस्याग्रहणार्थं संवत्सरग्रहणस्यावश्यकत्वात्। अत एव द्वैसामिकः इत्यत्रोत्तरपदवृद्धिर्न। तथा द्विवर्षा इत्यत्र परिमाणपर्युदासेन 'अपरिमाणबिस्ताचितकम्बल्येभ्यो न तद्धितलुकि' इति निषेधेन ङीप् न भवति।

द्विवर्षः। ५४। द्वाभ्यां वर्षाभ्यां निर्वृत्तः अधीष्टः भृतः भूतो

Sri Vidyabharathi Book Centre, Sringeri.

CC-O. In Public Domain. Digitized by eGangotri

चेत्यर्थे 'वर्षाल्लुक् च' इति खप्रत्यये प्रातिपदिकत्वेन सुपो लुकि 'चित्तवति नित्यम्' इति सूत्रेण लुकि विभक्तिकार्ये द्विवर्षः' इति । पक्षे ठकि तस्यापि अनेन लोपे द्विवर्ष इत्येव भवतीति ।

षष्टिकाः । ६३ । षष्टिरात्रेण पच्यन्ते इत्यर्थे 'षष्टिकाः षष्टिरात्रेण पच्यन्ते' इति सूत्रेण कन्प्रत्यये रात्रशब्दस्य लोपे च कृते विभक्तिकार्ये षष्टिकः इति सिद्धम् । साठी इति लोकप्रसिद्धः धान्यविशेषः ।

माहानाम्निकः । ६९ । महानाम्नीनां ब्रह्मचर्यमस्येत्यर्थे 'महानाम्न्यादिभ्यः षष्ठ्यन्तेभ्यः उपसंख्यानम् । इति वार्तिकेन ठञि ञित्वादादिवृद्धौ ठस्य इकादेशे 'यस्येति च' इतीकारलोपे विभक्तिकार्ये रूपं सिद्धम् । न च भस्याढे इति पुंवद्भावः कुतो नेति वाच्यम् महानाम्नीशब्दस्य ऋग्विशेषेषु रूढस्य नित्यस्त्रीलिङ्गत्वेन भाषितपुंस्कत्वाभावे 'भस्याढे' इति पुंवत्त्वाप्राप्तेः हरदत्तस्तु 'महानामिकम्' इत्येव भाष्ये उदाहृतत्वात् 'भस्याढे' इत्यत्र पुंवत्त्वं भवत्येवेति वदति ।

चातुर्मासी । ७२ । चतुर्षु मासेष्वधीतेष्वित्यर्थे 'अण् संज्ञायाम्' इति वार्तिकेन अणि प्रातिपदिकत्वेन सुपो लुकि णित्वादादिवृद्धौ 'यस्येति' च इत्याकारलोपे स्त्रीत्वविवक्षयां टिड्ढेति ङीपि विभक्तिकार्ये 'चातुर्मासी' इति सिद्धम् ।

अग्निष्टोमिकी—(६० ६३, ६८) अग्निष्टोमस्य दक्षिणा अग्निष्टोमिकी । तस्य च दक्षिणा यज्ञाख्येभ्यः इति सूत्रे आख्याग्रहणाद् अकालादावपि ठञ्प्रत्ययो भवति । तेनात्र अग्निष्टोम इति सूत्रे आख्या ग्रहणाद् अकालादावपि ठञ् प्रत्ययो भवति । तेनात्र अग्निष्टोमशब्दात् ठञि ठस्य इकादेशे आदिवृद्धौ 'यस्येति च' इत्यलोपे विभक्त्यादिकार्ये उक्तं रूपं सिद्धम् ।

॥ इति ठञधिकारे कालाधिकारप्रकरणम् ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अथ ठञ्विधिप्रकरणम्

याथाकथाचम् । ५९ । यथाकथाच दीयते कार्यं वेत्यर्थे 'तेन यथा कथा च दीयते हृत्याभ्यां णयतौ' इति अव्ययात् यथाकथाच शब्दात् णप्रत्यये आदिवृद्धौ अलोपे विभक्तिकार्ये याथाकथाचम् इति सिद्धम् ।

सान्तापिकः । ७५ । सन्तापाय प्रभावति इत्यर्थे 'तस्मै प्रभवति सन्तापादिभ्य' इति ठञि प्रातिपदिकत्वेन सुपो लुकि ञित्वादादिवृद्धौ ठस्य इकादेशे 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये सान्तापिकः इति सिद्धम् ।

यौगिकः । ६८ । योगाय प्रभवति इत्यर्थे 'योगाद् यच्च' इति ठञि प्रातिपदिकत्वेन सुपो लुकि आदिवृद्धौ ठस्येकादेशे अलोपे विभक्तिकार्ये सिद्धम् ।

कार्मुकम । ६६ । कर्मणे प्रभवति इत्यर्थे 'कर्मण उकञ्' इति उकञ् प्रत्यये प्रातिपादिकत्वेन सुपो लुकि ञित्वादादिवृद्धौ टिलोपे विभक्तिकार्ये कार्मुकम् वेति सिद्धम् ।

प्राशित्रम । ६७ । प्राशिता प्राप्तोऽस्येत्यर्थे 'उपवस्त्रादिभ्यः उपसंख्यानम्' इति वार्तिकेन अणप्रत्यये प्रातिपदिकत्वेन सुपि लुकि णित्वादादिवृद्धौ ऋकारस्य यणि विभक्तिकार्ये प्राशित्रम् इति सिद्धम् ।

श्राद्धम् । ६१ । श्रद्धा प्रयोजनमस्येत्यर्थे 'चूडादिभ्य उपसंख्यानम्' इति वार्तिकेन अणि प्रातिपादिकत्वेन सुपो लुकि णित्वादादिवृद्धौ 'यस्येति च' इत्याकारलोपे विभक्तिकार्ये श्राद्धम् इति सिद्धम् ।

व्याकरणसमापनीय । ६६ । व्याकरनं समापनीयमस्येत्यर्थे 'समापनात्सपूर्वंदात्' इति छप्रत्यये प्रातिपदिकत्वेन सुपो लुकि छस्य ईसादेशे 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये व्याकरणसमापनीयः इति सिद्धम् ।

ऐकागारिकः । ६९ । एकम् असहायम् अगारं प्रयोजनमस्य मुमुषिषोः इत्यर्थे 'ऐकागरिकट् चौरे' इति सूत्रेण इकट्प्रत्यये निपातनादनेनैव आदिवृद्धौ 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये ऐकागारिकः इति सिद्धम् ।

आकालिकः । ५९ । समानकालावाद्यन्तौ यस्येत्यर्थे 'अकालिकडाद्यन्त-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

वचने' इति सूत्रेण इकट्प्रत्यये तस्मिन्परे समानकालशब्दस्य निपातनाद् अकालादेशे 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये आकालिकः इति सिद्धम्। पूर्वदिने मध्याह्नादुद्यन् दिनान्तरे तत्रैव नश्वर इति वार्थः। आकालाट्ठंश्च' इति वार्तिकेन ठनि तु टापि आकालिका। ठञि तु टिड्ढेति ङीपि आकालिकी इति च सिद्ध्यति।

॥ इति ठञ्विधिप्रकरणम् ॥

अथ भावकर्मार्थप्रकरणम्

तेन तुल्यं क्रिया चेद् वतिः। तृतीयान्तात् तुल्यमित्यर्थे वति प्रत्ययः स्यात्। यत्तुल्यं सा क्रिया चेत् इति सूत्रार्थः। ब्राह्मणवदधीते इत्यत्र ब्राह्मणेन तुल्यं ब्राह्मणकर्तृकाध्ययनतुल्यक्षत्रियकर्तृकाध्ययनमित्यर्थः।

विधिवत्। ६४। विधिमर्हति इत्यर्थे 'तदर्हम्' इति वति प्रत्यये प्रातिपदिकत्वेन सुपो लुकि विभक्तकार्ये विधिवत् इति सिद्धम्।

न नञ्पूर्वात्। ६९। 'न नञ् पूर्वात् तत्पुरुषादचतुरसङ्गतलवणयुधकतरसलसेभ्यः' इति सूत्रम् इतः (त्वतल्विधेः) ऊर्ध्वं ये भावप्रत्ययास्ते नञ् तत्पुरुषान्न स्युः। चतुर-संगत-लवण-वट-युध-कत-रस-लसान् वर्जयित्वा इति सूत्रार्थः। तेन अपतित्वम् इत्यत्र 'पत्यन्तपुरोहितादिभ्यो यक्' न भवति किन्तु त्व एव। अपटुत्वमित्यादौ 'इगन्ताच्च लघुपूर्वात्' इति अण् न भवति। बृहतः पतिः बृहस्पतिरित्यत्र यगभाववारणाय नञ् पूर्वात् इति तेन बार्हस्पत्यमित्यत्र यगभवति। नास्य पटवः सन्तीति अपटुः तस्य भावः आपटवम् इत्यत्र नञ्पूर्वात् बहुव्रीहेः सूत्रेण निषेधवारणाय तत्पुरुषादिति। आचतुर्यम्, आसाङ्गत्यम् आलवण्यम् आवटयम् आयुध्यम् आकत्यम् आरस्यम् इत्यादौ ब्राह्मणादिष्यञो निषेधो माभूदिति अचतुरेत्यादि, अन्यथा सर्वत्र नञ् तत्पुरुषत्वेन ष्यञो निषेधे अनिष्टं स्यात्।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अपटुत्वम । ६३ । न पटुः नञ् समासः अपटोर्भावः इत्यर्थे 'इगन्ताच्च लघुपूर्वात्' इति अणि प्राप्ते 'न नञ्पूर्वात् तत्पुरुषादचतुरेत्यादि' सूत्रेण निषेधे 'तस्य भावस्त्वतलौ' इति त्वप्रत्ये विभवितकार्ये अपटुत्वमिति सिद्धम् ।

प्रथिमा, पार्थवम् । ७२ । पृथोर्भाव इत्यर्थे षष्ठयन्तात् पृथुशब्दात् 'पृथ्वादिभ्य इमनिज्वा' इति इमनिच् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि 'र ऋतो हलादेर्लघोः' इति ऋकारस्य रभावे ओर्गुणं प्रबाध्य 'टेः' टिलोपे प्रातिपदिकत्वेन सुः नान्तत्वात् दीर्घे सुलोपे नलोपे च कृते प्रथिमा इति । वाग्रहणेन अणः समावेशे पक्षे अणि पार्थवम् इति सिद्धयति ।

म्रदिमा, मार्दवम् । ७० । मृदोर्भाव इत्यर्थे 'पृथ्वादिभ्य इमनिज्वा' इति इमनिच् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि 'र ऋतो हलादेर्लघोः' इति ऋकारस्य रभावे ओर्गुणं प्रबाध्य टेर्लोपे प्रातिपदिककार्ये म्रदिमा इति । पक्षे अणि वृद्धौ ओर्गुणे अवादेशे प्रातिपदिककार्ये मार्दवम् इति सिद्धम् ।

शुक्लिमा । ६५ । शुक्लस्य भावः इत्यर्थे 'वर्णदृढादिभ्यः ष्यञ्च' इति सूत्रेण चकाराद् इमनिच्-प्रत्यये अनुबन्धकार्ये प्रातिपदिकत्वेन सुपो लुकि 'टेः' इति टिलोपे स्वादिकार्ये शुक्लिमा' इति । पक्षे ष्यञि आदिवृद्धौ शौक्ल्यम् इति च सिद्धयति ।

ब्राह्मण्यम् । ६९ । ब्राह्मणस्य भावः कर्म वेत्यर्थे षष्ठयन्तात् ब्राह्मणशब्दात् 'गुणवचन-ब्राह्मणादिभ्यः कर्मणि च' इति सूत्रेण भावे ष्यञ् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि पर्जन्यवल्लक्षणन्यायेन आदिवृद्धौ 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये ब्राह्मण्यम् इति सिद्धम् ।

आर्हन्ती । ६६ । अर्हतो नुम् च' इति वार्दिकेन अर्हत् शब्दात् ष्यञ् प्रत्यये प्रकृतेर्नुमागमे च कृते विभक्तिकार्ये 'आर्हन्त्यम्' इति नपुंसकत्वं स्त्रीत्व-विवक्षायां आर्हन्त्यशब्दात् 'षिद्गौरादिभ्यश्च' इति ङीपि 'हलस्तद्धितस्य' इति यलोपे विभक्तिकार्ये 'आर्हन्ती' इति सिद्धयति ।

त्रैस्वर्यम् । ६१ । त्रयः स्वराः इत्यर्थे प्रथमान्तात् त्रिस्वरशब्दात् 'चतुर्वर्णादीनां स्वार्थे उपसंख्यानम्' इति वार्तिकेन ष्यञ् प्रत्यये प्रातिपदिकत्वेन

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सुपो लुकि ञित्वादादिवृद्धौ 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये त्रैस्वर्यम्' इति सिद्धम् ।

चातुर्वेद्यः । ५८ । चतुरो वेदानधीते चतुर्वेदः स एव चातुर्वेद्यः चातुर्वेद-स्योभयपदवृद्धिश्च इति ष्यञि उभयपदवृद्धौ च कृते रूपम् ।

स्तेयम् । ६६ । स्तेनस्य भावः कर्म वेत्यर्थे 'स्तेनाद्यन्नलोपश्च' इति सूत्रेण यत्प्रत्यये नेति संघातस्य लोपे च कृते विभक्तिकार्ये 'स्तेयम्' इति । न च नकारमात्रलोपेऽपि 'यस्येति च' इत्यकारलोपात् 'स्तेयम्' इति सिद्धौ नेति संघातस्य लोपविधानं व्यर्थमिति वाच्यम्. 'अचः परस्मिन्—' इति अकार-लोपस्य स्थानिवत्त्वेन एकारस्य अयादेशप्रसंगात् । न च संघातग्रहणेऽपि 'अलो-न्त्यस्य' त्यकारस्यैव लोपः स्यादिति वाच्यम्, नानार्थकेऽलोन्त्यविधिरि'ति परिभाषया तन्निषेधात् ।

दूत्यम् । ६० । दूतरस्य भावः कर्म वेत्यर्थे 'दूतवणिग्भ्यां च' इति वार्तिकेन यत्प्रत्यये 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये दूत्यम् इति सिद्धम् ।

पौरोहित्यम् । ६३ । पुरोहितस्य भावः कर्म वेत्यर्थे 'पत्यन्तपुरोहिता-दिभ्यो यक' इति सूत्रेण यक्प्रत्यये कित्वादादिवृद्धौ 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये 'पौरोहित्यम्' इति सिद्धम् ।

राज्यम् । ५७ । राज्ञः भावः कर्म वेत्यर्थे 'राजाऽसे' इति गणसूत्रेण यक् प्रत्यये टिलोपे प्रातिपदिककार्ये राज्यमिति सिद्धम् ।

आधिराज्यम् । ६५, ६८ । अधिको राजा अधिराजः अधिराजस्य भावः कर्म वेत्यर्थे 'गुणवचन-ब्राह्मणादिभ्यः कर्मणि च' इति सूत्रेण ष्यञित्वादादिवृद्धौ 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये आधिराज्यम्' इति सिद्धम् । अत्र. राजाऽसे इति यक् तु न, असे इति समासे तन्निषेधात् ।

यौवनम् । ६४ । यूनोर्भावः कर्म वेत्यर्थे 'हायनान्तयुवादिभ्योऽण्' इत्यणि प्रातिपादिकत्वेन सुपो लुकि णित्वादादिवृद्धौ विभक्तिकार्ये यौवनम् इति 'अन्' इति प्रकृतिभावात् टिलोपो न ।

स्थाविरम् । ६६ । स्थविरस्य भावः कर्म वेत्यर्थे 'हायनान्तयुवादिभ्योऽण्' इत्यणि णित्वादादिवृद्धौ विभक्तिकार्ये स्थाविरम् इति सिद्धम् ।

Sri Vidyabharati Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

श्रौत्रम् । ६७, ६९ । श्रोत्रियस्य यलोपश्च' इति वार्तिकेन श्रोत्रियशब्दादणि यणाराकारसंघास्य लोपे रेफादिकारस्त 'यस्येति च' इति लोपे विभक्तिकार्ये रूपं सिद्धम् । यकारादकारस्य 'यस्येति च' इति लोपे सति यकारमात्रस्य अनेन लोपे तु रेफात्तरस्य इकारस्य यण् स्यात् ।

कथं काव्यमिति । न च 'इगन्ताच्च लघुपूर्वात्' इति अणि कविशब्दात् काव्यमिति न स्यादिति वाच्यम्, ब्राह्मणादिगणे पाठेन ष्यञा रूपसिद्धेः ।

तदवेतस्येत्यादि । ६७ । अयंभावः—गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु' इति सूत्रस्य गोत्रप्रत्ययान्ताच्छाखाध्येतृवाचिनश्च षष्ठयन्ताद् भावकर्मणोर्वुञ् स्यात् श्लाघादिषु विषयेषु इत्यर्थः । गोत्रपदेन—अपत्याधिकारादन्यत्र प्रवराध्यायप्रसिद्धमेव गृह्यते । अत्याकारः—अधिक्षेपः ।—गोत्रचरणप्राभर्त्र-कर्मणी अवेतः प्राप्तः । यद्वा अवपूर्वकादिणो ज्ञानमर्थः । द्वितीयेति योगविभागात्समासः ।

साहाय्यम्, साहायकम् । ५८ । सहायस्य भावः कर्म वेत्यर्थे सहायाद्वा वुञि अनुबन्धलोपे वोरकादेशे आदिवृद्धौ अलोपे स्वादिकार्ये साहायकम् । पक्षे ब्राह्मणादित्वात् ष्यञि साहाय्यमिति ।

॥ इति भावकर्माधिकारप्रकरणम् ॥

अथ पाञ्चमिकप्रकरणम्

शालेयम् । ६९ । शालीनां भवनं क्षेत्रमित्यर्थे 'व्रीहिशाल्योर्ढक्' इति ढकि ढस्य एयादेशे पर्जन्यवल्लक्षणन्यायेन कित्वादादिवृद्धौ 'यस्येति च' इतीकारलोपे विभक्तिकार्ये 'शालेयम्' इति सिद्धम् ।

औमीनम् । ६० । उमानां भवनं क्षेत्रमित्यर्थे विभाषातिलमाषोमाभङ्गाणुभ्यः' इति विकल्पपक्षे 'धान्यानां भवने क्षेत्रे खञ्' इति खञि ञित्वादादिवृद्धौ

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

खस्य ईनादेशे 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये 'औमीनम्' इति। उमेति-भाषायां ऊमी इति।

सर्वचर्मीण:, सार्वचर्मीण:। ६३, ६५। सर्वेश्चर्मणा कृतः इत्यर्थे 'सर्व-चर्मणः कृतः खखञौ' इति सूत्रेण खप्रत्यये खस्य ईनादेशे 'नस्तद्धिते' इति टिलोपे णत्वे विभक्तिकार्ये 'सर्वचर्मीण:' इति। खञ्पक्षे 'सार्वचर्मीण:' इति सिद्ध्यति।

सर्वपथीन:। ६६। सर्वपथान् व्याप्नोतीत्यर्थे तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति' इति सूत्रेण खप्रत्यये खस्य ईनादेशे 'यस्येति च' इत्यकारलोपे विभक्तकार्ये 'सर्वपथीनः' इति।

सर्वाङ्गीण:। ६८। सर्वाण्यङ्गानि व्याप्नोति इत्यर्थे 'तत्सर्वादेः पथ्यङ्ग-कर्मपत्रपात्रं व्याप्नोति' इति खप्रत्यये खस्य ईनादेशे अलोपे विभक्तिकार्ये सर्वाङ्गीण इति सिद्धम्।

आप्रपदीन:। ६१। पादस्याग्रं प्रपदं, तन्मर्यादीकृत्य आप्रपदम्। 'आङ् मर्यादाविध्वोः' इत्यव्ययीभावः। आप्रपदं प्राप्नोतीत्यर्थे 'आप्रपदं प्राप्नोति' इति सूत्रेण खस्य ईनादेशे 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये सिद्धम्।

परम्परीण:। ६७। परांश्च परतरांश्चानुभवति इत्यर्थे द्वन्द्वसमासे परतरशब्दात् 'परोवरपरम्परपुत्रपौत्रमनुभवति' इतिसूत्रेण खप्रत्यये तत्सन्नि-योगेन प्रकृते परम्परभावे निपातिते खस्य ईनादेशे 'यस्येति च' इत्यकारलोपे णत्वे विभक्तिकार्ये रूपं सिद्धम्। नच कल्याणपरम्परेत्यादौ कथं परम्परेति निपातनमिति वाच्यम्, परम्पराशब्दस्य अव्युत्पन्नस्त्रीलिङ्गत्वेन शब्दान्तरत्वात्।

पारावारीण:। ६४। अवारपरं गामीत्यर्थे 'अवारपारात्यन्तानुकामं गामी' इति खप्रत्यये खस्य ईनादेशे 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये 'अवार-पारीण' इति। अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यम्' इति पारशब्दात् खप्रत्यये 'पारीण:' इति। पारावारशब्दात् खप्रत्यये 'इति। पारा-वारशब्दात् खप्रत्यये तु 'पारावारीण:' इति च रूपं भवति।

समांसमीना। ६६। समायां समायां विजायते इत्यर्थे 'समां समां विजा-यते' इति सूत्रेण समायां समायां विजायते इत्यर्थे सप्तम्यन्तद्वयसमुदायात्

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

विजायते इत्यर्थे खप्रत्यये प्रातिपदिकत्वादुत्तरपदस्य सुब्लोपे पूर्वपदे च केवलं निपातनात् यलोपे च जाते खस्य ईनादेशे 'यस्येति च' इति अकारलोपे स्त्रीत्वाट्टापि विभक्तिकार्ये रूपे सिद्धम्। या गौः प्रतिवर्षं प्रसूयते सा एवमुच्यते। न सप्तम्यन्तद्वयसमुदायात् खप्रत्ययोत्पत्तौ तदन्तस्य समुदायस्य प्रातिपदिकत्वात् तदवयवयोः सप्तम्योर्लुकि कथमुक्तं रूपं सिद्धयतीति वाच्यम्, प्रकृतसूत्रेण पूर्वपदे विभक्तेस्तदवयवस्य यकारस्य लोपः, अवशिष्टस्य विभक्त्यन्तस्य लोपाभावश्च निपात्यते, तेन क्षत्यभावात्।

आगवीनः। ६०। गोः आ इति विग्रहे 'आङ्मर्यादाभिविध्योः' इत्यव्ययीभावे 'गोस्त्रियोः' इति ह्रस्वे 'आगु' इत्यस्मात् 'आगवीनः' इति। सूत्रेण निपातनात् खप्रत्यये खस्य ईनादेशे 'ओर्गुणः' इति गुणेऽवादेशे विभक्तिकार्ये 'आगवीनः' वेति। गोशब्दो गोप्रत्यर्पणे लाक्षणिकः। गोः प्रत्यर्पणपर्यन्तं यः कर्म करोति स आगवीनः।

अनुगवीनः। ६३। गोः पश्चादित्यर्थे पश्चादर्थे अव्ययीभावे समासे ह्रस्वत्वे 'अनुगु' इति, तस्मात् 'अनुग्वलं गामी' इति खप्रत्यये खस्य ईनादेशे 'ओर्गुणः' इति गुणेऽवादेशे विभक्तिकार्ये अनुगवीनः' इति सिद्धम्।

अध्वनीनः। ६५, ६९। अध्वानमलं गच्छतीत्यर्थे 'अध्वनो यत्खौ इति सूत्रेण खप्रत्ये खस्य ईनादेशे विभक्तिकार्ये रूपं सिद्धम्।

कौपीनम्। ५४। कूपपतनमर्हतीत्यर्थे 'शालीनकौपीने अधृष्टाकार्ययोः' इति सूत्रेण कूपशब्दात् खञि ञित्वादादिवृद्धौ खस्य ईनादेशे 'यस्येति च' इत्यकारलोपे 'कौपीनम्।

हैयङ्गवीनम्। ६४, ६८। ह्योगोदहस्य विकार इत्यर्थे 'हैयङ्गवीनं संज्ञायाम्' इति निपातनात् गोदोहस्य हियङ्गुरादेशे खञ्प्रत्यये च कृते ञित्वादादिवृद्धौ 'ओर्गुणः' इति गुणेऽवादेशे विभक्तिकार्ये हैयङ्गवीनमिति नवनीतमित्यर्थः।

कर्णजाहम्। ६०, ६२। कर्णस्य मूलमित्यर्थे 'तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ' इति जाहच्प्रत्यये विभक्तिकार्ये 'कर्णजाहम्' इति।

विना। ४३। वि इति असहभावे पृथक्त्वे वर्तते तस्मात् 'विनञ्भ्यां नानाञौ ना सह' सूत्रेण [illegible] सुपो लुकि विनेति साधुः।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

संकटम् । ६२ । क्रियाविशिष्टसाधनवाचकात् संशब्दात् 'सम्प्रोदश्च कटच्' इति स्वार्थे कटच्प्रत्यये विभक्तिकार्ये 'संकटम्' इति सिद्धम् ।

अश्वषङ्गवम् । ६४ । षड् अश्वाः इत्यर्थे षट्त्वे षड्गवक्' इति वार्तिकेन षड्गवच् प्रत्यये विभक्तिकार्ये रूपं सिद्धम् ।

अवकटः । ७० । क्रियाविशिष्टसाधनवाचकाद् अवशब्दात् 'अवात् कुटारच्च' इति सूत्रेण चकारात् कटच्प्रत्यये विभक्तिकार्ये उक्तं रूपं सिद्धम् । पक्षे कुटारच्प्रत्यये अवकुटार इति सिद्धम् ।

अवटीटम । ५७,६९ । नासिकायाः नतमित्यर्थे नासिकाया नमने विद्यमानादवशब्दात् 'नते नासिकायाः संज्ञायां टीटज्नाटज्भ्रटचः' इति टीटच् प्रत्यये विभक्तिकार्ये 'अवटीटम्' इति सिद्धम् ।

नते नासिकायाः । ५९ । नासिकाया नतमित्यर्थे अवशब्दात् 'नते नासिकायाः संज्ञायां टीञ्ज्नाटज्भ्रटम्' इत्यनेन टीटच्, भ्रटच्, प्रत्यये, ततो यथाक्रमं स्वादिकार्ये अवटीटम्, अवनाटम् इति रूपत्रयं भवति । उक्तार्थे निशब्दात् 'नेर्विडज्बिरीसचौ' इत्यनेन बिडच्, बिरीसच् प्रत्यये अनुबन्धलोपे स्वादिकार्ये निबिरीसम् इति । 'इनच्पिटच्चिकचि च' इत्यनेन इनचि पिटचि प्रत्यये इनचि परे प्रकृतेश्चिकादेशे, पिटचि परे प्रकृतेश्चि-आदेशे च कृते अनुबन्धलोपे इनचि परे भसंज्ञायामकारलोपे स्वादिकार्ये चिकिनम्, चिपिटम, इति रूपे भवतः । 'कप्रत्ययश्चिकादेशौ च वक्तव्यौ' इत्यनेन कप्रत्यये नेः चिकादेशे भसंज्ञायाम्, अकारलोपे प्रातिपदिकत्वात्स्वादिकार्ये 'चिक्कम्' इति सिद्धम्भवति । एवञ्च मिलित्वा निशब्दस्य पञ्च रूपाणि भवन्ति ।

अवभ्रटम् । ६५ । नासिकायाः नतमित्यर्थे अवशब्दात् 'नते नासिकायाः' इति सूत्रेण भ्रटच्प्रत्यये विभक्तिकार्ये 'अवभ्रटम्' इति सिद्धम् ।

निविडम् निबिरीसम्, । ५६ । नासिकायाः नतमित्यर्थे निशब्दात् नेर्विडज्बिरीसचौ' इति सूत्रेण विडच्प्रत्यये विभक्तिकार्ये रूपं सिद्धम् । एवं बिरीसच् प्रत्यये निबिरीसम् इति ।

चिपिटम् । ४४। नासिकायाः नतमित्यर्थे 'इनच्पिटच्चिकच च' इति सूत्रेण

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

निशब्दात् पिटच्प्रत्यये निशब्दस्य चि इत्यादेशे च कृते विभक्तिकार्ये 'चिपिटम्' इति सिद्धम् ।

चिक्कम्, चिक्किनम् । ७८ । नासिकाया नतमित्यर्थे 'कप्रत्ययश्चिकादेशौ च वक्तव्यौ' इति वार्तिकेन निशब्दात् कप्रत्यये चिकादेशे च कृते विभक्तिकार्ये 'चिपिटम्' इति सिद्धम् ।

तावान् । ५३ । तत्परिमाणमस्येत्यर्थे 'यत्तदेभ्यः परिमाणे वतुप्' इति तद्शब्दात् वतुपि अनुबन्धलोपे 'आसर्वनाम्न' इत्यात्वे तद्धितान्तत्वात् सौ 'उगिदचाम्–' इति नुमि 'अत्वसन्तस्य–' इति दीर्घे 'हल्ङ्याब्भ्यः–इति सुलोपे 'संयोगान्तस्य लोपः' इति तलोपे 'तावान्' इति सिद्धम् ।

कियान् । ६७, ७८ । किं परिमाणमस्येत्यर्थे 'किमिदम्भ्यां वो घः' इति सूत्रेण वतुपि वस्य घादेशे च कृते घस्य इयादेशे 'किम् इयत्' इति स्थिते 'इदङ्किमोरीश्की' इति किमः कीभावे 'यस्येति च' इति ईकारलोपे कियत्-शब्दात् सौ 'उगिदचाम्–' इति नुमि 'अत्वसन्तस्य' इति दीर्घे हल्ङ्यादि-संयोगान्तलोपयोः कृतयोः 'कियान्' इति सिद्धम् ।

इयान् । ६८ । इदं परिमाणमस्येत्यर्थे 'किमिदम्भ्यां वो घः' इति इदम्-शब्दात् वतुपि वस्य घादेशे च कृते घकारस्य इयादेशे इदम् इयत्' इति स्थिते 'इदङ्किमोरीश्की' इति शित्वादिदमः ईकारे सर्वादेशे हल्ङ्यादिति सुलोपे संयोगान्तलोपे 'इयान्' इति सिद्धम् ।

त्रयम्, त्रितयम् । ७३ । त्रयोऽवयवा अस्येत्यर्थे 'संख्याया अवयवे तयप्' इति तयपि द्वित्रिभ्यां तयस्यायज्वा' इति विभाषया त्रिशब्दात् अयचि [illegible] इति च' इति इकारलोपे विभक्तिकार्ये 'त्रयम्' इति । अयजोऽभावे 'त्रितयम्' इति सिद्धम् ।

॥ इति पाञ्चमिकप्रकरणम् ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अथ मत्वर्थीयप्रकरणम्

एकादशम । ७४ । एकादश अधिका: अस्मिन्नित्यर्थे 'तदस्मिन्नधिकमिति दशान्ताड्ड' इति दशन्शब्दान्तात् डप्रत्यये टिलोपे विभक्तिकार्ये 'एकादशम्' इति सिद्धम् ।

विंशम । ६७, ६९ । विंशति: अधिका अस्मिन्नित्यर्थे 'शदन्तविंशतेश्च' इति तिशब्दस्य लोपे विभक्तिकार्ये 'विंशम्' इति सिद्धम् ।

सङ्ख्यायाः गुणस्य निमाने मयट् । ७२ । अत्र गुणो भाग: अंश इति । निमीयतेऽनेनेति निमानं मूल्यद्रव्यम् । निपूर्वकात् मेङ् प्रणिदाने इत्यस्माद्धातो: करणे ल्युट् 'तदस्य सञ्जातम्' इत्यतो मण्डूकप्लुत्या तदस्येत्यनुवर्त्तते । गुणस्येत्यस्य मध्यमणिन्यायेनोभयत्रान्वय: । तथा च भागस्य मूल्ये वर्त्तमानाद् गुणगतसङ्ख्यावाचकात्प्रथमान्तात् षष्ठ्यर्थे मयट् स्यादिति सूत्रार्थ: । उदाहरणं यथा–द्विनिमयमुदश्विद्यवानाम् । अत्र यावानां द्वौ भागौ निमानमस्योदश्विद्भागस्येति विग्रहो वोध्य: । द्वाभ्यां यवप्रस्थाभ्याम् एकं उदश्वित्प्रस्थ: क्रियते यत्र तत्रेदं वाक्यं प्रयुज्यते ।

पञ्चम: । ६५ । पञ्चानां पूरण: इत्यर्थे 'तस्य पूरणे डट्' इति डटि 'नान्तादसंख्यादेर्मट्' इति डटो मडागमे नलोपे विभक्तिकार्ये 'पञ्चम:' इति सिद्धम् ।

षष्ठ: । ६६ । षण्णां पूरण: इत्यर्थे 'तस्य पूरणे डट्' इति डटि 'षट्कतिकतिपयचतुरां थुक्' इति थुकि ष्टुत्वे 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये 'षष्ठ' इति । नच षस्य चर्त्वम् कुतो नेति वाच्यम्, अपदान्तत्वात् ।

कतिपयथ: । ४५ । कतिपयानां पूरण इत्यर्थे षष्ठ्यन्तात् कतिशब्दात् 'तस्य पूरणे डट्' इत्यनेन डट्प्रत्ययेऽनुबन्धलोपे डित्वादभस्यापि टेर्लोपे 'षट्कतिकतिपयचतुरां थुक्' इत्यनेन थुगागमेऽनुबन्धलोपे तद्धितान्तत्वे प्रातिपदिकत्वात् सौ रुत्वे विसर्गे 'कतिपयथ:' इति सिद्धम् । नचात्र कतिपयशब्दस्याऽसङ्ख्यात्वाड्डट् कथमिति वाच्यम्, डटि परे थुगागमविधानेनाऽसङ्ख्यात्वेऽपि तत्कल्पनेनाक्षते: ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

तुरीयः, तुर्यः । ५७ । चतुर्णां पूरण इत्यर्थे चतुरश्छयतौ आद्यक्षरस्य लोपश्च इति यत्प्रत्यये, च इति संघातस्य लोपे तुर्यः । पक्षे छ प्रत्यये ईयादेशे तुरीयः इति सिद्धम् ।

तृतीयः । ६३, ६८ । त्रयाणां पूरणः इत्यर्थे 'त्रेः सम्प्रसारणं च' इति सूत्रेण षष्ठयन्ताद् त्रिशब्दात् तीयप्रत्यये सम्प्रसारणे च कृते विभक्तिकार्ये 'तृतीयः' इति सिद्धम् ।

अच्छावाकीयम । ६६ । अच्छावाकशब्दोऽस्मिन्नस्तीत्यर्थे 'मतौ छः सूक्तसाम्नोः' इति सूत्रेण छप्रत्यये छस्य ईयादेशे 'यस्येति च' इत्यकारलोपे विभक्तकार्ये 'अच्छावाकीयम्' इति । सूक्तमिति शेषः ।

वारवन्तीयम । ६८ । वारवन्तशब्दोऽस्मिन्नस्तीत्यर्थे 'मतौ छः सूक्तसमम्नोः' इति सूत्रेण छप्रत्यये छस्य ईयादेशे 'यस्येति च' इत्यकारलोपे विभवितकार्ये 'वारवन्तीयम् इति सिद्धम् ।

गर्दभाण्डीयः । गर्दभाण्डशब्दसंयुक्तोऽध्यायोऽनुवाको वाऽस्ति अस्मिन्नित्यर्थे 'मतौ छः सूक्तसाम्नोः' इति छप्रत्यये 'अध्यायानुवाकयोर्लुक्' इति तस्य लुकि विभक्तिकार्ये 'गर्दभाण्डः इति । पक्षे छस्य ईयादेशे अकारलोपे विभक्तिकार्ये 'गर्दभाण्डीयः' इति सिद्धम् ।

वैमुक्तः । ६० । विमुक्तशब्दोऽस्मिन्नस्तीत्यर्थे 'विमुक्तादिभ्योऽण्' इत्यणि णित्वादादिवृद्धौ 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये वैमुक्तः' इति सिद्धम् ।

दैवासुरः । ७४ । देवासुरशब्दोऽस्मिन्नस्तीत्यर्थे 'विमुक्तादिभ्योऽण्' इत्यणि णित्वादादिवृद्धौ 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये 'दैवासुरः' इति सिद्धम् ।

अंशकः । ७७ । अंशं हरति इत्यर्थे 'अंशहारी' इत्यनेन कन् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि एकदेशविकृतन्यायेन सौ रुत्वे विसर्गे अंशकः इति सिद्धम् ।

अभीकः । ६७, ६९ । अभिकामयते इत्यर्थे 'अनुकाभिकाभीकः कमिता' इति कन्प्रत्यये अभेः पाक्षिके दीर्घे च कृते विभक्तिकार्ये 'अभीकः' इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

द्वितीयकम । ६९ । द्वितीयकं ह्निकं वा ग्रहणं देवदत्तस्येत्यर्थे 'तावतिथं

CC-O. In Public Domain. Digitized by eGangotri

हणमिति लुग्वा' इति पूरणप्रत्ययान्तात् द्वितीयशब्दात् कन्प्रत्यये पूरणप्रत्ययस्य भाषया लुकि च कृते विभक्तिकार्ये 'द्विकन्' इति लुगभावपक्षे 'द्वितीयकम्' ति च सिद्धम् ।

त्वत्काः, मत्काः । ६३ । त्वम् एषां मुख्यः इत्यर्थे 'स एषां ग्रामणीः' इति न्प्रत्यये 'प्रत्ययोत्तरपदयोश्च' इति त्वादेशे विभक्तिकार्ये 'त्वत्काः' इति । वम् अहमेषां मुख्यः इत्यर्थे 'मत्काः' इत्यपि सिद्ध्यति ।

विषपुष्पकः । ६४ । विषपुष्पैर्जनितः इत्यर्थे 'कालप्रयोजनाद्रोगे' इति नि विभक्तिकार्ये 'विषपुष्पकः इति सिद्धम् ।

गुडापूपिका । ६८ । गुडापूपाः प्रायेणान्नमस्यामित्यर्थे तदस्मिन्नं प्राये ज्ञायाम्' इति कनि विभक्तिकार्ये रूपं सिद्धम् ।

वटकिनी । ६८ । वटकाः प्रायेण अन्नमस्यां पौर्णमास्यामित्यर्थे 'वटकेभ्यः निर्वाच्यः' इति वार्तिकेन इनिप्रत्यये स्त्रीत्वान्ङीपि विभक्तिकार्ये रूपं सिद्धम् ।

श्रोत्रियः । ६७ । छन्दोऽधीते इत्यर्थे 'श्रोत्रियंश्छन्दोऽधीते' इति घन् प्रत्यये निपातनात् प्रकृतेः श्रोत्रादेशे च कृते घस्य इयादेशे 'यस्येति च' इत्यकारलोपे श्रोत्रियः' इति सिद्धम् ।

वा इत्यनुवृत्तेश्छान्दसः । ६५ । 'श्रोत्रियंश्छन्दोऽधीते' इति सूत्रे मण्डूक-लुत्या तावतिथं ग्रहणमिति लुग्वा' इति सूत्रात् वेत्यनुवर्तते । ततश्च घन्प्रत्यया-भावपक्षे छन्दोऽधीते इति विग्रहे 'तदधीते तद्वेद' इति अणि 'श्रोत्रियंश्छन्दोऽधीते' इत्यनेन निपातनात् प्रकृतेः श्रोत्रादेशे णित्वादादिवृद्धौ 'यस्येति च' इत्यकार-लोपे विभक्तिकार्ये 'श्रौत्र' इति रूपं सिद्धम् । वाग्रहणानुवृत्तौ तु घना अध्येत्रणो बाधः स्यादिति ।

पूर्वी (६४) । पूर्वं कृतमनेनेति विग्रहे 'पूर्वादिनि' इति कृतमित्यादि-क्रियाविशेषणात् पूर्वशब्दात् अनेनेत्यर्थे इनि प्रत्यये 'यस्येति च' इत्यकारलोपे प्रातिपदिकसंज्ञायां सौ उपधादीर्घे सुलोपे च कृते 'पूर्वी' इति सिद्धम् ।

कृतपूर्वी (६७) पूर्वं कृतः कृतपूर्वमनेनेति विग्रहे 'सपूर्वाच्च' इति सूत्रेण इनि प्रत्यये 'यस्येति च' इत्यकारलोपे प्रातिपदिकत्वात् सौ उपधादीर्घे सुलोपे नलोपे 'कृतपूर्वी' इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

क्षेत्रियः (६८) । परक्षेत्रे चिकित्स्यः' इत्यर्थे सप्तम्यन्तात् परक्षेत्रश
क्षेत्रियच् परक्षेत्रे चिकित्स्यः' इति सूत्रेण घच्प्रत्यये निपातनात् परशब्दस्य
च कृते घस्य इयादेशे 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये 'क्षेत्रियः
सिद्धम् ।

इन्द्रियम-इत्यादि । ७७ । 'इन्द्रियमिन्द्रलिङ्गमिन्द्रसृष्टमिन्द्रदत्तमिति इति समग्रं सूत्रम् । इन्द्रशब्दात्तृतीयान्तात् लिङ्गमित्याद्यर्थेषु घच्निपा इत्यर्थः । इन्द्रः–आत्मा तस्य लिङ्गमित्यर्थे घच्प्रत्यये इयादेशे भत्वादलो प्र पदिकत्वात्स्वादिकार्ये इन्द्रियमिति सिद्धम् । चक्षुरादीनीन्द्रियाण्युच्यन्ते आ नोऽनुमापकमितीन्द्रियमित्यर्थः । एवं ममचक्षुरिन्द्रेण दृष्टं–ज्ञातमित्यर्थे इ जुष्टं–प्रीणितं वा, इन्द्रेण दत्तं यथायथं विषयेभ्य इत्यर्थे च तृतीयान्ता शब्दाद् घच्प्रत्ययेन इन्द्रियमिति । रूढिशब्दोऽयं व्युत्पादितः । सूत्रे इति प्रकारार्थः, तेन इन्द्रेण दुर्जयमिति विग्रहेऽपि 'इन्द्रियम् इति सिद्धयति ।

इन्द्रियम (६८) । इन्द्रियमिन्द्रलिङ्गमिन्द्रसृष्टमिन्द्रदत्तमिति वा' सूत्रे इतिशब्दः प्रकारार्थः । तेन इन्द्रेण दुर्जयमिति विग्रहेऽपि तृतीया इन्द्रशब्दात् घच्प्रत्यये घस्य इयादेशे 'यस्येति च' इत्यकारलोपे विभक्ति 'इन्द्रियम्' इति सिद्धम् ।

भूमनिन्दा (६५, ७७) भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशयने । सं घनेऽस्ति विवक्षायां भवन्ति मतुबादयः ।। इति श्लोकवार्तिकम् ।

अस्ति विवक्षायां ये मतुबादयो विधीयन्ते ते भूमादिषु भवन्तीति वाक्या एवं 'मत्वर्थे बहुव्रीहिः' इति वार्तिकात् भूमादिषु विषये यथायथं बहुव्रीहि बोध्यः । तत्र भूमा = बहुत्वम् । यथा गोमान् । निन्दायां—ककुदावर्त कन्या । प्रशंसायां—रूपवान् । नित्ययोगे—क्षीरिणो वृक्षः । अतिशायने उदरिणी कन्या । संसर्गे—दण्डी, छत्री । अत्र संसगः = संयोगः । तेन संयुक्त एव उच्यते, न तु गृहावस्थितदण्डोऽपि । इह दण्डपुरुषयोः संयोगे स 'दण्डी पुरुषः' इत्यादिवत् पुरुषी दण्डः पुरुवान् दण्डः इति प्रयोगो न भव वृत्तिनियामकस्य संसर्गविशेषरूपविलक्षणसम्बन्धस्याऽभावात् । संयोगे समा प्रतीतिबलादेव कल्प्यते ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

विदुष्मान् (ई० ६९) विद्वांसः अस्त्यस्मिन् इति विग्रहे 'तदस्यास्त्य-स्मिन्निति मतुप' इति विद्वच्छब्दात् मतुपि 'तसौ मत्वर्थे' इति भ संज्ञायां 'वसोः सम्प्रसारणम्' पूर्वरूपे षत्वे विभक्त्यादिकार्ये विदुष्मान् इति ।

विद्युत्वान् (६३) । विद्युद् अस्य अस्मिन्वेत्यर्थे 'तदस्यास्त्यस्मिन्' इति मतुपि मकारान्तत्वाभावान्मकारोपधत्वाभावाच्च 'मादुपधायाश्च–' इति वत्वा-भावे 'झयः' इति मतोर्मस्य वत्वे तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सौ 'उगिदचाम्—' इति नुमि सुलोपे संयोगान्तलोपे रूपं सिद्धम् ।

आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती (६६, ७३)—एते संज्ञायां निपात्यन्ते । तत्र आसन्दीभावादिकमेवात्र निपात्यते । 'वत्वं तु संज्ञायाम्' इत्यनेनैव सिद्धेः । यथाक्रमसुदाहरणानि—आसन्दीवान्' ग्रामः । आसनशब्दस्य आसन्दीभावः, अन्यत्र आसनवान् इत्येव । एवम्—'अष्ठी-वान्' नाम ऋषिः, अत्र हि अस्थिशब्दस्याष्ठीभावः अन्यत्र–अस्थिमान् । 'चक्री-वान्' नाम राजा-अत्र चक्रशब्दस्य चक्रीभावः, अन्यत्र–'चक्रवान्' । कक्षीवान्' नाम ऋषिः, अत्र कक्ष्यायां सम्प्रसारण निपात्यते, अन्यत्र—कक्ष्यावान्' । 'रुमण्वान' नाम पर्वतः अत्र लवणशब्दस्य रुमणभावो निपात्यते, 'रुमण्वान्' अन्यत्र—लवणवान् । 'चर्मण्वती' नाम नदी—अत्र चर्मणो नलोपाभावो णत्वं च निपात्यते, अन्यत्र–'चर्मवती' इति भवति ।

चक्रीवान् (५७) । चक्रमस्ति अस्येत्यर्थे 'आसन्दीवष्ठीवच्चक्रीवत्कक्षी-वद्रुमण्वती' इति सूत्रेण चक्रशब्दस्य निपातनात् चक्रीभावे 'संज्ञायाम्' इति सूत्रेण मस्य वत्वे तद्धितान्तत्वात् सौ उगित्वान्नुमि दीर्घे सुलोपे संयोगान्तलोपे 'चक्रीवान्' इति सिद्धम् ।

चर्मण्वती (६१) । चर्म अस्ति अस्येत्यर्थे 'तदस्यास्त्यस्मिन्नि' ति मतुपि 'आसन्दीवदष्ठीवच् ' इति सूत्रेण निपातनात् चर्मणः नलोपाभावे णत्वे च 'संज्ञायाम्' इति सूत्रेण मतोर्मस्य वत्वे स्त्रीत्वविवक्षायां ङीपि विभक्तिकार्ये 'चर्मण्वती' नाम नदीति सिद्धम् ।

राजन्वती । ६९ । सौराज्यमस्ति अस्येत्यर्थे राजन् शब्दात् 'राजन्वान्सौ-

Sri Vidyabharathi Book Centre, Sringeri

 CC-O. In Public Domain. Digitized by eGangotri

राज्ये' इति मतुपि निपातनान्नलोपाभावे 'मादुपधायाश्च—' इति मस्य व
त्वेऽत्वान्ङीपि विभक्तिकार्ये 'राजन्वती' इति भूः इति शेषः ।

चूडालः, चूडावान् । ६३ । चूडाऽस्ति अस्येत्यर्थे 'प्राणिस्थादातो लजन्
तरस्याम्' इति लच्प्रत्यये विभक्तिकार्ये 'चूडालः' इति । पक्षे मतुपि म
वादेशे 'चूडावान्' इति भवति ।

सिध्मलः । ६४ । सिध्म अस्ति अस्येत्यर्थे 'सिध्मादिभ्यश्च' इति लच्प्रत्य
विभक्तिकार्ये 'सिध्मलः' इति सिद्धम् ।

वातूलः । ५८ । वातः अस्यास्तीत्यर्थे 'वातदन्तबलललाटानामूङ् च' इ
गणसूत्रेण ऊङि चकारात् लचि च कृते भत्वेन अलोपे विभक्तिकार्ये वातू
इति सिद्धम् ।

विषुणः । ६७, ६९ । विष्वङ् अस्ति अस्येत्यर्थे 'विष्वङित्युत्तरपद
पश्चात्कृतसन्धेः' इति वार्तिकेन विषु अञ्च् इत्यस्मात् अकृतसन्धेमत्वर्थे
उत्तरलोपे च कृते णत्वे विभक्तिकार्ये 'विषुणः' इति सिद्धम् ।

श्राद्धः । ७० । श्रद्धाऽस्ति अस्येत्यर्थे 'प्रज्ञाश्रद्धार्चाभ्यो णः' इति णप्रत्
णित्वादादिवृद्धौ 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये 'श्राद्ध' इति सिद्ध

वार्त्तः । ६३ । वृत्तिरस्यास्तीत्यर्थे वृत्तेश्च' इति वार्तिकेन मत्वर्थे णप्रत्
णित्वादादिवृद्धौ 'यस्येति च' इतीकारलोपे विभक्तिकार्ये वार्त्तः' इति सिद्धम्

तपस्वी । ७३ । तपोऽस्ति अस्येत्यर्थे 'तपसहस्राभ्यां विनीनी' इति सू
तपःशब्दात् विनिप्रत्यये तद्धितान्तत्वात् सौ उगित्वान्नुमि दीर्घे सुलोपे नलो
'तपस्वी' इति सिद्धम् ।

सिकताः सिकतिलः । ६०, ६२ । सिकताः सन्ति अस्मिन्देशे इत्यर्थे 'सिक
शर्कराभ्यां च' इति अणि प्रातिपदिकत्वेन सुपो लुकि 'देशे लुबिलचौ
इति तस्य लुपि विभक्तिकार्ये 'सिकताः' इति । सिकताश
नित्यं बहुवचनान्तः तेन सुब्लुपि सति युक्तवद्भावेन विशेष्यभूतस्य देशस्य ए
त्वेऽपि बहुवचनमेव । इलचि, अणि मतुबि च क्रमेण सिकतिलः, सैक
सिकतावान् इति भवति ।

शर्कराः । ६६ । शर्कराः सन्त्यस्मिन् देशे इत्यर्थे बहुवचनान्तात् शर्क

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri
-शब्दात् 'सिकताशर्कराभ्याञ्च' इत्यनेन अणि प्रातिपदिकत्वेन सुपो लुकि ततः 'देशे लुबिलचौ च' इत्यनेन तस्याणो लुपि विभक्तिकार्ये शर्कराः इति । इलचि, अणि, मतुपि च क्रमेण शर्करिलः, शार्करः शर्करावान् इति रूपाणि भवन्ति । तेषां चातुर्थिके अणि, लोपे, ठकि, छो, ठचि, ककि च षड् रूपाणि । अणो लुकि शर्करा । अणि शार्करम् । ठकि शार्करिकम् छे शर्करीयम् । ककि शार्करकम् इति रूपाणि भवन्ति ।

,मुखरः । ६३ । मुखशब्दात् ऊषमुषिमुष्कमधो रः इति सूत्रस्येन 'रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम् इति वार्तिकेन रप्रत्यये विभक्तिकार्ये मुखरः इति सिद्धम् ।

केशवः । ७९ । केशः अस्यास्तीत्यर्थे 'केशाद्वोऽन्यतरस्याम्' इति सूत्रेण वप्रत्यये विभक्तिकार्ये 'केशवः' इति । सूत्रे अन्यतरस्यां ग्रहणमिन्ठिनोः समावेशार्थम् । तेन इनि प्रत्यये 'यस्येति च' इति अकारलोपे तद्धितान्तत्वात् सौ दीर्घे सुलोपे नलोपे 'केशी' इति । ठनि-कृते तु ठस्य इकादेशे 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये 'केशिकः इति । पक्षे मतुपि दस्य वत्वे च कृते सौ नुमि दीर्घे सुलोपे संयोगान्तलोपे च कृते 'केशवान्' इति च सिद्ध्यति ।

अर्णवः ।७६। अर्णः जलम्, तत्प्रभूतमस्मिन्नस्तीत्यर्थे अर्णसो लोपश्च' इति वार्तिकेन अर्णसो वप्रत्यये सकारस्य लोपे च कृते विभक्तिकार्ये 'अर्णवः इति सिद्धम् ।

अजगवं पिनाकः । ६७ । अजगःअस्ति अस्येत्यर्थे 'गडचजगात् संज्ञायाम्' इति व प्रत्यये विभक्तिकार्ये रूपं सिद्धम् ।

ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वगोमिन्मलिनमलीमसाः । ६० । एते मत्वर्थे निपात्यन्ते । 'ज्योत्स्ना' इत्यत्र ज्योतिष उपधालोपो नश्च निपात्यन्ते । 'तमिस्रा' यमस उपधाया इत्वं रश्च निपात्यें । 'गोमी' इत्यत्र गोशब्दान्मिनिः निपात्यते । 'मलिनः' इत्यत्र मलशब्दादिनच् प्रत्ययो निपात्यते । 'मलीमसः' इत्यत्र मलशब्दादीमसच् निपात्यते ।

ज्योत्स्ना । ७७ । ज्योत्स्नावयवीभूतानि ज्योतींषि, तान्यासां इत्यर्थे ज्योत्स्नातमिस्रा' इति सूत्रेण निपातनात् नप्रत्यये उपधाभूतस्य इकारस्य च

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कृते इणः परत्वाभावात् षत्वनिवृत्तौ स्त्रीत्वाट्टापि विभक्तिकार्ये 'ज्योत्स्ना' इति।

तमिस्रा (६६)। तमस अवयवीभूतं तमः अस्यास्तीत्यर्थे तमस्शब्दात् 'ज्योत्स्नातमिस्रा—' इति निपातनात् रप्रत्यये उपधाभूतस्य मकरादकारस्य इत्वे च कृते स्त्रीत्वाट्टापि विभक्तिकार्ये 'तमिस्रा' इति। 'तमिस्रा तामसी रात्रिः' इत्यमरः स्त्रीत्वमतन्त्रम् इत्यपि सिद्धयति।

उर्जस्वलः (७५)। ऊर्जस् शब्दात् मत्वर्थे 'ज्योत्स्नातमिस्रा—' इति सूत्रेण निपातनात् बलुचि विभक्तिकार्ये ऊर्जस्वलः' इति सिद्धम्, वलचा विनो बाधो मा भूत् इति विनिरपि पक्षे निपात्यते, तेन ऊर्जस्वी इति सिद्धम्। एतेन 'अस्मायामेधास्रजो विनिः' इत्यनेनैव सिद्धे विनो निपातनम् व्यर्थमिति परास्तः। ऊर्जस्वती इत्यस्य असुन्प्रत्ययान्तत्वेनैव सिद्धौ वृत्तिकारोक्तदिशा असुगागम-विधानप्रयासो विफल एव।

कर्णिलः (६३) विवृद्धौ कर्णौ यस्येति विग्रहे वृद्धिविषयात् स्वांगवाचिकर्ण शब्दात् 'तुंदादिभ्य इलच्च' इति सूत्रस्थेन 'स्वाङ्गादिवृद्धौ' इति गणसूत्रेण इलचि 'यस्येति च' इत्यकारलोपे विभक्तकार्ये 'कर्णिलः' इति। पक्षे इनि अलोपे उपधादीर्घे सुलोपे नलोपे च कृते 'कर्णी' इति। पक्षे ठनि ठस्य इकादेशे अलोपे विभक्तिकार्ये 'कर्णिकः' इति। पक्षे मतुपि 'झयः' इयि मतोर्मस्य वत्वे नुमि दीर्घे सुलोपे संयोगान्तलोपे च कृते 'कर्णवान्' इति। इत्थं कर्णिलः, कर्णी, कर्णिकः, कर्णवान् इति चत्वारि रूपाणि भवन्ति।

मायावी मायिकः (६४)। माया अस्ति अस्येत्यर्थे 'अस्मायामेधास्रजो विनिः' इति विनिप्रत्यये उपधादीर्घे सुलोपे नलोपे 'मायावी' इति व्रीह्यादिपाठात् व्रीह्यादिभ्यश्च' इति सूत्रेण मत्वर्थे इनिप्रत्ययपक्षे 'यस्येति च' इत्यकारलोपे उपधादीर्घे सुलोपे 'मायी' इति। ठन्पक्षे ठस्य इकादेशे अकारलोपे विभक्तिकार्ये 'मायिक' इति सिद्धम्।

आमयावी ५८। आमयः अस्य अस्तीत्यर्थे 'आमयस्योपसंख्यानं दीर्घश्च' इति आमयशब्दात् विनिप्रत्यये प्रकृतेरन्त्यस्य दीर्घे च कृते विभक्तिकार्ये आमयावी इति सिद्धम्।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

हृदयालुः । ६८ । हृदयमस्ति अस्तीत्यर्थे 'हृदयाच्चालुरन्यतरस्याम्' इति वार्तिकेन आलुच्प्रत्यये कृते दीर्घे विभक्तिकार्ये 'हृदयालुः' इति । पक्षे इति अलोपे उपधादीर्घे सुलोपे नलोपे 'हृदयी' इति । पक्षे ठन् ठस्य इकादेशे अलोपे विभक्तिकार्ये 'हृदयिकः' इति । चकरात् मतुपि च कृते मस्य वत्वे उगित्वान्नुमि उपधादीर्घे सुलोपे 'हृदयवान्' इति च रूपं सिद्धं भवति ।

तृप्रालुः । ६७ । तृपः पुरोडाशः तं न सहते इत्यर्थे 'शीतोष्णतृप्रेभ्यस्तद-सहने-' इति वार्तिकेन आलुचि प्रत्यये कृते सवर्णदीर्घे विभक्तिकार्ये 'तृप्रालुः' इति । तृपं दुःखमिति माधवः ।

मरुतः । ५७ । मरुत् अस्य अस्तीत्यर्थे 'तप्पर्वमरुद्भ्याम्' इति वार्तिकेन तप् प्रत्यये विभक्तिकार्ये मरुत्तः इति सिद्धम् ।

वाचालः, वाचाटः । ६६, ६९ । कुत्सितं बहु भाषते इत्यर्थे आलजाटचौ बहुभाषिणि' इति सूत्रस्थेन 'कुत्सित इति वक्तव्यम्' इति वार्तिकेन वाच्शब्दात् पक्षे विभक्तिकार्ये 'वाचाटः' इति । सम्यग्बहु भाषते इत्यर्थे तु 'वाचो ग्मिनिः' इति ग्मिनि प्रत्यये कृते, विभक्त्यादिकार्ये 'वाग्मी' इत्येव ।

ककुदावर्ती । ६० । ककुदं ग्रीवाया अधस्तात् पृष्ठभागः अत्र आवर्तः ककुदावर्तः । स अस्या अस्तीत्यर्थे गर्ह्यवाचकात् ककुदावर्तशब्दात् 'द्वन्द्वोपताप-गर्ह्यात् 'प्राणिस्थादिनिः' इति सूत्रेण इनिप्रत्यये भत्वादलोपे तद्धितान्तत्वात् सौ उपधादीर्घे सुलोपे नलोपे रूपं सिद्धम् ।

पञ्चम्युष्ट्रः । ६३ । मासः संवत्सरो वा पञ्चमोऽस्यास्तीत्यर्थे ठनादि बाधित्वा 'वयसि पूरणात्' इति सूत्रेण इनुप्रत्यये 'यस्येति च' इत्यकारलोपे उपधादीर्घे सुलोपे नलोपे 'पञ्चमी' इति सिद्धम् । उष्ट्र इत्यर्थः ।

हस्ती । ५३ । हस्तोऽस्यास्तीत्यर्थे 'हस्ताज्जातौ' इनिप्रत्यये अकारलोपे नलोपे 'हस्ती' इति सिद्धम् ।

अर्थवान् । ७५ । सन्निहितः अर्थः अस्येत्यर्थे तदस्यास्त्यस्मिन्' इति मतुपि मस्य वत्वे उगित्वान्नुमि सुलोपे संयोगान्तलोपे 'अर्थवान्' इति । असन्निहितः अस्येत्यर्थे तु 'अर्थाच्चासन्निहिते' इति वार्तिकेन इनिप्रत्यये अलोपे तद्धितान्त-त्वात् सौ उपधादीर्घे सुलोपे नलोपे 'अर्थी' इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

धान्यार्थी । ५८ । धान्येनार्थः धान्यार्थः अस्यास्तीत्यर्थे 'तदन्ताच्च' इति वार्तिकेन अर्थशब्दान्तादपि धान्यार्थशब्दात् इनि प्रत्यये विभक्तिकार्ये धान्यार्थी इति सिद्धम् ।

कम्बः । ७४ । कमस्त्यस्येत्यर्थे प्रथमान्तात् उदकसुखार्थकमान्त-'कम्शब्दात् कंशंभ्यां बभयुस्तितुतयसः' इति बप्रत्यये- -अनुस्वारे परसवर्णे कम्बः । पक्षे भप्रत्यये अनुस्वारे परसवर्णे-कम्भः । पक्षे युस्प्रत्यये अनुस्वाराऽनुनासिकादिके—कंयुः । पक्षे तिप्रत्यये मस्याऽनुस्वादिके—कन्तिः । पक्षे तुप्रत्यये मस्यानुस्वारादिके—कन्तः । पक्षे यस्प्रत्ययेनुस्वारादिके—'कंय्यः' इति । इत्थं (१) कम्बः (२) कम्भः (३) कंम्युः (४) कन्तिः (५) कन्तुः (६) कन्तः (७) कंय्यः इति सप्त रूपाणि भवन्ति ।

अहंयुः । ७९ । अहम् अस्मिन् अस्तीत्यर्थे अहंशुभमोर्युस् इति युसि अनुस्वारे विभक्तिकार्ये अहंयुः इति सिद्धम् । अहंकारवान् इत्यर्थः ।

॥ इति मत्वर्थीयप्रकरणम् ॥

अथ प्राग्दिशीयप्रकरणम्

अमुतः । ७३, ७५ । अदस्शब्दात् पञ्चम्यान्तात् 'पञ्चम्यास्तसिल्' इति तसिल्प्रत्यये प्रातिपदिकत्वेन सुपो लुकि अत्वे पररूपे उत्वे मत्वे च कृते एकदेशविकृतन्यायेन सौ तसिलादित्वेन अव्ययत्वात् सुब्लुकि सस्य रुत्वे विसर्गे 'अमुतः' इति सिद्धम् ।

क्व, कुत्र । ६६, ६९ । कस्मिन्नित्यर्थे सप्तम्यन्तात् किंशब्दात् 'किमोऽत्' इत्यनेन वैकल्पिके अत् प्रत्यये प्रातिपदिकत्वेन सुपो लुकि 'क्वाऽति' इत्यनेन क्वादेशे तद्धितान्तत्वे प्रातिपदिकत्वात्सौ तस्य 'तद्धितश्चाऽसर्वविभक्तिः' इत्यत्र तसिलादीनां परिगणनादव्ययत्वेन सुकि क्वेति सिद्धम् । न चात्रास्तकारस्य

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

'प्राग्दिशो विभक्तिः' इत्यनेन विभक्तित्वात् 'न विभक्तौ'–इतीत्संज्ञानिषेध कुतो नेति वाच्यम्, 'तवर्गस्येत्वप्रतिषेधोऽस्तद्धिते' इति वार्तिकेन निषेधात् पक्षे 'सप्तम्यास्त्रल्' इति त्रलि 'कुतिहोः' इत्यनेन किमः कु आदशे विभक्ति कार्ये कुत्रेति रूपं सिद्ध्यति ।

ततो भवन्तम । ६३ । 'तं भवन्तम्' इत्यर्थे तत्शब्दात् 'इतराभ्योऽ दृश्यन्ते' इति सूत्रेण तसिल्प्रत्यये अत्वे पररूपे अव्ययत्वात् सुब्लुकि सस्य रुत विसर्गे 'ततः' इति सिद्धम् । नचैवं सर्वत्र तसिल् स्यादिति वाच्यम्, दृशिग्रहण भवदादियोग एव इति वार्तिकोक्तत्वात् अन्यत्र पञ्चमीसप्तमीभिन्नायां विभक्त इति बोध्यम् ।

अधुना । ७२ । अस्मिन् काले इत्यर्थे 'अधुना' इति सूत्रेण सप्तम्यन्त इदम् अधुना प्रत्यये 'इदम इश्' इति इशादेशे 'यस्येति च' इति इकारलो तद्धितान्तत्वात् सौ अव्ययत्वात् सुब्लुकि 'अधुना' इति सिद्धम् ।

एतर्हि । ६४ । एतस्मिन् काले इति विग्रहे 'अनद्यतने र्हिलन्यतरस्या इति सप्तम्यन्तात एतत् शब्दात् र्हिलप्रत्यये एतदोऽन्' इत्यत्र 'एतदः' इ योगविभागात् रेफादौ प्रत्यये परतः एतादेशे तद्धितान्तत्वात्सौ अव्ययत्व सुब्लुकि 'एतर्हि' इति ।

सद्यः परुत्॰ । ६९ । 'सद्यः परुत्परार्यैषमः परेद्यव्यद्यपूर्वेद्युरन्यतरेद्युरित द्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः' इति समग्रं सूत्रम् ।

सद्य इत्यत्र 'समानस्य सभावो द्यश्चाहनि' इति भाष्यवाक्यात् समान ब्दात् द्यस्प्रत्ययः सभावश्च निपात्यते ।

पूर्वस्मिन् वत्सरे इत्यर्थे 'परत्' इति, । पूर्वतरे वत्सरे 'परारि' इति च भवतः । तत्र 'पूर्वपूर्वतरयोः परादेशः उदारी च प्रत्ययौ संवत्सरे' इति वा केन सप्तम्यन्तात्पूर्वतरशब्दात् संवत्सरेऽभिधेये उत्, आरिश्च प्रत्यये, प्रकृतेः प देशे अव्ययत्वाद्विभक्तिलोपे च कृते उक्तरूपसिद्धिः ।

अस्मिन् संवत्सरे इत्यर्थे सप्तम्यन्तादिदंशब्दात् 'इदम इश् समसण् प्रत्य संवत्सरे' इति वार्तिकेन इदम इशादेशे समसणि प्रत्यये णित्वादादिवृद्धौ षत्वे विभक्तिकार्ये 'ऐषमः' इति ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

परस्मिन्नहनि इत्यर्थे सप्तम्यन्यात् परशब्दात् 'परस्मादेद्यव्यहनि' इति
तिकेन इकारान्त एद्यविप्रत्यये अलोपे विभक्तत्यादिकार्ये 'परेद्यवि' इति ।

अस्मिन्नहनि इत्यर्थे सप्तम्यन्तादिदंशब्दात् 'इदमोऽश्भावो द्यश्च' इति
तिकेन अकारान्त–'द्य' प्रत्यये इदम अशादेशे प्रातिपदिकत्वात्सुरः अव्ययप-
ाल्लुकि कृते 'अद्य' इति रूपं सिद्धम् ।

पूर्वस्मिन्नहनि, अन्यतरस्मिन्नहनि, इतरस्मिन्नहनि अपरस्मिन्नहनि, अधर-
ान्नहनि, उभयस्मिन्नहनि, उत्तरस्मिन्नहनि, इति 'पूर्वान्यान्यतरेतरापराधरो-
ोत्तरेभ्य एद्युस् च' इति वार्तिकेन, एद्युस् प्रत्यये अकारलोपे प्रतिपदिकत्वा-
ाव्ययपरत्वाल्लुकि सस्य रुत्वे विसर्गे कृते पूर्वेद्युः । अन्यतरेद्युः । इतरेद्युः ।
रेद्युः । अधरेद्युः । उभयेद्युः । उत्तरेद्युः । इति अष्टौ प्रयागाः सिद्ध्यन्ति ।

ऐषमः । ७५ । अस्मिन् संवत्सरे इत्यर्थे 'सद्यः परुत्–' इति सूत्रेण निपात-
त् 'इदम इश् समसण् प्रत्ययश्च संवत्सरे' इति भाष्यवार्तिकेन इदमः इशादेशे
ासणि प्रत्यये णित्वादादिवृद्धौ इणः परस्य संस्य षत्वे विभक्तयादिकार्ये
ययत्वात् सुपो लुकि रुत्वे विसर्गे 'ऐषमः' इति सिद्धम् ।

उभयेद्युः । ७१, ७८ । उभयोरह्नोः इत्यर्थे 'सद्यः परुत्०' इत्यनेन निपात-
त्० पूर्वान्यान्यतरेतराधरोभयोत्तरेभ्य एद्युस् च' इति भाष्यवार्तिकबलात्
ायशब्दात्, एद्युस्प्रत्यये 'यस्येति च' इत्यकारलोपे विभक्त्यादिकार्ये अव्यय-
ात् सुपोलुकि रुत्वे विसर्गे उभयेद्युः' इति सिद्धम् ।

इत्थम् । ६९ । अनेन एतेन वा प्रकारेणेत्यर्थे इदम् शब्दात् 'इदमस्थमुः'
ानेन, एतत् शब्दात् 'एतदो वाच्य' इति वार्तिकेन वा थमुप्रत्यये 'एतेतौ रथोः'
त इदम इदादेशे 'एतदः' योगविभागाद्वा एतदः इदादेशे प्रातिपदिकत्वात् सौ
ययत्वात् सौ अव्ययत्वात् लोपे इत्थम् इति सिद्धम् ।

इति प्राग्दिशीयप्रकरणम् ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अथ प्राग्दिशीयप्रकरणम्

पुरः, पुरस्तात् । ७६, ८१ । पूर्वस्यां पूर्वस्याः पूर्वा वा दिगित्यर्थे 'पू
र्वाधरावराणामसिपुरधवश्चैषाम्' इति अस्तात्यर्थे असि प्रत्यये प्रकृतेः पुर इत्य
अव्ययत्वात् सुपोलुकि सस्य रुत्वे विसर्ग 'पुरः' इति । दिक्छब्देभ्यः सप्तम्
पञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः' इति अस्तातिप्रत्यये तु 'अस्ताति
इति सूत्रेण पुरादेशे अव्ययत्वात् सुब्लुकि 'पुरस्तात्' इति भवति ।

अधस्तात् । ८० । अधरस्याम्, अधरस्याः अधरा वा दिगित्यर्थे 'पूर्वा
णाम्–' इति अस्तात्यर्थे असि प्रत्यये प्रकृतेः अध् इत्यादेशे अव्ययत्वाद् सुब्
सस्य रुत्वे विसर्गे 'अधः' इति । पक्षे 'दिक्छब्देभ्यः–' इत्यनेन अव्यय
सुब्लुकि 'अधस्तात्' इति ।

अवः । ७४ । अवरशब्दात् पूर्वाधरावराणाम्' इति असि प्रत्यये प्र
अव् इत्यादेशे अव्ययत्वात् सुब्लुकि सस्य रुत्वे विसर्गे 'अवः' इति सि
पक्षे अस्तातिप्रत्यये प्रकृतेः अवादेशे प्राप्तेः आधादेशे प्राप्ते तं प्रबाध्य 'विभ
वरस्य' इति विकल्पेन अवादेशे अवस्तात् अवरस्यै अवरस्तात् इति सिद्धय

उपरि । ७३ । 'उपर्युपरिष्टात्' इति सूत्रेण अस्तातेर्विषये ऊर्ध्वश
उपादेशे रिल् प्रत्यये च कृते अव्ययत्वात् सुब्लुकि 'उपरि' इति । रिष्ट
प्रत्यये कृते तु उपरिष्टादिति सिद्धम् ।

दक्षिणात् । ७० । दक्षिणशब्दात् 'उत्तराधरदक्षिणादाति' इति
आति प्रत्यये अलोपे अव्ययत्वात् सुब्लुकि 'दक्षिणात्' सिद्धम् ।

अपरेण ग्रामम् ।७६। अपरशब्दात् 'एनबन्यतरस्यामदूरेऽपञ्चम्याः' इ
विकल्पेन एनप्प्रत्यये भसंज्ञायामल्लोपे तद्धितान्तत्वेन प्रातिपदिकत्वात्सो
लुकि 'अपरेण' इति सिद्धम् । नचोक्तसूत्रे 'उत्तराधरदक्षिणादतिः'
उत्तरादयोऽनुवर्तन्ते । तथा सति प्रकृते उत्तराद्यभावात्कथमेनबिति वाच्य
केचिदुत्तरादीननुवर्त्य दिक्शब्दमात्रादेनब्विधानमिति वदन्ति तन्मतेने
दिक् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

द्वैतीयीकः । ६९ । द्वितीयो भाग इत्यर्थे 'तीयादीकक् स्वार्थे वा वाच्यः' इति वार्तिकेन द्वितीयशब्दात् स्वार्थे ईकक्प्रत्यये कित्वादादिवृद्धौ 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये 'द्वितीयः' इति सिद्धम् ।

एकाकी । ६० । केवलवाचकात् 'एकादाकिनिच्चासहाये' इति सूत्रेण आकिनिच्प्रत्यये 'यस्येति च' इत्यकारलोपे सौ उपाधादीर्घे सुलोपे नलोपे 'एकाकी' इति सिद्धम् ।

आढ्यचरः । ६९ । आढ्यो भूतपूर्वं इत्यर्थे भूतपूर्वं इत्यर्थे भूतपूर्वे चरट् इति चरट् इतिप्रत्यये विभक्तिकार्ये आढ्यचरः इति सिद्धम् ।

किमेत्तिङ्० । ६२ । 'किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे' इति सूत्रम् । आमु इति छेदः । उपकार उच्चारणार्थः । किम्, एत्, तिङ्, अव्यय— एषां चचुर्णां द्वः । 'किमेत्तिङव्ययप्रकृतिको घः' इति मध्यमपदलोपी समासः । ततश्च किम तदन्तात्तिङोऽव्ययाच्च यो घस्तदन्तादामुः स्यान्न तु द्रव्यप्रकर्षे इत्यर्थो भवति । यथा—किन्तमाम्, प्राह्णेतमाम्, पचतितमाम्, उच्चैस्तमाम् ।

पचतितमाम । ६४ । अतिशयेन पचतीत्यर्थे 'तिङश्च' इति तमप् प्रत्यये 'तरप्तमपौ घः' इत्यनेन घसंज्ञायाम् 'किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे इत्यनेन आमुप्रत्यये 'तद्धितान्तत्वेन प्रातिपदिकात् सौ अव्ययत्वात् सुब्लुकि 'पचतितमाम्' इति । अतिशयिता पाकक्रियेत्यर्थः ।

उच्चैस्तमाम् । ६६ । अतिशयेन उच्चैराशंसतीत्यर्थे 'तिङश्च' इति तमप्प्रत्यये 'तरप्तमपौ घः' इति घसंज्ञायाम् 'किमेत्तिङ्— इति आमुप्रत्यये समुदायात् सौ अव्ययत्वात् सुब्लुकि 'उच्चैस्तमाम्' इति सिद्धम् ।

लघीयान् । ६४ । अयमनयोरतिशये, लघुरित्यर्थे तमबिष्ठनापवाद 'द्विवचनविभज्योपपदे तरबीयसुनौ' इत्यनेन ईयसुन्प्रत्ययेऽनुबन्धलोपे भसंज्ञायां टिलोपे तद्धितान्तत्वेन प्रातिपदिकत्वात्सौ उगित्वात् 'उगिदचां सर्वनामस्थाने धातोः' इत्यनेन नुमि अनुबन्धलोपे 'सान्तमहतः संयोगस्य' इत्यनेन दीर्घे 'हल्ङ्याब्भ्यो' इत्यादिना सुलोपे संयोगान्तलोपे 'लघीयान्' इति सिद्धम् । नलोपस्तु न भवति, संयोगान्तलोपस्यासिद्धत्वात् ।

Sri Vidyabharathi Book Centre, Sringeri

करिष्ठः । ६८ । अयमनयोरतिशयेन कर्ता इत्यर्थे 'तुरछन्दसि' तृजन्तात्

CC-O. In Public Domain. Digitized by eGangotri

कर्तृशब्दात् इष्ठन्प्रत्यये तुरिष्ठमेयःसु' इति तृशब्दस्य लोपे विभक्तिकार्ये 'करिष्ठ' इति सिद्धम् ।

दोहीयसी धेनुः । ६८ । इयमनयोरतिशयेन दोग्ध्री इत्यर्थे भस्याढे तद्धिते इत्यनेन 'सिद्धश्च प्रत्ययविधौ' इति वचनात् तद्धिते कर्तव्ये प्रागेव पुंवद्भावे ङीपो निवृत्तौ दोग्धृशब्दात् 'तुश्छन्दसि' इत्यनेन ईयसुन्प्रत्यये तुष्ठिमेयःसु इति तृप्रत्ययस्य लोपे निमित्ताभावात् दाद्धेर्धातोरिति घत्वस्य निवृत्तौ दुह ईयस् इत्यवस्थायाम् प्रत्ययलोपे प्रत्ययलक्षणमिति सूत्रेण प्रत्ययलक्षणेन सार्वधातुकत्वात् पुगन्तेति गुणे उगित्वात् ङीपि सौ तस्य हल्ङ्याब्भ्यादिलोपे दोहीयसी इति सिद्धम् ।

नच तुश्छन्दसि इत्यस्य वेदे एव प्रवृत्तेः कथं लौकिके प्रयोगे प्रवृत्तिरिति वाच्यम्, तुरिष्ठेमेयःसु इत्यतिदेशे लोकेऽपि कर्तारमाचष्टे कारयति इत्यादावुपयोगाद् इहापि उपन्यस्तम् । न च आज्ञादौ गुणवचनादेवेति नियमेन पुनः धृजन्तादपि तयोः विधाने उपाधिसंकरः स्यादिति वाच्यम्, तुश्छन्दसि इति नापूर्वो विधिः किन्तु पूर्वनियमस्य बाधक एव, तेन न उपाधिसंकर इति दिक् ।

श्रेयान् । ६१ । अयमनयोरतियेन प्रशस्यः इत्यर्थे 'द्विवचनविभज्योपपदे तरबीयसुनौ' इति ईयसुन्प्रत्यये 'प्रशस्यस्य श्र' इति श्रादेशे 'श्र ईयस्' इति स्थिते 'यस्येति च' इत्यकारलोपे प्राप्ते 'प्रकृत्यैकाच्' इति प्रकृतिभावे गुणे सौ उगित्वान्नुमि दीर्घे सुलोपे संयोगान्तलोपे च कृते 'श्रेयान्' इति ।

साधीयान् । ६० । अयमनयोरतिशयेन बाढः (भृशः) इत्यर्थे 'द्विवचनविभज्योपपदे तरबीयसुनौ' इति सूत्रेण ईयसुन्प्रत्ययेन 'अन्तिकबाढयोर्नेदसाधौ' इति साधादेशे 'यस्येति च' इत्यकारलोपे सौ उगित्वान्नुमि 'अत्वसन्तस्य–' इति दीर्घे सुलोपे संयोगान्तलोपे 'साधीयान्' इति सिद्धम् ।

क्षोदिष्ठः । ६४ । अयमनयोरतिशयेन क्षुद्रः इत्यर्थे 'अतिशायने तमबिष्ठनौ' इति इष्ठन्प्रत्यये 'स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः' इति सूत्रेण रेफस्य लोपे उकारस्य गुणे च कृते 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये 'क्षोदिष्ठः' इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्व-

CC-O. In Public Domain. Digitized by eGangotri

षित्रब्द्राघिवृन्दाः' (७८) प्रियादीनां क्रमात्प्रादयः स्युरिष्ठादिषु परेष्विति सूत्रार्थः ।

प्रेष्ठः इति । प्रियशब्दादिष्ठनि प्रकृतेः प्रादेशः आभीयत्वेनासिद्धत्वादकारोच्चारणसामर्थ्याच्च टिलोपे न ।

स्थेष्ठः इति । स्थिरशब्दादिष्ठनि प्रकृतेः स्थादेशः, प्रकृतिभावट्टिलोपाभावः स्फेष्ठः इति ।

स्फेष्ठः स्फिरशब्दादिष्ठनि प्रकृते स्फादेशः, गुणादिके रूपम् ।

वरिष्ठः इति उरुशब्दादिष्ठनि प्रकृतेर्वरादेशः ।

बंहिष्ठ इति बहुलशब्दस्य बंह इत्यादेशः (सूत्रे इकार उच्चारणार्थः) ।

गरिष्ठः इति । गुरुशब्दादिष्ठनि प्रकृतेर्गरादेशः ।

वर्षिष्ठः इति । वृद्धशब्दाष्ठिनि प्रकृतेः वर्षादेशः । अत्रापीकारः सूत्रे बहिवदुच्चारणार्थः ।

त्रपिष्ठः इति । तृप्रशब्दादिष्ठनि प्रकृतेरदुपधत्रपादेशः ।

द्राघिष्ठः इति । दीर्घशब्दादिष्ठनि प्रकृतेर्द्राघिरादेशः इकारस्यात्राप्युच्चारणार्थत्वमेवाभ्युपेयम् ।

वृन्दिष्ठः वृन्दारकशब्दादिष्ठनि प्रकृतेर्वृन्दादेशः । अकार उच्चारणार्थः ।

प्रियादिशब्दादीयसुनि प्रकृतेः प्राद्यादेशे प्रेयान्, वरीयान्, बंहीयान्, गरीयान्, वर्षीयान्, द्राघीयान् वृन्दीयान् । प्रियोरुबहुलगुरुदीर्घाणां पृथ्वादित्वादिमनिचि, प्रेमा, वरिमा, बंहिमा, गरिमा, द्राघिमा इति रूपाणि भवन्ति ।

वर्षिष्ठः । ७९ । अयमनयोरतिशयेन वृद्धः इत्यर्थे अतिशायने तमबिष्ठनौ, इति इष्ठनि प्रियस्थिरेत्यादिना वर्षादेशे वर्षिष्ठः इति साधुः ।

बंहिष्ठः । ७७ । अयमनयोरतिशयेन बहुलः इत्यर्थे 'अतिशायने तमबिष्ठनौ' इति इष्ठन्प्रत्यये 'प्रियस्थिर—' इति सूत्रेण बहुलशब्दस्य बंहादेशे विभक्तिकार्ये 'बंहिष्ठः इति । बंहेरिकारस्योच्चारणार्थत्वाभावे तु आभीयत्वेन असिद्धत्वात् उच्चारणसामर्थ्याद्वा 'यस्येति च' इति इकारस्य लोपो न स्यात् ।

गरिष्ठः । ६० । अयमनयोरतिशयेन गुरुः इत्यर्थे 'अतिशायने तमबिष्ठनौ' इति इष्ठन्प्रत्यये 'प्रियस्थिर—' इति गुरुशब्दस्य गर इत्यादेशे विभक्तिकार्ये 'गरिष्ठः इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

भूयान् । ५९ । अयमनयोरतिशयेन बहुरित्यर्थे 'द्विवचनविभज्योपपदे तरबीयसुनौ' इति ईयसुनि 'बहोर्लोपो भू च बहोः' इत्यनेन ईयसुनः इकारलोपो बहोश्च भूरादेशे सौ उमित्वान्नुमि 'सान्तमहतः--' इति दीर्घे सुलोपे संयोगान्तलोपे भूयान् इति सिद्धम् ।

स्रजिष्ठः ।६४। अयमनयोरतिशयेन स्रग्वीत्यर्थे स्रग्विन् शब्दात् 'अतिशायने तमबिष्ठनौ' इति इष्ठनि 'विन्मतोर्लुक्' इति लुकि तन्निमित्तपदत्वनिवृत्तौ तेन कुत्वनिवृत्तौ विभक्तिकार्ये स्रजिष्ठः' इति सिद्धम् ।

बहुपटुः । ६७ । ईषदूनः पटुः इत्यर्थे 'विभाषा सुपो बहुच् पुरस्तात्तु' इति सुबुत्पत्तेः प्राक् पटुशब्दात् बहुचि प्रातिपदिकावयवत्वात् सुपो लुकि समुदायात् सुबुत्पत्तौ रुत्वे विसर्गे 'बहुपटुः' इति सिद्धम् ।

शूद्रकः । ६४ । कुत्सितः शूद्रः इत्यर्थे 'संज्ञायां कन्' इति स्वार्थे कनि, विभक्तिकार्ये शूद्रकः' इति सिद्धम् ।

धानकाः । ६९ । धाना एव इत्यर्थे 'नीतौ च तद्युक्तात्' इति धानाशब्दात् स्वार्थे कप्रत्यये 'केऽणः' ह्रस्वे स्त्रीत्वे टापि 'अभाषितपुंस्काच्च' इत्यस्य वैकल्पिकत्वेन इत्वाभावे स्वादिकार्ये 'धानकाः' इति । 'हन्त ते धानकाः' दास्यन्त इति शेषः । हन्तेत्यव्ययमनुकम्पाद्योतकम् । 'हन्त हर्षेऽनुकम्पायाम्' वेत्यमरात् । ततश्च अनुकम्पायुक्ता धाना इत्यर्थो भवति ।

अद्धकि । ६६ । 'नीतौ च तद्युक्तात्' इति सूत्रे 'अव्ययसर्वनाम्नामकच् प्राक्टेः' इति अनुवर्तते । अव्ययसर्वनाम्नाम् इत्यत्र च 'तिङश्च' इत्यनुवृत्तेः अद्धीति तिङन्तस्य टेः प्रागकचि विभक्तिकार्ये 'अद्धकि' इति सिद्धम् ।

देविलः । ६४। अनुकम्पितो देवदत्त इत्यर्थे देवदत्तशब्दात् 'बह्वचो मनुष्यनाम्नाष्ठज्वा' इति विकल्पे ठच्प्रत्यये 'ठाऽजादापूर्व्वं द्वितीयादचः' इति द्वितीयादचः परस्य दत्तशब्दस्य लोपे ठस्येकादेशे भसंज्ञामल्लो तद्धितान्तत्वेन प्रातिपदिकत्वात्सौ रुत्वे विसर्गे च कृते 'देविकः' इति । 'घनिलचौ च' इति विकल्पेन घनि पूर्ववदेव द्वितीयादच ऊर्ध्वं लोपादिके घस्येयादेशे विभक्तिकार्ये 'देवियः' इति । इलच्यपि पूर्ववदेव लोपादिकार्ये 'देविलः' इति रूपम् । पक्षे तु—'अनुकम्पायाम्' इत्यनेन कनि कृते 'देवदत्तकः' इति रूपम् भवति । इत्थं देविकः देवियः, देविलः, देवदत्तकः, इति चत्वारि रूपाणि भवन्ति ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सत्या । ७६ । सत्यभामा इत्यत्र 'विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वक्तव्यः' इति वार्तिकेन उत्तरपदस्य भामाशब्दस्य लोपे विभक्त्यादिकार्ये 'सत्या' इति सिद्धम् ।

चतुर्थादनजादौ वा लोपः पूर्वपदस्य च । अप्रत्यये तथैवेष्ट उवर्णाल्ल इलस्य च । ५४ । अयं भावः—चतुर्थादचः ऊर्ध्वस्य लोपः, अनजादौ च विभाषालोपः, पूर्वपदस्य च विभाषालोपः, अप्रत्यये-विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपः । तथा उवर्णात्परस्य इलचो लोपः चकारेण ठाजादौ द्वितीयादच ऊर्ध्वं लोपः स्यादित्यर्थः । यथा—अनुकम्पितो बृहस्पतिदत्त इत्यर्थे बृहस्पतिकः । अनुकम्पितो देवदत्तः—देवदत्तकः, दत्तिकः, दत्तियः, दत्तिलः, दत्तकः, देवदत्तः, दत्तः, देवः । एवं सत्यभामा, भामा, सत्या । भानुदत्तः, भानुलः इत्यादि ।

उपेन्द्रदत्तकः । ४६ । अनुकम्पित उपेन्द्रदत्त इत्यर्थे प्रथमान्तादुपेन्द्रदत्तशब्दात् 'प्राचामुपादेरडज्वुचौ च' इत्यनेन अडच्, तथा वुच्प्रत्यये अनुबन्धलोपे 'ठाऽजादावूर्ध्वं द्वितीयादचः' परस्येकारदेर्लोपे 'युवोरनाकौ' इत्यनेनाकादेशे अल्लोपे प्रातिपदिकत्वात्स्वादिकार्ये 'उपडः, उपकः' इति रूपे । न च गुणे कृते द्वितीयादच ऊर्ध्वस्य जायमानो लोपो नकारादेः स्यादिति वाच्यम्, 'नेन्द्रस्य परस्य' इति ज्ञापकेन पूर्वोत्तरपदनिमित्तकार्यापेक्षयाऽन्तरङ्गस्याऽप्येसादेशस्य पूर्वमप्रवृत्त्या इकारादेरेव लोपविधानेनाक्षतेः । 'अस्मादेव घनि, घस्येयादेशेऽल्लोपे स्वादिकार्ये 'उपियः', इलचि—'उपिलः, ठचि—'उपिकः', कप्रत्यये उपेन्द्रदत्तकः—इति षड् रूपाणि भवन्ति ।

रासभकः । ४४ । रासभशब्दात् 'जातिनाम्नः कन्' इति सूत्रेण कनि विभक्तिकार्ये 'रासभकः' इति सिद्धम् ।

वाचिकः । ७४ । वाचा आशीः वागाशीः । वागाशिषा दत्तः इत्यर्थे 'बह्वचो मनुष्यनाम्नष्ठज्वा' इति ठचि एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्यः' इति वार्तिकेन वागित्येकाक्षरपूर्वपदात्परयोराशीर्दत्तशब्दयोर्लोपे ठस्य इकादेशे विभक्तिकार्ये 'वाचिकः' इति । लोपे कृते कुत्वादिकं तु न; भत्वेन पदत्वबाधात् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

षडिकः । ७९ । षडङ्गुलिदत्त शब्दात् बह्वचो मनुष्यनाम्नष्ठज्वा इति ठचि ठस्येकादेशे 'षषष्ठाजादिवचनात् सिद्धम्' इति वार्तिकेन उत्तरपदलोपे 'यस्येति च' इत्यलोपे विभक्तिकार्ये षडिकः इति ।

षषष्ठाजादिवचनात्सिद्धिमिति । ५९ । ननु यथा वाचिकः' इत्यत्र वागाशीर्दत्त इत्यर्थे 'वह्वचो मनुष्यनाम्नष्ठज्वा' इत्यनेन ठचि उत्तरपदस्य लोपे ठस्येकादेश इकप्रत्ययाश्रितभत्वेन पदत्वाभावात्कुत्वं जश्त्वञ्च न भवति । तथैव षडङ्गुलिदत्तः षडिक इत्यत्रापि उत्तरपदस्य लोपे इकप्रत्ययाश्रितभत्वेन पदत्वाऽभावाज्जश्त्वं न स्यादिति चेन्न । ठाजादावूर्ध्वं द्वितीयादचः' इति षष्शब्दस्य पूर्वपदत्वे द्वितीयादच ऊर्ध्वस्यैव लोपो न त्वयमुत्तरपदलोप इति वचनात् 'षडिक' इति सिद्धमित्यर्थः । तथा च उक्तप्रयोगे डकारादूर्ध्वस्य लोपे डकाराकारस्य भत्वात् 'यस्येति च' इति लोपे तस्य स्थानिवद्भावेन अकारान्तस्य इत्वमाश्रित्य भत्वे तेन अकारान्तेन षकारान्तस्य पदत्वाऽबाधाज्जश्त्वाभावे बाधकाभावः । अत एव 'स्वादिष्वसर्वनामस्थाने' इति सूत्रभाष्ये—'अकारान्तमेतत् संज्ञाम्प्रति तु षकारान्तम्' इति ।

वृक्षकः । ५५ । ह्रस्वो वृक्ष इत्यर्थे 'ह्रस्वे' इति कनि विभक्तिकार्ये 'वृक्षकः' इति सिद्धम् ।

कतमः । ५४ । बहूनां मध्ये एकस्य निर्धारणेऽर्थे किम्शब्दात् 'वा बहूनां जातिपरिप्रश्ने डतमच्' इति डतमच्प्रत्यये डित्वसामर्थ्यात् टेर्लोपे विभक्तिकार्ये 'कतमः' इति सिद्धम् ।

यतमः, ततमः । ६२,६८ । उभयत्र बहूनां मध्ये एकस्य निर्धारणेऽर्थे 'वा बहूनां जातिपरिप्रश्ने डतमच्' इति यत्शब्दात् तत्शब्दात् डतमच्प्रत्यये डित्वाट्टिलोपे विभक्तिकार्ये यतमः, ततमः—इति रूपद्वयं सिद्धं भवति । पक्षे 'अव्ययसर्वनाम्नामकच् प्राक्टेः' इत्यकचि यकः इति । 'तदोः सः' इति सत्वे च कृते 'सकः' इति भवति । महाविभाषया यः, सः, इत्यपि रूपे भवतः ।

।। इति प्रागिवीयप्रकरणम् ।।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अथ स्वार्थिकप्रकरणम्

वासुदेवः । ७१ । वासुदेवतुल्या जीविकार्था अविक्रेया प्रकृतिरित्यर्थः । अत्र 'संज्ञायां च' इति सूत्रेण कनि 'जीविकार्थे चापण्ये' इति तस्य लुपि विवक्तिकार्ये 'वासुदेवः' इति सिद्धम् ।

देवपथः । ७९ । देवपथ इव प्रतिकृतिरित्यर्थे इवे प्रतिकृतौ इति कनि देवपथादिभ्यश्च इति कनो लुपि प्रातिपदिककार्ये देवपथः इति सिद्धम् ।

मुख्यः । ७४ । मुखम् इव इत्यर्थे मुखशब्दात् 'शाखादिभ्यो यः' इति यप्रत्यये 'यस्येति च' इति यप्रत्यये 'यस्येति च' इति अकारलोपे विभक्तिकार्ये 'मुख्यः' इति ।

काकतालीयः । ६३, ७७ । काकतालमिव इत्यर्थे सुप्सुपेति समासे 'समासाच्च तद्विषयात्' इति छप्रत्यये छस्य ईयादेशे 'यस्येति च' इति अकारलोपे 'काकतालीयः' इति । कश्चित् काकः तालवृक्षस्य मूलं गतस्तत्र अकस्मात् तालपतनान्मृतः तथैव देवदत्तः निर्जनप्रदेशे क्वचिद् गतस्तत्र अकस्मात् चौरैः समागमस्तेन हतः अत्र काकतालसमागमसदृशश्चौरसमागमः इति समासार्थः, तत्प्रयुक्तः काकमरणसदृशस्तु ताद्धतप्रत्ययार्थः ।

आंगुलिकः । ७५ । अङ्गुलीवेत्यर्थे अङ्गुल्यादिभ्यष्ठक् इति ठीक कित्वादादिवृद्धौ ठस्य इकादेशे 'यस्येति च' इत्यकारलोये विभक्तिकार्ये 'आङ्गुलिकः' इति सिद्धम् ।

एकशालकः । ७६ । एकशालेवेत्यर्थे 'एकशालायाष्ठजन्यतरस्याम्' इति ठच्प्रत्यये ठस्य इकादेश 'यस्येति च' इति अकारलोपे विभक्तिकार्ये 'एकशालिकः' इति । पक्षे 'अङ्गुल्यादिभ्यष्ठक्' इति ठकि कित्त्वादादिवृद्धौ 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये 'ऐकशालिकः इति सिद्धम् ।

लौहितध्वज्यः । ७२ । लोहिताः ध्वजाः यस्य पूगस्य स लौहितध्वजः, स एव लौहितध्वजः । अत्र 'पूगाञ्ञ्योऽग्रामणीपूर्वात्' इति सूत्रेण ञ्यप्रत्यये ञित्वादादिवृद्धौ 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये 'लौहितध्वज्यः' इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

 CC-O. In Public Domain. Digitized by eGangotri

आयुधजीवि० । ४३ । 'आयुधजीविसङ्घाञ्ञ्यट् बाहीकेष्वब्राह्मणराजन्यात्' अत्र सूत्रे आयुधजीविसङ्घात्, ञ्यट्, बाहीकेषु, अब्राह्मणराजन्यात्, इति पदच्छेदः । तेन बाहीकेषु ये आयुधजीविसंघास्तद्वाचिनः प्रातिपदिकात् ञ्यट् प्रत्ययो भवति ब्राह्मणराजन्यान् वर्जयित्वा इत्यर्थः ।

क्षौद्रकी । ७८ । क्षुद्रको नाम कश्चिदायुधजीविनां बाहीकदेशवासिनां सङ्घः स एव पुमांश्चेत् क्षौद्रक्यः, स्त्री चेत् क्षौद्रकी । तथा च स्त्रीत्वविवक्षायां क्षुद्रकाशब्दात् 'आयुधजीविसङ्घाञ्ञ्यड् बाहीकेष्वब्राह्मणराजन्यात्' इत्यनेन स्वार्थे ञ्यट्प्रत्यये ञित्वादादिवृद्धौ यस्येति च' इत्याकारलोपे टिदन्तत्वात्ङीषि भसंज्ञायामकारलोपे 'हलस्तद्धितस्य इत्यनेनोपधाभूतस्य यकारस्य लोपे 'क्षौद्रकी' इति सिद्धम् ।

ननु कृतेऽकारलोपे कथमुपधात्वमिति चेत् ! यलोपे कर्तव्येऽल्लोपस्याभीयत्वेनासिद्धतया यकारस्योपधात्वसम्भवात् । नचाल्लोपस्य स्थानिवत्त्वं संशयम्, यलोपविधौ तन्निषेधात् । नचैवमपि 'आयुधजी व' इति सूत्रे 'व्रातच्फञोरस्त्रियाम्' इत्यतोऽस्त्रियामित्यनुवृत्तौ स्त्रियां ञ्यट् प्रत्ययाभावेनोक्तरूपं न सिद्धयेदिति वाच्यम्, टित्वविधानसामर्थ्यादत्रास्त्रियामित्यस्याननुवृत्तिकल्पनेनेष्टसिद्धेः ।

'दामन्यादित्रिगर्तषष्ठाच्छः । ९१ । दामन्यादिभ्यस्त्रिगर्तषष्ठेभ्यश्चायुधजीविसङ्घवाचिभ्यः स्वार्थे छप्रत्ययो भवतीत्यर्थः । तत्र त्रिगर्तषष्ठाः के इति, जिज्ञासायां सङ्कलय्याह मूले—

> 'आहुस्त्रिगर्तषष्ठांस्तु कौण्डोपरथदाण्डकी ।
> क्रौष्टुकिर्जालमानिश्च ब्राह्मगुप्तोऽथ जालकिः ॥

कौण्डोपरथः, दाण्डकिः, क्रौष्टुकिः, जालमानिः ब्राह्मगुप्तः, जालकिरित्येतान् त्रिगर्तषष्ठान् आहुरित्यर्थः । एतेषु कौण्डोपरथब्राह्मगुप्तशब्दौ शिवाद्यणन्तौ, शेषा इञन्ताः । तथा च एभ्यः छप्रत्यये भसंज्ञायामकारादिलोपे छस्येयादेशे प्रातिपदिकत्वात्स्वादिकार्ये—कौण्डोपरथीयः, दाण्डकीयः, क्रौष्टुकीयः, जालमानीयः, ब्राह्मगुप्तीयः, जालकीयः, इति षट्प्रयोगाः निष्पद्यन्ते ।

आभिजित्यः । ७७ । अभिजितोऽपत्यमाभिजितः स एव आभिजित्यः । अत्र 'आभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो यञ्' इति यञि

Sri Vidyabharathi Book Centre, Sringeri

 CC-O. In Public Domain. Digitized by eGangotri

ञित्वादादिवृद्धौ 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये आभिजित्यः इति सिद्धम् ।

शालावत्यः । ७४ । शालावतोऽपत्यं शालावतः, स एव शालावत्यः । 'अभिजिद्–' इति सूत्रेणात्र स्वार्थे यञ्प्रत्यये ञित्वादादिवृद्धौ भत्वादलोपे विभक्तिकार्ये उक्तं रूपं सिद्धम् ।

शामीवत्यः । ६१ । शमीवतोऽत्यं शमीवतः, स एव शामीवत्यः । अत्र 'अभिजिद्—' इति सूत्रेण स्वार्थे यञि पर्जन्यवल्लक्षणन्यायेन आदिवृद्धौ भत्वादलोपे विभक्तिकार्ये 'शामीवत्यः' इति सिद्धम् ।

कपोतपाकाः । ७५ । कपोतान् पचतीत्यर्थे घञि कपोतपाकः, एवेत्यर्थे 'व्रातच्फञोरस्त्रियाम्' इत्यनेन ञ्यप्रत्ययेऽनुबन्धलोपे सुब्लोपे 'ञ्यादयस्तद्राजाः' इत्यनेन तद्राजसंज्ञायान्ततः 'तद्राजस्य बहुषु तेनैवास्त्रियाम्' इत्यनेन प्रत्ययस्य लुकि तद्धितान्तत्वेन प्रातिपदिकत्वाज्जसि पूर्वसवर्णदीर्घादिके कृते 'कपोतपाकाः' इति सिद्धम् ।

द्विपदिकाम् । ७६ । द्वौ द्वौ पादौ ददातीति विग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इत्यनेन समासे सुब्लुकि द्विपाच्छब्दात् 'पादशतस्य सङ्ख्यादेर्वीप्सायां वुन् लोपश्च' इत्यनेन वुन् प्रत्यये प्रकृतेरन्त्यस्य लोपे अनुबन्धलोपे 'युवोरनाकौ' इत्यनेन वोरकादेशे 'पादः पत्' इत्यनेन पादः पद्भावे वुनः स्वभावात्स्त्रीत्वेन टापि सवर्णदीर्घे 'प्रत्ययस्थात्कात्पूर्वस्येदाप्यसुपः' इत्यनेन इत्वे सोरमि पूर्वरूपं 'द्विपदिकाम्' इति सिद्धम् । न च वुनाऽकादेशे यस्येति चेत्यनेनैव लोपसिद्धेरिह लोपविधानं व्यर्थमिति वाच्यम् तल्लोपस्य परनिमित्तकतया तस्य 'अचः परस्मिन्निति' स्थानिवत्त्वात् 'पादः पत्' इति पद्भावापत्तेः अनेन लोपे तु परनिमित्तकत्वाभावेन स्थानिवत्त्वाभावाक्षतेः ।

द्विमोदकिकाम् । ६८ । द्वौ द्वौ मादकौ ददातीति विग्रहे पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च' इति सूत्रस्य पादश ग्रहणमनर्थकम् अन्यत्रापि दर्शनात्' इति वार्तिकेन द्विमोदक शब्दात् वुनि वोरकादेशे यस्येति च' इत्यलोपे स्त्रीत्वाट्टापिइत्वे विभक्तिकार्ये द्विमोदकिकाम्' इति ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अणुकः । ६१ । अणुरेव अणुकः । अणुशब्दात् 'स्थूलादिभ्यः प्रकारवचने कन्' इति कन्प्रत्यये विभक्तिकार्ये 'अणुक' इति सिद्धम् ।

सामिकृतम् । ७२ । अत्र अनत्यन्तगतौ गम्यमानायां क्तान्तात् 'अनत्यन्तगतौ क्तात्' इत्यनेन कनि प्राप्तौ 'न सामिवचने' इत्यनेन तन्निषिध्यते । ननु समुदायस्य क्तान्तत्वं, कथमिति चेत् । सामीत्यस्य क्रियाविशेषणत्वेन कारकत्वात् समुदस्य क्तान्तत्वे, कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात् । न चेह अनत्यन्तगतेः प्रकृत्यैवोक्तत्वात् 'उक्तार्थानामप्रयोगः' इति न्यायेन पूर्वसूत्रबिहितस्य कनोऽप्राप्तौ तन्निषेधो व्यर्थ एवेति वाच्यम्, अस्मादेव निषेधात् अत्यन्तस्वार्थिकोऽपि कन् भावतीति ज्ञापनेनादोषात् । अन्यथैतद्वैयथ्यस्य वारयितुमशक्यत्वात् । एवञ्चात्यन्तस्वार्थिकस्याऽपि कनो निषेधात् । अप्राप्तस्य निषेधासम्भवेन अत्यन्तस्वार्थिका अपि कनः सन्तीति विज्ञायते । तेन बहुतरमेव 'बहुतरकम्' इत्यादि सिद्धम् ।

आशितङ्गवीनम् । ७७ । अशिता गावोऽस्मिन्निति विग्रहे 'अषडक्षाशितंग्वलङ्कर्मालम्पुरुषाध्युत्तरपदात्खः' इत्यनेन खप्रत्यये निपातनात्पूर्वस्य मुमि सुब्लोपे खस्य 'आयनेयी' त्यादिना ईनादेशे 'ओर्गुण' इत्यनेन गुणेऽवादेशे तद्धितान्तत्वेन प्रातिपदिकत्वात्सौ तस्यामाद्यादेशे कृते 'आशितङ्गवीनम्' इति सिद्धम् । अरण्यमित्यर्थः ।

ईश्वराधीनः । ७७ । ईश्वरे अधीनः ईश्वराधीनः । शौण्डादित्वाद् अधिशब्देन समासः । अतः अषडक्षाशित–इतिख प्रत्यये खस्येनादेशे विभक्तिकार्ये ईश्वराधीनः इति सिद्धम् ।

अर्वाक्, अर्वाचीनम् । ६४, ५६ । अर्वन्तमञ्चतीति विग्रहे अर्वञ्च शब्दात् स्वार्थे 'विभाषाऽञ्चेरदिक् स्त्रियाम्' इति सूत्रेण खप्रत्यये खस्य ईनादेशे प्रातिपदिकत्वेन स्वभावात् सामान्ये नपुंसकैवचनान्तत्वे च तस्यामादेशे पूर्वरूपे 'अर्वाचीनम्' इति ।

आनुगादिकः । ५८ । अनुगदतीत्यनुगादिः स एव आनुगादिकः । 'अनुगादिनष्ठक्' इति स्वार्थे ठकि कित्वादादिवृद्धौ 'यस्येति' इति टिलोपे विभक्तिकार्ये आनुगादिकः इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

चतुः । ७१ । चतुरशब्दात् द्वित्रिचतुर्भ्यः सुच् इति सुचि 'चतुर् स्' इति स्थिते 'रामस्य' इति सकारस्य लोपे सुलोपे रेफस्य विसर्गे 'चतुः' इति सिद्धम् ।

बहुधा । ७६ । आसन्नकालिकक्रियाजन्यगणनवृत्तेर्बहुशब्दात् 'विभाषा बहोर्धाऽविप्रकृष्टकाले' इति सूत्रेण धाप्रत्यये अव्ययत्वात् सुब्लुकि 'बहुधा' इति । पक्षे तु संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' इति कृत्वसुच्प्रत्यये कृते 'बहुकृत्वः' इति भवति । 'बहुधा बहुकृत्वो वा दिवसस्य भुङ्क्ते' दिवसे प्रातः सङ्ग्यावच्छ्रवहितकालिकोत्पत्तिविशिष्टा भोजनक्रियेत्यर्थः ।

तत्प्रकृतवचने मयट् । ७० । तदिति प्रथमान्तनिर्देशः प्राचुर्येण प्रस्तुतं प्रकृतं, तस्य वचनं प्रतिपादनं बोधनमिति यावत् । अत्र वचनमिति भावेऽधिकरणे वा ल्युट् । तथा च प्रकृत्यर्थस्य बोधने सति प्राचुर्यविशेषणकवस्तुवृत्तेः प्रथमान्तात्स्वार्थे मयट् प्रत्ययः स्यादित्यर्थः । तत्र भावल्युट्पक्षे—प्रकृतमन्नमिति विग्रहेऽन्नमयम् । अत्र अद्यत इत्यन्नमिति भावे ल्युट्, तस्य प्राचुर्ये मयटि सति उक्तं रूपं सिद्धयति । स्वार्थिकत्वात्प्रकृतिलिङ्गता । अधिकारणल्युट् पक्षे—अन्नमयो यज्ञः । अस्वार्थिकत्वेन प्रकृतिलिङ्गात्वाभावाद्वि शेष्यनिघ्ना 'इष्टिदु दशौदनाः पशौ तं सोमसहस्रमित्यादिवाक्यैरुच्यमानानि प्राचुर्यविशिष्टान्यन्नानीत्युक्तोदाहरणस्यार्थः ।

मोदकिकम् ।७५। मोदका प्रकृता इति विग्रहे समूहवच्च बहुषु' इति सूत्रेण सामूहिकप्रत्ययातिदेशे 'अचित्तहस्तिधेनोष्ठक्' इत्यनेन ठक्प्रत्यये कित्वादादिवृद्धौ ठस्य इकादेशे 'यस्येति च' इत्यकारलोपे विभक्तिकार्ये मोदकिकम् इति सिद्धम् ।

पाद्यम् । ६९ । पादार्थमुदकं पाद्यम् । 'पादार्घाभ्यां च' इति यत्प्रत्यये अलोपे विभक्तिकार्ये पाद्यम् इति सिद्धम् ।

नूत्नम् । ७८ । नव 'शब्दात् नवस्य नू आदेशो त्नप्तनप्खाश्च वक्तव्यः इति वार्तिकेन त्नप्प्रत्यये नवस्य नू आदेशे विभक्तिकार्ये 'नूत्नम्' इति । तनप्प्रत्ययपक्षे नूतनम् इति । ख प्रत्यये खस्य ईनादेशे प्रकृतेर्भावे ओर्गुणः इति गुणे अवादेशे विभक्तिकार्ये 'नवीनम्' इति ।

मणिकः । ७४ । मणिरेव मणिकः । 'यवादिभ्यः कन्' इति कनि विभक्तिकार्ये 'मणिकः' इति ।

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

लोहितिकः । ७५ । लोहित एवं लोहितकः । 'लोहितान्मणौ' इति स्वार्थे कनि विभक्तिकार्ये लोहितकः' इदि सिद्धम् ।

लौहिनिका । ७५ । लोहितशब्दात्स्त्रीत्वविवक्षायां 'वर्णादनुदात्तात्तोपधात्तो नः' इत्यनेन नत्वे ङीपि च कृते 'वर्णे चाऽनित्ये' इत्यनेन 'कन्प्रत्ययेऽनुबन्धलोपे 'केऽणः' इति ह्रस्वे 'अजाद्यतष्टाप्' इत्यनेन टापि सवर्णदीर्घे ङयाबन्तात्प्रातिपदिकात्सौ तस्य हल्ङ्यादिना लोपे 'लोहिनिका' इति सिद्धम् ।

ननु स्वार्थिकप्रत्ययानां परत्वादन्तरङ्गत्वाच्च नत्वसन्नियोगशिष्टं ङीपं बाधित्वा कनि लोहितकशब्दात् टापि 'प्रत्ययस्था' दितीत्वे लोहितिका इत्येव रूपं स्यान्न तु लोहिनिकेति चेत् ? सत्यम्, 'लोहितालिङ्गबाधनं वा' इत्यनेन स्त्रीलिङ्गबोधकप्रत्ययस्य विकल्पेन कना बाधादुभयरूपस्य निर्बाधात् । न च 'ङ्याप्प्रातिपदिकात्' इत्यत्र ङ्याब्ग्रहणेन ङयाबन्तात्तद्धितोत्पत्तिर्भवति न तु ततः प्राक्, एवञ्च ङीपः पूर्वं कनः प्राप्तिरेव नेति वार्त्तिकमिदं व्यर्थमिति वाच्यम् अस्मादेव लिङ्गात्स्वार्थिकतद्धितेषु ङयाब्ग्रहणस्याऽसम्बद्धत्वाऽवगमात् । नचैवमपि 'सुबन्तात्तद्धितोत्पत्तिरिति' सिद्धान्तात् 'कुत्सिते' इति सूत्रस्यभाष्याऽनुसारेण स्वार्थद्रव्यलिङ्गसंख्याकारककुत्सादिप्रयुक्तकार्याणां क्रमिकतया ङयाबन्तादेव सुपि ततः कनि लोहिनिकेति रूपसिद्धेर्वचनमिदं व्यर्थमेवेति वाच्यम्, अत एव स्वार्थिकप्रत्ययानां प्रातिपादिकादेव प्रवृत्त्यवगमादिति दिक् ।

औपयिकः ।७७। उपाय एव इत्यर्थे उपायशब्दात् 'उपायाद् ध्रस्वत्वं च' इति वार्तिकेन स्वार्थे ठकि प्रकृतेः दीर्घस्य ह्रस्वे च कृते किरयादादिवृद्धौ विभक्तिकार्ये औपयिकः इति ।

वाचिकम् । ६३ । वाच्शब्दात् 'वाचो व्याहृतार्थायाम्' इति स्वार्थिके ठकि ठस्य इकादेशे पर्जन्यवल्लक्षणन्यायेन कित्वादादिवृद्धौ विभक्तिकार्ये वाचिकम् इति ।

मृत्स्ना । ६५ । प्रशस्ता मृत् मृत्स्ना । अत्र 'सस्नौ प्रशंसायाम्' इति प्रशस्तायां मृदि वर्तमानात् मृच्छब्दात् स्वार्थे स्नप्रत्यये स्त्रीत्वाट्टापि विभक्तिकार्ये 'मृत्स्ना' इति सिद्धम् ।

बहुशः । ७६ । बहूनि ददाति इत्यर्थे बहुशब्दात् 'बह्वल्पार्थाच्छस्कारका-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

दन्यतरस्याम्' इति स्वार्थे शस्प्रत्यये अव्ययत्वात् सोर्लुकि सस्य रुत्वे विसर्गे 'बहुशः' इति सिद्धम् ।

अल्पं ददाति । ७३ । अत्र 'बह्वल्पार्थान्मङ्गलामङ्गलामङ्गलवचनम्' इति वार्तिकनिषेधात् 'बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्' इति कन्प्रत्ययो न भवति । अल्पं ददात्याभ्युदयिकेषु अभ्युदयं श्रेयः, तत्प्रयोजनकेषु इष्टापूर्तेषु इत्यर्थः ।

अतिग्रहाव्यथन० । ७६ । 'अतिग्रहाव्यथनक्षेपेष्वकर्तरि तृतीयायाः' अतिग्रहेषु अव्यथनेषु क्षेपेषु चार्थेषु अकर्तरि तृतीयान्तात् वा तसिः स्यादित्यर्थः । अतिक्रम्य ग्रहोऽतिग्रहः । यथा— चारित्रतोऽतिगृह्यते, चारित्रेण वा अतिगृह्यते । चरित्रमेव चारित्रं तेन हेतुना इतरविलक्षणत्वेन दृश्यन्त इत्यर्थः । अव्यथनम् अचलनम् । यथा— वृत्ततो न व्यथते वृत्तेन वा न व्यथते इति । वृत्तेन न चलतीत्यर्थः । क्षेपो निन्दा । यथा— वृत्ततः क्षिप्तः । वृत्तेन वा क्षिप्तः । वृत्तेन न चलतीत्यर्थः । अकर्तरि इति किम्, देवदत्तेनः क्षिप्तः । अत्र 'देवदत्ततः इति न भवति ।

प्रवाहिकातः । ७७ । रोगवाचिनः षष्ठ्यन्तात प्रवाहिका शब्दात 'रोगाच्चापनयने' इति सूत्रेण तसि प्रत्यये विभक्तिकार्ये 'प्रवाहिकातः कुरु' इति विषूचिकाप्रताकारमस्याः कुरु इत्यर्थः ।

कृष्णीकरोति । ६६ । अकृष्णः कृष्णः सम्पद्यते तं करोति कृष्णीकरोति । अत्र विकारभूतकृष्णशब्दात् 'कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः' इति अभूततद्भावे च्विप्रत्यये तस्मिन् परे 'अस्य च्वौ' इति सूत्रेण अवर्णस्य ईत्वे च्विंप्रत्ययस्यस्य इकारस्य उच्चारणार्थकत्वेन चकारवकारयोरित्संज्ञायां लोपे च जाते च्व्यन्तस्य अव्ययत्वात् सोर्लुकि 'कृष्णीकरोति' इति । अकृष्णं कृष्णरूपेण सम्पद्यमानं करोतीत्यर्थः ।

ब्रह्मीभवति । ७४ । अब्रह्म ब्रह्म सम्पद्यमानं भवतीत्यर्थे ब्रह्मन्शब्दात् 'कृभ्वस्तियोगे सम्पद्य कर्तरि च्विः' इति अभूतद्भावे च्विप्रत्यये सर्वापहारे अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वान्नलोपे 'अस्य च्वौ' इतीत्वे च्व्यन्तस्य अव्ययत्वात् सोर्लुकि उक्तं रूपं सिद्धम् । अत्यन्तस्वार्थिकानामेव प्रातिपदिकात् तद्धितोत्पत्तिः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

नतु सुबन्तादिति भाष्यनियमः । अतो न च्वेः प्रातिपदिकादुत्पत्तिः, किन्तु सुबन्तादेवेति बोध्यम् ।

दिवाभूता रात्रिः । ६८ । दिवेत्यकारान्तमव्ययमहनीत्यर्थे इह तु अहरित्यर्थे वर्तते । चन्द्रिकातिशयवशाद् अहरिवेत्यर्थः अत्र कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः इति च्वि प्रत्यये अव्ययस्य च्वावीत्वं नेति वाच्यम् । इति वार्तिकेन अस्य च्वौ इति प्राप्तस्य इत्वस्य निषेधे वेरपृक्तस्य इति वलोपे विभक्तिकार्ये दिवाभूता रात्रिः इति सिद्धम् ।

गार्गी भवति । ६९ । अगार्गी गार्ग्यः सम्पद्यमानो भवतीत्यर्थः । गार्ग्य शब्दात् कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः इति प्रत्यये अस्य च्वौ इति अवर्णस्य ईत्वे 'यस्येति च' 'क्यच्व्योश्च' इति य लोपे विभक्तिकार्ये गार्गी भवति इति ।

मात्रीकरोति । ६० । अमाता माता सम्पद्यते तं करोतीत्यर्थे 'कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः' इति सूत्रस्य 'अभूततद्भाव इति वाच्यम्' इति वार्तिकेन स्वार्थे च्विप्रत्ययेऽनुबन्धलोपे 'रीङृतः' इति सूत्रेण ऋतो रीङादेशे तद्धितान्तत्वेन 'अव्ययादाप्सुपः' इति सूत्रेण लुकि मात्रीकरोति इति सिद्धम् ।

उन्मनीस्यात् । ७७ । अनुन्मनाः उन्मनाः सम्पद्यते इत्यर्थे 'अरुमनश्चक्षुश्चेतोरहोरजसां लोपश्च' इति सूत्रेण अन्त्यलोपे च्विप्रत्यये च कृते 'अस्य च्वौ' इति दीर्घे अव्ययत्वात् सुब्लुकि उन्मनीस्यात् इति सिद्धम् ।

अग्नीभवति । ६६ । कृत्स्नं शस्त्रमग्निः सम्पद्यते इत्यर्थे 'विभाषा साति कार्त्स्न्ये' इति सूत्रेण सातिप्रत्यये 'सात्पदाद्योः' इति षत्वनिषेधे अव्ययत्वात् सुब्लुकि 'अग्निसाद्भवति' इति, विकल्पपक्षे कृभ्वस्तियोगे सम्पद्य कर्तरि च्विः' इति अभूततद्भावे च्विप्रत्यये सर्वापहारे 'अस्य च्वौ' इति ईत्वे 'अग्नीभवति' इति । 'समर्थानाम्—' इत्यतः वाग्रहणानुवृत्त्या विकल्पलाभे सिद्धे सूत्रे विभाषाग्रहणं तु अपवादेन मुक्ते औत्सर्गिकच्वेः समावेशार्थमिति 'अग्नीभवति' इत्यत्र च्विप्रत्यये न काप्यनुपपत्तिरिति दिक् ।

राजसात्सम्पद्यते । ७४ । अत्र 'तदधीनवचने' इति सम्पदा योगे राजन्शब्दाद् सातिप्रत्यये अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वान्नलोपे अव्ययत्वाद् सोलुंकि उक्तं रूपं सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

 CC-O. In Public Domain. Digitized by eGangotri

विप्रत्राकरोति । ६६ ६७ । विप्राधीनं देयं करोतीत्यर्थे 'देये त्रा च' इति सूत्रेण विप्रशब्दात् त्राप्रत्यये स्वरादेराकृतिगणत्वात् त्रान्तस्य अव्ययत्वेन सोलुंकि 'विप्रत्राकरोति' इति । अस्मिन्नेवार्थे उक्तसूत्रेण सातिप्रत्यये कृते तु 'विप्रसात्करोति' इति भवति ।

देवत्रा वन्दे । ४६ । देवान् वन्दे इत्यर्थे 'देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीया सप्तम्योर्बहुलम्' इति सूत्रेण त्राप्रत्यये अव्ययत्वात् सोलुंकि उक्तं रूपं सिद्धम् ।

पटपटाकरोति । ७७ । अव्यक्तानुकरणात् पटच्छब्दात् डाचि विवक्षिते 'डाचि विवक्षिते द्वे बहुलम्' इत्यनेन डाचः पूर्वं द्वित्वे पटत् पटत् इत्यस्यानेकाच्कार्थभागयुक्तत्वात् 'अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ डाच्' इत्यनेन कृञो योगे डाचप्रत्ययेऽनुबन्धलोपे नित्यमाम्रेडिते डाचीति वक्तव्यम्' इत्यनेन तकारपकारयोः स्थाने पकारस्यैकादेशे ततो डित्वादभस्यापि टेर्लोपे तद्धितान्तत्वेन प्रातिपादिकत्वात्सौ तस्य लुकि पटपटाकरोति इति सिद्धम् ।

शम्बाकरोति । ६५ । शम्बाशब्दः प्रतिलोमे वर्तते । ततश्च अनुलोमं कृष्टं क्षेत्रं पुनः प्रतिलोमं कर्षति इत्यर्थे 'कृञो द्वितीयतृतीयशम्बबीजात्कृषौ' इति सूत्रेण डाचप्रत्यये डित्वसामर्थ्यात् अभस्यापि टेर्लोपे अव्ययत्वात् सोलुंकि 'शम्बाकरोति' इति ।

बीजाकरोति । ७१ । बीजेन सह कर्षति इत्यर्थे 'कृञो द्वितीयतृतीयशम्बबीजात्कृषौ' इति सूत्रेण डाच्प्रत्यये डित्वसामर्थ्यात् अभस्यापि टेर्लोपे अव्ययत्वात् सोलुंकि 'बीजाकरोति' इति ।

सुखाकरोति । ७३ । चित्तानुवर्तनेन गुरुं सुखसम्पन्नं करोतीत्यर्थे 'सुखप्रियादानुलोम्ये' इति सूत्रेण सुखशब्दात् डाच्प्रत्यये डित्वसामर्थ्यात् अभस्यापि टेर्लोपे अव्ययत्वात् सोलुंकि 'सुखाकरोति' इति ।

मद्राकरोति । ६५ । माङ्गल्यमुण्डनेन संस्करोतीत्यर्थे 'मद्रात्परिवापणे' इति सूत्रेण मङ्गलपर्यायवाचकात् मद्रशब्दात् डाच्प्रत्यये डित्वसामर्थ्यात् अभस्यापि टेर्लोपे अव्ययत्वात् 'सोलुंकि मद्राकरोति' इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

भद्राकरोति । ६१ । मुण्डनेन संस्करोतीत्यर्थे 'भद्राच्चेति वक्तव्यम्' इति वार्तिकेन भद्रशब्दात् डाच्प्रत्यये डित्त्वसामर्थ्यात् अभस्यापि टेर्लोपे अव्ययत्वात् सोर्लुकि 'भद्राकरोति' इति ।

॥ इति स्वार्थिकप्रकरणम् ॥

—:०:—

अथ द्विरुक्तप्रकरणम्

वृक्षं वृक्षं सिञ्चति । ६३ । कृत्स्नं वृक्षमित्यर्थे वीप्साद्योत्ये 'नित्यवीप्सयोः' इति वीप्सायां द्वित्वे सिद्धम् ।

एकं बहुव्रीहिवत् । ६६ । द्विरुक्तः एक शब्दो बहुव्रीहिवत् स्यादित्यर्थः । बहुव्रीहिवत्त्वेन सुब्लोपपुंवद्भावौ सिद्ध्यतः । तत्र सुलोपस्योदाहरणम् —एकैकम् इति । पुंवत्त्वस्योदाहरणम्–एकैकया आहुत्येति ।

एकैकमक्षरम् । ६८ । प्रत्यक्षरमित्यर्थे वीप्साद्योत्ये 'नित्यवीप्सयोः' इति द्वित्वे एकम् एकम् इत्यवस्थायाम् 'एकं बहुव्रीहिवत्' इति बहुव्रीहिवद्भावेन सुपो लुकि वृद्धौ एकैकेति समुदायात् सौ तस्य अमादेशे पूर्वरूपे 'एकैकम्' इति । न च यत्र संघाते पूर्वो भागः पदं तस्य चेद् भवति तर्हि समासस्यैवे'ति समासग्रहणनियमेन समुदायस्य प्रातिपदिकत्वाभावात् कथमिह सुपो लुक्, कथं वा समुदायात् सुबिति वाच्यम्, बहुव्रीहिवद्भावादेव प्रातिपदिकत्वेन समुदायात् सुब्विधानेनादोषात् ।

एकैकया आहुत्या । ६६ । एकयेत्यस्य 'नित्यवीप्सयोः' इत्यनेन द्वित्वे कृते एकया-एकया-इति स्थिते 'एकं बहुव्रीहिवत्' इत्यनेन बहुव्रीहिवद्भावे द्वयोरपि 'सुपो धातुप्रातिपदिकयोः' इत्यनेन लुकि पूर्वखण्डस्य पुंवद्भावे ततो वृद्धौ समुदायात्पुनस्तृतीयोत्पत्तौ 'एकैकया' इति सिद्धम् । बहुव्रीहिवत्त्वाऽभावे तु सुपो लुक् पूर्वखण्डस्य पुंवद्भावश्च न स्यात् उत्तरपदपरकत्वाभावात्, उत्तरपदशब्दस्य हि समासस्य चरमावयवे रूढत्वात् । न च सुब्लुकि सति पूर्वखण्डस्य पुंवद्भावाऽभावेऽपि वृद्धौ 'एककैकता' इति सिद्धौ पुंवद्भावस्य न किञ्चित्प्रयोजनमिति वाच्यम्, 'तस्य 'पूर्वोऽवग्रहः' इति प्रातिशाख्येनाऽवग्रहे विशेषावगमात् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

एकैकस्मै देहि । ७८ । एकस्मै इत्यस्य 'नित्यवीप्सयोः' इत्यनेन द्वित्वे कृते 'एकं बहुव्रीहिवत्' इत्यनेन द्वयोरपि बहुव्रीहिवद्भावात्सुब्लोपे वृद्धौ प्रातिपदिकत्वान् ङे विभक्तौ सर्वनामसंज्ञायां स्मैभावे 'एकैकस्मै देहि' इति सिद्धम् ।

नन्वत्र बहुव्रीहिवत्त्वे 'न बहुव्रीहौ' इत्यनेन सर्वनामसंज्ञानिषेधात् कथं सर्वनामकार्यमिति चेत् ? मैवम्, विभाषा दिक्समासे बहुव्रीहौ' इत्यनेनैव बहुव्रीह्यनुवर्त्तनात्कार्यसिद्धौ पुनर्बहुव्रीहिग्रहणेन यत्र मुख्यो बहुव्रीहिस्तत्रैव निषेधो न त्वतिदिष्टबहुव्रीहाविति ज्ञापनेनादोषात् इति प्राचीनाः । वस्तुतस्तु बहुव्रीहावपि सर्वनामत्वस्य न बहुव्रीहौ इति सूत्रस्य प्रत्याख्याततया भाष्यसम्मतत्वेन बहुव्रीहिवत्त्वातिदेशे सत्यपि सर्वनामत्वस्य निर्बाधात् । सूत्रमतेऽपि उपसर्जनत्वादेव बहुव्रीहौ सर्वनामत्वनिषेधसिद्धौ बहुव्रीह्यर्थके अलौकिकविग्रहवाक्ये एव समासात्प्राक्सर्वनामत्वनिषेधे बहुव्रीह्यतिदेशप्रयुक्तसर्वनामकार्याभावशङ्काया एवाभावात् ।

गतगतः । ६६ । प्रियां बिना कालो गतः इति तात्पर्ये 'आबाधे च' इति सूत्रेण गत इत्यस्य द्वित्वे बहुव्रीहिवद्भावे च कृते समुदायस्य प्रातिपदिकत्वेन सुब्लुकि समुदायात् सौ रुत्वे विसर्गे 'गतगतः' इति सिद्धम् । बिरहात् पीड्यमानस्य इयमुक्तिः ।

गतगता । ७१ । 'आबाधे च' इत्यनेनात्र पीढायां द्योत्यानां गताशब्दस्य दित्वे बहुव्रीहिवद्भावे च कृते समुदायस्य प्रातिपदिकत्वेन सुब्लुकि 'स्त्रियाः पुंवत्—' इति पुंवद्भावे समुदायात् सौ हल्ङ्यादिना लोपे 'गतागता' इति ! प्रियेति शेषः । स्त्रीविरहात् पीड्यमानस्योक्तिः ।

परस्परम् । ७७ । अत्र परामिति स्त्रीत्वे तस्य द्वित्वे दलद्वयेऽपि पुंवत्त्वाट्टापो निवृत्तौ 'स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वा वक्तव्यः' इत्यनेनाम्भावविरहे 'असमासवद्भावे पूर्वपदस्थस्य सुपः सुर्वक्तव्यः' इत्यनेन पूर्वपदस्थस्य सुपः सुभावे रेफस्य विसर्गे 'कुप्वो' रिति प्राप्तमुपध्मानीयं प्रबाध्य कस्कादित्वात्सत्वे एकस्य सस्य लोपे समुदायात्सौ तस्यामादेशे कृते 'परस्परम्' इति सिद्धं भवति । Sri Vidyadhiraja Book Centre, Sringeri ...म् । आम्भावे तूभयत्र 'परस्पराम्' इति रूपं भवति ।

CC-O. In Public Domain. Digitized by eGangotri

इतरेतराम् । ७१ । इतरामित्यस्य 'कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये' इत्यनेन द्वित्वे 'दलद्वये टाबभावः' इत्युक्तत्वेन पुंवत्त्वाट्टापो निवृत्तौ उत्तरपदस्थविभक्तेः 'स्त्रीनपुंसकयोरुत्तरपदस्थायां विभक्तेराम्भावो वा वक्तव्यः' इत्यनेन आम्भावे समासवच्च बहुलम्' इत्यनेन नित्यनेन नित्यसमासवद्भावे पूर्वपदस्थविभक्तेर्लुकि गुणे प्रातिपदिकत्वात्सौ तस्यापि लुकि 'इतरेतराम्' इति सिद्धम् । आम्भावविरहे तु 'इतरेतरम्' इति रूपं भवति ।

'दलद्वये टाबभावः, क्लीबे चाऽद्ड्विरहः स्वमोः ।
समासे सोरलुक् चेति, सिद्धं बाहुलकात् त्रयम् ॥७६,७७॥

ननु 'कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये समासवच्च बहुलम्' इत्यत्र बहुलग्रहणस्य प्रयोजनं किमिति चेत् ? स्त्रीलिङ्गेषु अन्य-पर-इतरशब्देषु कर्मव्यतिहारे द्वित्वे सति 'अन्योन्यम्' इत्यादौ पूर्वोत्तरखण्डयोः टाब्निवृत्तिर्बहुलग्रहणस्य प्रथमं प्रयोजनम् । क्लीबे च अन्योन्यम्, इतरेतरम्, इत्यादौ 'अद्ड्डतरादिभ्यः' स्वमोः प्राप्तोऽत्ड्बाहुलकाद् न भवतीति तस्य द्वितीयं प्रयोजनम् । अन्येन आश्रयः अन्याश्रयः इत्यादौ सोर्लुक् प्राप्तः बाहुलकात् न भवतीति सोरलुक् चेति तृतीयं प्रयोजनम् इति दिक् ।

प्रियप्रियेण । ७६ । अत्र हि 'अकृच्छ्रे प्रियसुखयोरन्यतरस्याम्' इत्यनेन तृतीयान्तप्रियशब्दस्य विकल्पेन द्वित्वे 'कर्मधारयवदुत्तरेषु' इत्यधिकाराद् द्वित्वपक्षे कर्मधारयत्वात् तृतीयैकवचनसुपो लुकि पुनः समुदायात्तृतीयाविभक्तौ तस्येनादेशे णत्वे च कृते 'प्रियप्रियेण' इति सिद्धम् । पक्षे—प्रियेण इत्येव । अत्र च 'ददाति' इति क्रियापदमादाय अतिप्रियमपि वस्त्वनायासेन ददातीत्यर्थो बोध्यः ।

यथायथं ज्ञाता । ७७ । यथेत्यव्ययस्य 'यथास्वे यथायथम्' इत्यनेन द्वित्वे समुदायस्य क्लीबत्वे च कृते प्रातिपदिकात्सौ 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वे ततः सोरमि कृते 'यथायथम्' इति सिद्धम् ।

न च 'नित्यवीप्सयोः' इत्यनेनैव वीप्सया द्वित्वं सिद्धमिति वाच्यम्, द्वित्वविषयस्य शब्दस्य लक्षणमा कार्त्स्न्यविशिष्टे वृत्तावेव वीप्साया द्विर्वचनविधानात्, अन्यथा 'सर्वो घटः' इत्यादौ सर्वशब्दस्याऽपि द्वित्वापत्तिः स्यात् । न चैवमपि क्लीबत्वविधानं किमर्थमिति वाच्यम्, तदभावेऽव्ययत्वादलिङ्गत्वापत्तेः । ज्ञाते-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ण्यन्नतृन् प्रत्ययः, अत एव तद्योगे 'न लोके' ति षष्ठीनिषेधात् कर्मणि द्वितीया । तृजन्तत्वे 'यथायथस्य ज्ञाता' इति षष्ठ्यवेति दिक् ।

द्वन्द्व रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाऽभिव्यक्तिषु । ७६ । द्विशब्दस्य द्विर्वचनं, पूर्वपदस्याऽम्भावोऽत्वञ्चोत्तरपदस्य नपुंसकत्वञ्च निपात्यते एष्वर्थेषु इति सूत्रार्थः । यथा द्वन्द्वं मन्त्रयते, आचतुरं हीमे पशवो द्वन्द्व यज्ञपात्राणि प्रयुनक्ति, द्वन्द्वं संकर्षणवासुदेवौ । द्वन्द्वम् इति योगविभागादन्यत्राऽपि (स्वार्थे) इष्यते यथा—द्वन्द्वं युद्धं प्रवर्तते । द्वन्द्वानि सहते । अत्र शीतमुष्णं च च एकं द्वन्द्वम्, सुखं दुःखं चापरम्, क्षुत्तृष्णा चाऽन्यत् ।

द्वन्द्वम् । ७४ । द्वौ द्वौ भूत्वा मन्त्रयेते—द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमण-यज्ञपात्रप्रयोगाभिव्यक्तिषु इत्यनेन द्विशब्दस्य द्विर्वचने द्विद्वि औ इति दशायाम् कर्मधारयवद्भावात् सुब्लुकि कृते, पूर्वपदावयवस्य इकारस्य अम्भावे उत्तरपदा-वयवस्य इकारस्य अत्वे च कृते नपुंसकत्वे निपातनात् एकवद्भाव च तद्धितान्त-त्वेन प्रातिपदिकत्वात् सौ तस्यामादेशे कृते 'द्वन्द्वम्' इति साधु । नचोत्तरपदस्ये-कारस्य त्यदाद्यत्वेनैवात्वे सिद्धेऽत्र किमर्थं तद्विधानमिति वाच्यम्, संज्ञात्वेन सर्व-नामत्वाभावात् तदप्राप्तेः इति दिक् ।

॥ इति द्विरुक्तप्रकरणम् ॥

॥ इति तद्धितप्रकरणम् ॥

तिङन्त-प्रकरणम्

अथ भ्वादिप्रकरणम्

तत्रादौ दश लकाराः प्रदर्श्यन्ते । ननु दशः लकाराः प्रदर्श्यन्ते इत्यत्र छात्रा दश लकारान् पश्यन्ति, पाणिनिः प्रेरयतीत्यर्थे "हेतुमति च" इत्यनेन दृश् धातोर्णिचि कृते "दृशेश्च" इति वार्तिकेनः प्रयोज्यकर्तृश्छात्रस्य कर्मसंज्ञायां पाणिनिः छात्रान् दश लकारान् प्रदर्शयतीति रूपं भवति । पुनः पाणिनिना प्रेर्यंते इत्यर्थे कर्मणि लकारे कर्तव्ये कस्मिन् कर्मणि लकारेणात्र भाव्यमित्याकाङ्क्षायां

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri
"प्रयोज्यकर्मण्यन्येषाम्" इति नियमेन छात्ररूपे प्रयोज्ये कर्मण्येव लकारस्य भाव्यत्वेन; यस्मिन् प्रत्ययः स उक्तः, उक्ते प्रथमेति नियमेन छात्रशब्दात् प्रथमाविभक्तौ, अनुक्ते कर्मणि कर्तरि च द्वितीया तृतीयेति नियमेन लकारशब्दाद् द्वितीयाविभक्तौ, पाणिनिशब्दात्तृतीयाविभक्तौ च कृतायां पाणिनिना चात्र दशलकारान् प्रदर्श्यन्ते इति प्रयोगेण भाव्यमिति चेन्न, "अभिवादिदृशोरात्मनेपदे वेति वाच्यम्" इति वार्तिकेनात्मनेपदे प्रयोज्यकर्तुर्विकल्पेन कर्मत्वविधानादत्र च "भावकर्मणोः" इत्यनेनात्मनेपदविधाने यत्र पक्षे प्रयोज्यकर्तुः कर्मसंज्ञा न स्यात्तत्पक्षे प्रधाने कर्मण्येव लकारस्य भाव्यमानत्वेन प्रधानकर्मण उक्तत्वेन तद्रूपसिद्धेः ।

लः कर्मणि च भावे चाकर्मकेभ्यः । ३८ । वाक्यद्वयात्मकमिदं सूत्रम् । तत्र लः कर्मणि च इत्येकं वाक्यम् । 'भावे चाकर्मकेभ्यः' इति द्वितीयं वाक्यम् । चकारेण कर्तरि कृत् इत्यतः कर्तरीत्यनुकृष्यते । पूर्वं च सकर्मकविषयमकर्मकेषु कर्मणीत्यंशस्य बाधितत्वात् । भावे चेत्युत्तरवाक्येन तत्र विशेषविधानाच्च । तथा च लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युरकर्मकेभ्यो भावे कर्तरि चेति सूत्रार्थः । ननु भावकर्मणोरात्मनेपदविधानात् शेषात्कर्तरीति परस्मैपदविधानाच्च ज्ञापकात् लकाराणां भावकर्मकर्तारोऽर्था अनुमातुं शक्या एवेति किमनेन सूत्रेणेति चेत् न; असति अस्मिन् सूत्रे सकर्मकेभ्योऽपि भावे प्रत्ययापत्तौ घटं क्रियते देवदत्तेनेति प्रयोगापत्तेः ।

युष्मद्युपपदे सामानाधिकरण्ये स्थानिन्यपि मध्यमः । ४४ । उपोच्चरितं पदमुपपदं शाकपार्थिवादित्वात् मध्यमपदलोपी समासः । उपशब्दः सामीप्ये । न च समीप इत्येव सिद्धे उपपदग्रहणं व्यर्थमिति वाच्यम्, 'युष्मदीत्युच्यमाने 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति परभूते युष्मदि पूर्वस्य मध्यमः स्यात् न तु पूर्वभूते युष्मदि परस्य । उपपदग्रहणे कृते तु पूर्वभूतेऽपि युष्मदि मध्यमः भवति । समानमेकमधिकरणं यस्येति तस्मिन् समानाधिकरणे । अत्र अधिकरणशब्दोऽभिधेयवचनः । लकाराणां त्रिविधं हि अभिधेयम् । भावः, कर्ता, कर्म चेति । तत्र द्रव्यवाचिनोर्युष्मदस्मदोर्भाववाचिना लान्तेन समानाधिकरण्यासम्भवात् । एवं च कारकं तिङ्वाच्यम् । तेन तिङ्वाच्यकारकवाचिनी इत्यर्थो लभ्यते । स्थान-
Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अस्यास्तीति स्थानी। स्थान च प्रसङ्गः। कस्य स्थानम् इति प्रश्ने यस्यार्थो गम्यते शब्दो न प्रयुज्यते इत्युत्तरम्। ततः अप्रयुज्यमाने युष्मदि इत्यर्थो लभ्यते। अपि शब्दबलात् प्रयुज्यमाने इत्यपि सम्बध्यते। तेन तिङ् वाच्यकारकवाचिनि युष्मदि उपपदे अप्रयुज्यमाने प्रयुज्यमानेऽपि च मध्यमः स्यात् इत्यर्थो लभ्यते।

इदं च नियमार्थं सूत्रम्। तत्र उपपदनियमो वा पुरुषनियमो वा स्यात्। उपपदनियमस्तावत् युष्मद्युपपदे तिङः मध्यम एव। किन्तु अत्र पक्षे त्वया कुर्वता, त्वया कुर्वाणेन युष्मद्युपपदे शतृशानचौ न स्याताम्, तदर्थं यत्नान्तरम् कर्त्तव्यम्। अतः पुरुषनियमार्थमिदं सूत्रमिति दिक्।

प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च। ५४। अत्र सूत्रे 'प्रहासे च मन्योपपदे' इति एकः खण्डः यत्र भूतार्थाभावात् वचनेनैव केवलं तत्र वक्तुरभिप्रायाविष्करणे प्रहासो गम्यते। परिहास इति यावत्। 'मन्यतेरुत्तम एकवच्च' द्वितीयः खण्डः। तत्र प्रथमे युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः इत्यतः मध्यमः इत्यनुवर्तते। मन्यतिशब्दस्यैकदेशानुकरणं मन्येति श्यन् विकरणः मनु मनु अवबोधने इति। तथा च मन्यधातुरुपपदं यस्य धातोस्तस्मात् मध्यमः स्यात्, परिहासे गम्यमाने इत्यर्थो लभ्यते। ततः अस्मद्युत्तमः इत्यतः उत्तमः इत्यनुकृष्यते। तथाच मन्यतेस्तूत्तमः स्यात् स चैकार्थस्य वाचकः स्यात्। उदाहरणं यथा—एहि मन्ये ओदनं भोक्ष्यसे इति भुक्तः सोऽतिथिभिः। अत्र भुजेरुत्तमस्य स्थाने मध्यमः पुरुषः, मन्यतेस्तु मध्यमस्य स्थाने उत्तमः।

हलादिः शेषः—ननु मूलोक्तः अभ्यासस्यादिर्हल् शिष्यते, अन्ये हलो लुप्यन्ते इति सूत्रार्थो न युक्तः, 'पपाच' इत्यादौ अभ्यासस्यादिर्हल् वर्तते तत्र अन्यहलो लोपो भवतु किन्तु 'आट, आटतुः' इत्यादौ तु अभ्यासस्याद्यक्षरो हल् नास्ति तत्र कथं हलो लोपः स्यादिति चेदुच्यते—'ह्रस्वोऽहलादिः शेषः' इति संहितापाठे, अभ्यासस्य, ह्रस्वो भवतु। ततोऽभ्यासोऽहल् भवति अभ्यासस्यादिः च शिष्यते, वाक्यार्थत्रयेणाजादिधातुष्वपि न काप्यनुपपत्तिः। नच वाक्यभेदापत्तिः, फलमुखवाक्यभेदस्यादोषत्वात् इति दिक्।

बभूव। ६७। भूधातोः 'परोक्षे लिट्' इति लिटि इकारटकारयोरित्संज्ञायां लोपे च कृते 'भू ल्' इति स्थिते 'तिप्तस्झि' इति ल् स्थाने तिपि तत्स्थाने 'पर-

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

स्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति णलि अनुबन्धलोपे 'भू अ' इति दशायां नित्यत्वाद्गुणवृद्धी बाधित्वा 'भुवो वुग् लुङ्लिटोः' इति भूधातोर्वुगागमे अनुबन्धलोपे 'भूव् अ' इति जाते 'लिटि धातोरनभ्यासस्य' इति भूवो द्वित्वे 'भूव् भूव् अ' इति दशायां 'पूर्वोऽभ्यासः' इति पूर्वस्य 'भूव्' इत्यस्य अभ्याससंज्ञायां 'हलादिः शेषः' इति वलोपे 'ह्रस्वः' इत्यनेन ह्रस्वे 'भु भूव् अ' इति स्थिते 'भवतेरः' इत्यभ्यासोकारस्य अकारे 'भ भूव अ' इति स्थिते 'अभ्यासे चर्च' इत्यभ्याससंज्ञकस्य भस्य बकारे 'बभूव' इति सिद्धम्।

बभूविथ—भूधातोः 'परोक्षे लिट्' इति लिटि अनुबन्धलोपे 'भू ल्' इति स्थिते लस्य स्थाने मध्यम-पुरुषैकवचने सिपि 'लिट् च' इति सिपः आर्धधातुकसंज्ञाया 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सिपस्थलादेशे अनुबन्धलोपे 'आर्धधातुकस्येड्वलादेः' इति थस्य इडागमे अनुबन्धलोपे 'भू इ थ' इति दशायां 'भुवो वुग् लुङ्लिटोः' इति भुवो वुगागमे अनुबन्धलोपे 'भूव् इ थ' इति जाते 'लिटि धातोरनभ्यासस्य' इति द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायां 'हलादिः शेषः' इति वलोपे 'ह्रस्वः' इत्यनेन अभ्यासस्य ह्रस्वे 'भु भूव् इ थ' इति जाते 'भवतेरः' इत्यभ्यासस्योकारस्य अकारे 'भ भूव् इ थ' इति स्थिते 'अभ्यासे चर्च' इति भस्य बत्वे 'बभूविथ' इति सिद्धम्।

पुगन्तलघूपधस्य च। ननु 'पुगन्तलघूपधस्य च' इत्यत्र यदि 'सार्वधातुकार्धधातुकयोः' इत्यस्याङ्गविशेषणत्वं तर्हि सार्वधातुकाव्यवहितस्याङ्गस्येको गुणो भवतीत्यर्थस्तदा भिनत्तीत्यत्रापि गुणापत्तिः। इकः विशेषणत्वे तु सार्वधातुकार्धधातुकाव्यहितपूर्वत्वविशिष्टस्याङ्गस्य पुगन्तलघूपधस्य चाङ्गावयवस्येको गुण इत्यर्थः। तर्हि 'भेत्ता' इत्यत्रापि गुणो न स्याङ्ककाररूपस्यैकवर्णस्य व्यवधानेन सार्वधातुकाऽव्यवहितत्वाऽभावादिति चेन्न; येन नाव्यवधानं तेन व्यवहितेऽपि भवति' इति। यद्वर्णकर्तृकावश्यव्यवधानम् तद्वर्णव्यवधानेऽपि भवतीति तदर्थः। तथाच सूत्रसार्थक्यायैकवर्णव्यवधाने प्रवृत्तावप्यनेकवर्णव्यवधानेःप्रवृत्त्या 'भेत्ता' इत्यत्र गुणो जातः, भिनत्ती' त्यादौ तदभावश्च। 'दीधीवेवीटाम्' इत्यत्रत्येड्ग्रहणस्यैवात्र ज्ञापकत्वम्। यथा गुणाऽभावार्थमेटो ग्रहणम्, उक्तरीत्या गुणाऽभावोपपादनेन व्यर्थमेवेटो ग्रहणं, ज्ञापिते तत्कार्यं सर्वं सुस्थम्।

Sri Vidyabharathi Book Centre, Sringeri

 CC-O. In Public Domain. Digitized by eGangotri

वस्तुतस्तु—पुकि अन्तः पुगन्तः, लघ्वी चासावुपधा लघूपधा। पुगन्तश्च लघूपधा च अनयोः समाहारः पुगन्तलघूपधम्, तस्य पुगन्तलघूपधस्येति समाहार-द्वन्द्वः। सार्वधातुकार्धधातुकयोरित्यत्रोत्थिताकांक्षत्वात् अङ्गस्येति विशेषणम्। तेन सार्वधातुकार्धधातुकनिमित्तकाङ्गसंज्ञकस्यावयवभूतो यः पुगव्यवहितपूर्वोऽन्त-स्तस्य अवयवभूता या लघ्वी उपधा तस्याश्च गुणः इत्यर्थकरणेन भिनति इत्यादौ गुणे जातेऽपि न रूपहानिरिति भाष्ये स्थितमिति दिक्।

भविता। ६८। सत्तार्थक-भू धातोर्लुटि तत्स्थाने तिपि अनुबन्धलोपे शप-मपवाद्य 'स्यतासी लृलुटोः' इत्यनेन तासिप्रत्यये तस्य 'आर्धधातुकं शेषः' इत्यनेन आर्धधातुकसंज्ञायाम्' 'आर्धधातुकस्येड्वलादेः' इत्यनेन इडागमे अनुबन्धलोपे 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणेऽवादेशे लुटः प्रथमस्य डारौरसः' इत्यनेन तिपो डादेशे डित्वसामर्थ्यादभस्यापि टेर्लोपे 'भवित् आ' इत्यवस्थायां 'पुगन्तल-घूपधस्य च' इत्यनेन इटो गुणे प्राप्ते 'दीधीवेवीटाम्' इत्यनेन तन्निषेधे भविता इति सिद्धम्।

नन्वत्राङ्गावयवस्येकस्तदुपरितनहला व्यवधानात् सार्वधातुकपरत्वाभा-वादिको गुणस्याऽप्राप्तौ तन्निषेधो व्यर्थ इति चेत्? न; वचनारम्भसामर्थ्येन यत्कर्तृकावश्यकव्यवधानं तेन व्यवहितेऽपि परनिमित्तं कार्यं भवति इति ज्ञाप-नात्। नच व्यवहितस्यापीको गुणप्रवृत्तिस्वीकारे भिनत्ति, छिनत्तीत्यादावपि गुणप्रसङ्ग इति वाच्यम्, स्त्रवारितार्थ्यायैकवर्णव्यवधाने प्रवृत्तावप्यनेकवर्णव्यव-धाने प्रवृत्तौ बीजाभावात्।

भवतात्। ७०। भू-धातोर्लोटि तत्स्थाने तिपि, अनुबन्धलोपे सार्वधातु-कसंज्ञायां 'कर्तरि शप्' अनुबन्धलोपे 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे अवा-देशे 'एरुः' इत्यनेनेकारस्योकारे 'तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्' इत्यनेन पर-त्वादनेकाल्त्वात्सर्वादेशे तातङि 'भवतात्' इति सिद्धम्। न च 'ङिच्च' इत्यस्य यत्र प्रवृत्तिस्तत्र सर्वत्रानेकाल्त्वस्य प्रवृत्तौ निरवकाशत्वेनापत्त्वादुकारस्यैव तात-ङादेशे इष्टरूपं न सिद्ध्येदिति वाच्यम्, अनन्यार्थङित्त्वेषु 'सखा' इत्यादावनङादिषु लब्धप्रयोजनकस्य ङिच्चेत्यस्य, द्विष्टात्, स्तुतात्, उष्टात् इत्यादिषु क्रमेण गुणवृद्धि-प्रतिषेधसम्प्रसारणाद्यर्थतया सम्भवत्प्रयोजनङकारे तातङि मन्थरं प्रवृत्तः, अनेका-ल्त्वेन सर्वादेशत्व[illegible] Sri Vidyabharathi Book Centre, Sringeri [illegible]ल्त्वात् इति दिक्।

CC-O. In Public Domain. Digitized by eGangotri

भवानि । भूधातोः लोट् च' इति 'आशिषि लिङ्लोटौ' इति वा लोटि तत्स्थाने 'तिप्तस्झि०' इत्यादिना मिपि अनुबन्धलोपे 'भू मि' इति स्थिते 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकसंज्ञायां 'कर्तरि शप्' इति शपि अनुबन्धलोपे शपः सार्वधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे 'भव मि' इति दशायां 'लोटो लङ्वत्' इति लङ्कार्यातिदेशे 'तस्थस्थमिपां तान्तन्तामः' इति मिपोऽमादेशे प्राप्ते तं प्रबाध्य 'मेर्निः' इति मेर्न्यादेशे इकारोच्चारणसामर्थ्यादिकारस्येत्वाऽभावे 'आडुत्तमस्य पिच्च' इत्याटि अनुबन्धलोपे सवर्णदीर्घे 'भवानि' इति सिद्धम् ।

लोटो लङ्वत् । अत्र लोटः इति उपनेये षष्ठीदर्शनात् लङ्शब्दात् षष्ठ्यन्तात् वतिः । तेन लोटः लङ इव कार्यं स्यादित्यर्थो भवति । अर्थात् यथा लङि तामादयो भवन्ति तथा लोट्यपि भवन्ति । किन्तु लङि परतः अङ्गस्य विधीयमानौ अडाटौ लोटि न भवतः । नचैमपि लङः यत्कार्यं तस्य सर्वस्य विनिगमनाविरहादतिदेशः स्यात् एवञ्च यान्तु वान्तु इत्यत्र लङः शाकटायनस्य इति जुस्, जुहवतु विदन्तु इत्यत्र सिजभ्यस्त इति जुस्च स्यादिति वाच्यम् । लङ्लोड्विधानेन सिद्धे लोटो लङ्वत् इत्यादिदेशेन बोधनस्य लङ्सम्बन्धिकार्यविधानस्यातिदेशकत्वेनानित्यत्वज्ञापनार्थत्वात् । न च विदो लटो वेत्यतो वेत्यस्याकर्षणेनास्य व्यवस्थितविभाषात्वं कल्प्यमिति वाच्यम् ।

'देवत्रातो गलो, ग्राहः इति योगे च सद्विधिः ।
मिथस्ते न विभाषन्ते गवाक्षः संशितव्रतः ।

इति व्यवस्थितविभाषापरिगणनविरोधात् । नच लङः शाकटायनस्य इति सूत्रे लङ्पदाभावेऽपि यासुट् परस्मैपदेषु इत्यतः ङिद्ग्रहणमनुवर्त्य षष्ठ्या विपरिणम्य च आदन्तात् परस्य ङितो झेर्जुस् वेत्यर्थेन लुङि सिचा लृङि स्यप्रत्ययेन व्यवधानात् लिङि जुसः विधानात् च परिशेषात् लङि एव झेर्जुसः सिद्धौ सूत्रे लङ्ग्रहणं व्यर्थं सत् योगविभागार्थं भविष्यति । तेन 'ङिदेव यो लङ् तस्य ग्रहणं' नन्वतिदेशेन यो लङ् तस्य' इति व्याख्यानेन लोटि यस्य सिजभ्यस्त इत्यस्य चाप्रवृत्तिरिति वाच्यम्, अदुः इत्यत्र सिजभ्यस्त इति नित्यजुसं प्रबाध्य शाक-

Sri Vidyabharathi Book Centre, Sringeri

 CC-O. In Public Domain. Digitized by eGangotri

टायनस्येति विकल्पबाधनार्थं लङ्ग्रहणस्यावश्यकत्वेन तथा नियमासम्भवात्। न च आतः इत्यनेन अदुः इत्यत्र नित्यं जुस् स्यादिति वाच्यम्, तस्य नियमार्थत्वेन विध्यर्थत्वासम्भवात्। नच आतः इति सूत्रमावर्त्य विध्यर्थता नियमार्थता च व्याख्यायेत इति वाच्यम्, जुह्वतुः विदन्तु इत्यादौ जुसापत्तेस्तादवस्थ्यात्। अतः आतिदेशिककार्यस्यानित्यत्वज्ञापनपक्षः समीचीन इति दिक्।

भवेत्। ६३। भूधातोः 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' इति लिङि लिङः स्थाने 'तिप्तस्झि०' इत्यादिसूत्रेण तिपि अनुबन्धलोपे 'भू ति' इति स्थिते तिपः सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे 'भू अ ति' इति स्थिते शित्वात् 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे 'भवति' ततः 'इतश्च' इतीकारलोपे 'यासुट्परस्मैपदेषूदात्तो ङिच्च' इति यासुटि अनुबन्धलोपे सुट्तिथोः इति 'लिङः सलोपोऽनन्त्यस्य' इति सकारद्वयस्य लोपे 'अतो येयः' इति यासः स्थाने इयादेशे 'भइय् त्' इति जाते आद्गुणः' इति गुणे 'लोपो व्योर्वलि' इति यलोपे 'भवेत्' इति सिद्धम्।

न चात्र सुटा यासुटो बाधात् कथं यासुट् इति वाच्यम्, लिङो यासुट् तकारथकारयोः सुट् इति विषयभेदे बाधाभावात्, विषयैक्ये बाध्यबाधकभावः, नतु विषयभेदे इति सिद्धान्तात् इति दिक्।

यासुटो ङित्करणस्य प्रयोजनम्। ६७। ननु लिङ्वृत्तिङित्वस्य यदागमन्यायेन तिप्यतिदेशेन पुनः यासुटः ङित्करणं व्यर्थम्। नच अनल्विधौ इति निषेधः स्यादिति वाच्यम्, न ल्यपीति सूत्रारम्भेण अनुबन्धकार्येऽनल्विधाविति निषेधो न प्रवर्तते इति ज्ञापनेन प्रकृते तदप्रवृत्तेः। अन्यथा प्रदाय इत्यत्र क्त्वावृत्तिकित्वस्य ल्यप्यतिदेशेन घुमास्थेतीत्वाप्त्या न ल्यपीति सूत्रं व्यर्थं स्यादिति चेन्न, ङित्करणं व्यर्थं सद् ज्ञापकं भवति यत् क्वचिदनुबन्धकार्येऽपि अनल्विधाविति प्रतिषेधः प्रवर्तते इति अदोषात्। यदि तु 'पिच्च ङिच्च पिन्न' इति भाष्यात् युयात् इत्यत्र वृद्धिवारणाय यासुटो ङित्करणमित्युच्यते तदा श्नः शानचः ङित्वेन क्वचिदनुबन्धकार्येऽपि अनल्विधाविति निषेधः प्रवर्तते इति ज्ञापनात्। अन्यथा श्नावृत्तिङित्वस्य शानचि अतिदेशेन शानचः ङित्करणं व्यर्थं स्यादिति दिक्।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सार्वधातुके किं चिकीर्ष्यात् । ननु अतो येय इत्यत्र 'रुदादिभ्यः सार्वधातुके' इति सूत्रात् सार्वधातुके इति पदाननुवृत्तौ अपि अतः परस्य या इत्यस्य इय् स्यादित्यर्थेन सकलेष्टसिद्धौ सार्वधातुकग्रहणं व्यर्थमिति चेन्न, सार्वधातुकपदाभावे भव या त् इत्यवस्थायाम् अतो येयं बाधित्वा 'अतो दीर्घो यञि' इति दीर्घापत्तेः । चिकीर्ष्यात् इत्यत्र च अतोलोपं प्रबाध्य यासः इयादेशापत्तिः । न च अतो दीर्घो यञि इति सूत्रं प्रबाध्य अतो येय इति इयादेशः कुतो नेति वाच्यम्, मध्ये पठिता ये अपवादाः ते पूर्वान् विधीन् बाधन्ते नोत्तरान् इति परिभाषया अतो येयः इति अतो लोपः इत्यस्यैव बाधकः न तु अतो दीर्घो यञि इत्यस्य, अतः सार्वधातुके इति पदानुवृत्तिः कर्तव्या । तेन भवेत् इत्यत्र इयादेशः । आर्धधातुके आशीर्लिङि चिकीर्ष्यात् इत्यत्र न इयादेश इति दिक् ।

भवेयुः—भूधातोर्लिङि झौ शपि यासुटि अनुबन्धलोपे गुणे अवादेशे झेर्जुसि भव यास् उस् इति स्थिते 'लिङः सलोपोऽनन्त्यस्य' इति सलोपे परत्वात् नित्यत्वाच्च उस्यपदान्तात् इति सूत्रं प्रबाध्य अतो येयः इति इयादेशे गुणे रुत्वे विसर्गे भवेयुः इति सिद्धम् । न च अल्पापेक्षत्वेन उस्यपदान्तात् इत्यस्य अन्तरङ्गत्वात् सार्वधातुकापेक्षत्वेन बह्वपेक्षत्वात् अतो येयः इत्यस्य बहिरङ्गत्वेन असिद्धत्वात् पररूपमेव न्याय्यमिति वाच्यम्, अतो येयः इत्यस्य अतः परस्य यास् इत्यस्य इय् स्यादित्यर्थेन पररूपप्राप्तेः प्राक् इयादेशे रूपसिद्धेः । न चैवं येयः इति न सिध्येत इति वाच्यम्, येयः इत्यत्र सन्धेरार्षत्वकल्पनेनादोषात् ।

भूयात्—भूधातोः 'आशिषि लिङ्लोटौ' इति लिङि तत्स्थाने तिप्तसुझि इत्यादिना तिपि 'लिङाशिषि' इति आर्धधातुकत्वात् शपोऽभावे 'भू ति' इति स्थिते 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति यासुटि अनुबन्धलोपे 'भू यास् ति' इति दशायाम् 'इतश्च' इति तिप इकारस्य लोपे 'किदाशिषि' इति यासुटः कित्त्वेन 'स्कोः संयोगाद्योरन्ते च' इति सलोपे 'भूयात्' इति दशायां 'सार्वधातुकार्धधातुकयोः' इति गुणे प्राप्ते यासुटः कित्वेन 'क्ङिति च' इति निषेधे भूयात् इति सिद्धम् ।

अस्तिसिचोऽपृक्ते ४०—अस्ति च सिच् चेति समाहारद्वन्द्वे अस्तिसिच् तस्मादिति विग्रहः । 'ब्रुव ईट्' इत्यतः ईडित्यनुवर्तते 'तस्मादित्युत्तरस्य' इति परि-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

भाषया 'अस्तिसिचः तस्मादिति इति पञ्चमी 'अपृक्तस्ये' ति षष्ठीं प्रकल्पयति। ततश्च अस्तेः सिचश्च परस्याऽपृक्तस्य ईडागमः स्यादित्यर्थं इति प्राञ्चः। नव्यास्तु अस्तेर्लुङि भूभावे अभूदिति न स्यात्, तत्र स्थानिवत्वेनारिततया तत्राऽपृक्तस्य हल ईडागमस्य दुर्वारत्वात्। तथा—अगात्, अस्थात्, इत्यादावपि 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इत्यनेन सिचो लुक्यपि स्थानिवत्वेन सिचः परत्वादीडागमः स्यादतः सिच्च अस् चेति समाहारद्वन्द्वः। ननु सिचस्शब्दे सिच्शब्दस्य पूर्वखण्डस्यान्तर्वर्तिविभक्त्या पदत्वात् 'चोः कुः' इत्यनेन कुत्वापत्तिरिति चेत्? न, भत्वेन पदत्वस्य बाधात्। न चैवं सिचस्शब्दे असित्यनेनैवास्तेर्लाभादस्तिग्रहणं व्यर्थमिति वाच्यम्, लुप्तसुप्विभक्तिकस्यास्तीतिविभक्तिप्रतिरूपकाव्ययस्य ग्रहणेन तस्यैव कर्मधारये सति सार्थक्यात्। पञ्चम्याश्च न सौत्रत्वाल्लुक्। 'उतो वृद्धिर्लुकि हलि' इत्यतोऽनुवृत्तस्य हलीत्यस्य षष्ठ्या विपरिणामः। तथा च - विद्यमानात्सिचोऽस्तेश्च परस्यापृक्तस्य हल ईडागमः स्यादित्यर्थो भवतीति दिक्।

अभूत्। ५६। सत्तार्थकभूधातोर्लुङि तत्स्थाने तिपि अनुबन्धलोपे 'लुङ् लङ् लृङ्क्ष्वडुदात्तः' इत्यनेन अडागमे, शपमपवाद्य 'च्लि लुङि' इत्यनेन च्लिप्रत्यये तस्य 'च्लेः सिच् इत्यनेन सिजादेशे अनुबन्धलोपे 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इत्यनेन सिचो लुकि 'इतश्च' इतीकारलोपे 'अभूत्' इति सिद्धम्। अत्र 'सार्वधातुकार्धधातुकयो' रित्यनेन गुणस्तु न भवति 'भूसुवोस्तिङि' इति निषेधात्। न च 'अस्तिसिचोऽपृक्ते' इत्यनेन ईट् कथन्नेति वाच्यम्, विद्यमानात्सिचः परस्य हल ईड्विधानेन प्रकृते सिचो लोपात्। 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति तु न, 'न लुमताङ्गस्य' इत्यनेन निषेधात्।

लिङ् निमित्ते 'हेतुहेतुमतोर्लिङ्' 'इच्छार्थेषु लिङ्लोटौ' इत्यादि लिङो निमित्तं, तस्मिन् 'लिङ् निमित्ते'। क्रियाया अतिपत्तिः=अनिष्पत्तिः, क्रियातिपत्तिः तस्यां क्रियातिपत्तौ। 'भविष्यति मर्यादावचनेऽवरस्मिन्' इत्यतो भविष्यतीत्यनुवर्तते। ततश्च—'हेतुहेतुमद्भावादि लिङ्निमित्तं तत्र भविष्यत्यर्थे लृङ् स्यात् क्रियाया अनिष्पत्तौ गम्यमानायाम्' इत्यर्थः पर्यवस्यति। उदाहरणं तु 'सुवृष्टिश्चेद् अभविष्यत् तदा सुभिक्षम् अभविष्यत्' इत्यादि। अत्र हेतुहेतुमद्भावे गम्यमाने लिङर्थे भूधातोर्लृङ् निष्पद्यते इति तात्पर्यम्।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

प्रणिभवति । ४५ । प्रनि उपसर्गात् भूधातोर्लटि तिपि शपि अनुबन्धलोपे 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे 'शेषे विभाषाऽकखादावषान्त उपदेशे' इति णत्वे 'प्रणिभवति' इति णत्वाभावे 'प्रनिभवति' इति । ननु णत्वप्रकरणस्य संहिताधिकारस्थत्वात्, अविवक्षितायां संहितायाम् उपसर्गात् परत्वाऽभावेन णत्वाऽभावः, विवक्षायां तु णत्वमिति विकल्पसिद्धेः किमिह सूत्रे 'विभाषा'-ग्रहणेनेति चेन्न,

संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥इति सिद्धान्तात् ।

अस्यार्थः—१. एकपदे संहिता नित्या, २. धातूपसर्गयोः संहिता नित्या, ३. समासे संहिता नित्या, ४. (किन्तु) वाक्ये सा (संहिता) विवक्षाम्, अपेक्षते । यथा—१. पौ + अकः पावकः, २. अधि + आस्ते = अध्यास्ते, ३. सुधीभिः + उपास्यः सुध्युपास्यः, ४. देवी + उवाच देव्युवाच ।

कृञ्चाऽनुप्रयुज्यते लिटि । ४६ । अत्र कृञा एव भ्वस्त्योरपि ग्रहणम्, यद्युक्त-सूत्रतः कृञ एकस्यैवानुप्रयोगः स्यात्तर्हि 'आम्प्रत्ययवत्कृञोऽनुप्रयोगस्ये' ति सूत्रे 'अनुप्रयुज्यमानस्ये' त्यस्य 'कृञ' इति विशेषणं व्यर्थं स्यात्, धात्वन्तरस्याऽनु-प्रयोगाऽप्रसक्तेः । ततश्च 'कृञ' इति विशेषणादन्यस्याऽपि प्रयोगो भवतीति विज्ञा-यते । तथा च 'कृभ्वस्तियोगे सम्पद्यकर्त्तरि च्विः' इत्यतः 'कृञो द्वितीयतृतीय-शम्बबीजात्कृषौ' इति सूत्रस्थञकारेण प्रत्याहाराश्रयणात्कृभ्वस्तयो लभ्यन्ते । न च कृञ्चेति चकारेणैवाऽनुप्रयोगोऽन्यस्य कथं न कल्प्यत इति वाच्यम् धातोराम् स्यात्, अनुप्रयुज्यते च लिट्परः कृञित्यर्थसमर्पकतया तस्योपक्षीणत्वात् । न च 'कृभ्वस्ति-योगे' इत्यस्य 'कृञो द्वितीये' त्यस्य च सूत्रस्य मध्ये 'अभिविधौ सम्पदा चे' ति पठितम्, एवञ्च कृञ्प्रत्याहारे सम्पदोऽपि ग्रहणं स्यादिति वाच्यम्, तस्यानन्वितार्थ-त्वेनाऽनुप्रयोगासम्भवात् । नन्वाऽनुप्रयुज्यमानानां कृभ्वस्तीनामाम्प्रकृत्या कथम-भेदान्वय इति वाच्यम्, सामान्यविशेष-भावाऽभ्युपगमेन अभेदान्वयस्य लोकसिद्धत्वेन दोषाभावात् । नन्वेवमपि येन कृञोऽस्याऽनुप्रयोगः कथ्यते तस्य प्रयोजनमेव नास्ति 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इत्यनेनैवात्मनेपदविधानसिद्धेरिति वाच्यम्, कृञः परगामिनि क्रियाफले परस्मैपदवारणाय तस्यावश्यकत्वादिति दिक् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

आवौ मकारस्य नेत्वम्। ननु 'इजादेश्च गुरुमतोऽनृच्छः' इत्येतत्सूत्रविहिताऽऽम्घटकमकारस्य हल्त्वेन इत्संज्ञा स्यादिति चेद् ? न आस्धातो कास्धातोश्च 'दयायासश्च' 'कास्प्रत्ययादाममन्त्रे लिटि' इति आम्विधानसामर्थ्यात्। यद्यत्र मकारस्येत्संज्ञा स्यात्तदा आस्धातोः कास्धातोश्चाऽऽम्विधानं व्यर्थं स्यात्तत्रापीत्संज्ञाया दुर्वारत्वादिति तत्सामर्थ्यादित्संज्ञाऽभावकल्पनेन प्रकृते न काप्यापत्तिः। न च मित्त्वादन्त्यादच: परत्वसामर्थ्यादसंजातविरोधिन्यायेन सवर्णदीर्घस्यैव बाधोऽस्त्विति वाच्यम्; प्रधानसवर्णदीर्घबाधापेक्षया इत्संज्ञाबाधस्यैवौचित्यात्।

आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य । ४० । अत्र 'अनुदात्तङित' इत्यत आत्मनेपदमित्यनुवर्तते। आम्प्रत्ययस्यात्मनेपदानर्हत्वात्प्रत्ययग्रहणाच्च आम्प्रत्ययो यस्मादित्यतद् गुणसंविज्ञानो बहुव्रीहिः। तथा च आम्प्रत्ययविनिर्मुक्त आम्प्रत्ययप्रकृतिभूत एधादिधातुरेव आम्प्रत्ययशब्देन लभ्यते। आम्प्रत्ययवदिति आम्प्रत्ययेन तुल्यमिति तृतीयान्ताद्वतिः। अनुप्रयुज्यते इत्यनुप्रयोगः, कर्मणि घञ्, पञ्चम्यर्थे षष्ठी। एवञ्च आम्प्रकृत्या तुल्यमनुप्रयुज्यमानात्कृञोऽप्यात्मनेपदं स्यादित्यर्थः। तेन आम्प्रकृतिभूतस्य धातोरात्मनेपदत्वे आत्मनेपदत्वम्। परस्मैपदत्वे तत्त्वम्। अत्र 'कृञ्' इति न प्रत्याहारग्रहणम्, 'अनुप्रयोगस्येत्येव सिद्धे कृञ्ग्रहणादिह न प्रत्याहारग्रहणमिति' भाष्यात्। आम्प्रत्ययवदिति ग्रहणात् परगामिन्यपि क्रियाफले कृञ्धातोरात्मनेपदं भवतीति विज्ञायते। अत एव इन्दाञ्चकारेत्यादौ आम्प्रकृतेः 'इदि परमैश्वर्ये' इति धातोरात्मनेपदाभावात् परगामिनि क्रियाफलेनानेनाऽऽत्मनेपदम्। अस्य एधाञ्चक्रे' इत्युदाहरणम्, 'इन्दाञ्चकार' इति प्रत्युदाहरणमिति दिक्।

इन्दाञ्चकार। नन्विन्दाञ्चकारेत्यादौ परगामिनि क्रियाफले 'आम्प्रत्ययवत्' इति सूत्रेण मास्त्वात्मनेपदम् 'इदि परमैश्वर्ये' इति धातोः परस्मैपदित्वेनात्मनेपदाभावात्। आत्मगामिनि तु क्रियाफले 'स्वरितञित' इत्यात्मनेपदत्वं दुर्वारम्। अस्य सूत्रस्य एधाञ्चक्रे इत्यादौ परगामिनि क्रियाफले आत्मनेपदस्याप्राप्तस्य विधान एव समर्थतया तत्रात्मनेपदस्य निवारणे सामर्थ्याभावत् इति चेन्न, अत्र 'पूर्ववत्सनः' इति पूर्वसूत्रात्पूर्ववदित्यनुवर्त्य 'आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य' इत्येकं वाक्यं, 'पूर्ववत्कृञोऽनु-प्रयोगस्य' इति द्वितीयं वाक्यम्। तत्र पूर्ववदिति तृतीयान्ताद्वतिः। पूर्वेण पूर्वप्रयुक्तेन एधादिधातुना तुल्यमित्यर्थः। तत्र वाक्यद्वयस्य समानार्थकत्वे

Sri Vidyabharathi Book Centre, Sringeri.

CC-O. In Public Domain. Digitized by eGangotri

वैयर्थ्यात् द्वितीयं वाक्यं नियमार्थं सम्पद्यते, पूर्ववदेवात्मनेपदं न तु तद्विपरीतमिति । एवञ्च पूर्ववाक्येन एधाञ्चक्रे इत्यादौ पुनः परगामिन्यपि क्रियाफले आत्मनेवदविधिः, द्वितीयवाक्येन तु इन्दाञ्चकारेत्यादौ कर्तृगामिनि क्रियाफलेऽपि 'स्वरितञितः' इति प्राप्तस्यात्मनेपदस्य निवृत्तिः क्रियते ।

प्रत्यये किं वव्रश्च । ननु उरत् इति सूत्रे अङ्गाधिकारमाश्रित्याङ्गेन प्रत्ययाक्षेपो व्यर्थ इति चेन्न, व्रश्च धातोः लिटि, तिपि णलि, द्वित्वे, 'लिट्यभ्यासस्योभयेषाम्' इति सम्प्रसारणेन ऋकारे पूर्वरूपे उरत् इति अत्वे रपरत्वे, हलादिः शेषे वव्रश्च इत्यवस्थायां पूर्वं वकारस्य सम्प्रसारणे प्राप्ते प्रत्ययनिमित्तकत्वात् अचः परस्मिन् पूर्वविधौ इति अत्वस्य स्थानिवत्त्वेन 'न सम्प्रसारणे सम्प्रसारणम्' इति निषेधेन पूर्वस्य वकारस्य सम्प्रसारणं न भवति । ततः वव्रश्च इति सिद्ध्यति । प्रत्ययपदाभावे तु उरदत्वस्य परनिमित्तकत्वाभावात् स्थानिवत्त्वाभावेन 'न संप्रसारणे' इति निषेधाप्राप्तौ वकारस्य पुनः लिट्यभ्यासस्येति सम्प्रसारणे अनिष्टापत्तेः । सप्तमाध्यायस्थ भाष्येऽङ्गाधिकारः सर्वत्र वर्तव्यः । तेन प्रत्ययाक्षेपेण कार्यसिद्धिरिति दिक् ।

एकाच उपदेशेऽनुदात्तात् । ५६ । उपदेशे यो धातुरेकाजनुदात्तश्च ततः परस्य वलादेरार्धधातुकस्येण् न स्यादित्यर्थः । तेन वक्तुम्, गन्तुम्, पिपक्षति, बिभत्सति इत्यादौ नेट् ।

तत्र वक्तुं, गन्तुमित्यत्र तुमुनि नित्स्वरेण सम्प्रत्युदात्तत्वेऽपि, ऊद्दन्तैरित्यादिनाऽजन्तेषु कृञो हलन्तेषु गमश्चानुदात्तत्वादिण्निषेधः । पिपक्षति, बिभत्सतीत्यादौ हि पचतिभिनत्तेश्च सन्नन्तेऽनेकाच्त्वेऽपि पूर्वमेवाच्त्वादिण्निषेधः ।

ननु सूत्रे एकाज्ग्रहणाभावेऽपि ऊद्दन्तैरित्यादिना परिगणितानामेवानुदात्तोपदेशधातूनामेकाच्त्वात् वक्तुं, चकृषे, गन्तुमित्यादाविण्निषेधसिद्धेः, एकाजग्रहणं व्यर्थमिति चेत् ? न, यङ्लुकि इण्निषेधव्यावृत्त्यर्थन्तदावश्यकत्वात् । न च कृतेऽप्येकाज्ग्रहणे यङ्लुकि द्वित्वे कृतेऽनेकाच्त्वेपि धातूपदेशे एकाच्त्वस्य विद्यमानत्वेनेण्निषेधो दुर्वार एवेति वाच्यम्—

श्तिपा शपानुबन्धेन निर्दिष्टं यद्गणेन ।
यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

इति प्राचोक्तदिशा इण्निषेधव्यावृत्तेः। नचैवं सत्यपि श्तिबादिनिर्दिष्टानां यङ्लुक्व्यावृत्तिः पाणिनेरसम्मतैवेति वाच्यम्, उक्तश्लोकसिद्धं सर्वमपि सूत्रे एकदेशानुवृत्त्या एकाज्ग्रहणेनैव ज्ञापनात्। अन्यथापदेशेऽनेकाचामुदात्तत्वस्यैव सत्वेन तद्वैयर्थ्यं स्पष्टमेव। न च 'अवधोत्' इत्यत्र हनधातोर्लुङि 'हनो वध लङि' 'लुङि च' इत्यनेन वधादेशे कृते इडागमो न स्यात्। सम्प्रति अनेकाच्त्वेऽपि धातूपदेशे एकाच्त्वादिति वाच्यम्, अचः इत्यनेनैव सिद्धे एकाज्ग्रहणसामर्थ्यादुपदेशे सर्वत्र एकाजेव न तु कस्मिंश्चिदप्युपदेशेऽनेकाजित्यर्थकल्पनेनादोषात्।

एधाञ्चक्रे। ४५। एध्धातोर्लिटि 'इजादेश्च गुरुमतोऽनृच्छः' इत्यामि 'आमः' इति लिटो लुकि 'कृञ् चानुप्रयुज्यते लिटि' इति लिट्परककृञोऽनुप्रयोगे 'एध् आम् कृ लिट्' इति जाते 'आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य' इत्यात्मनेपदत्वात् लिटः स्थाने तप्रत्यये 'लिटस्तझयोरेशिरेच्' इत्यनेन तस्यैशादेशे अनुबन्धलोपे 'एधाम् कृ ए' इति स्थिते 'लिटि धातोरनभ्यासस्य' इति द्वित्वे प्राप्ते तं परत्वाद् बाधित्वा 'इको यणचि' इति यणि प्राप्ते तं 'द्विर्वचनेऽचि' इति निषेधे पुनः प्रसङ्गविज्ञानाद् 'लिटि धातोरनभ्यासस्य' इति द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायाम् 'उरत्' इत्यभ्यास-ऋवर्णस्य अत्वे रपरत्वे च कृते 'एधाम् कर् कृ ए' इति जाते 'हलादिः शेषः' इत्यनेन अभ्यासस्यान्त्यहलो लोपे 'कुहोश्चुः' इत्यनेन चुत्वे 'एधाम् च कृ ए' इति जाते 'सार्वधातुकार्धधातुकयोः' इति गुणे प्राप्ते 'असंयोगाल्लिट् कित्' इति कित्त्वेन गुणनिषेधे 'इको यणचि' इति यणि अव्ययत्वेन एधाम् इत्यस्य पदत्वात् मकार-स्यानुस्वारे परसवर्णे च कृते 'एधाञ्चक्रे' इति सिद्धम्।

एधाञ्चकृषे। ५७। एधधातोः एधाञ्चकृत्या इतिस्थिते मध्यमपुरुषैकवचनेऽपत्वे थासि थासः से च कृते सिद्ध्यति।

एधामास। ४६। वृद्ध्यर्थक-एध-धातोर्लिटि 'इजादेश्च गुरुमतोऽनृच्छः' इत्य-नेनामि 'आमः' इति लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इत्यनेन लिट्परक 'अस्' इत्यस्यानुप्रयोगे लिटः स्थाने तिपि तस्य णलादेशे अनुबन्धलोपे द्वित्वेऽभ्यासंज्ञायां हलादिःशेषे 'एधाम् अ अस् अ' इत्यवस्थायां सवर्णदीर्घं बाधित्वा 'अतो गुणे' इति पररूपे प्राप्ते 'अत आदेः' इत्यनेनाभ्यासस्यादेरतो दीर्घे सवर्णदीर्घे 'एधामास' इति सिद्धम्।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

नन्वस्तेरनुप्रयोगे लिडादेशस्यार्धधातुकत्वात् 'अस्तेर्भू' रित्यार्धधातुके, विहितो भूभावः कुतो नेति वाच्यम्, 'कृञ्चानुप्रयुज्यते' 'कृञ्चानुप्रयुज्यते वा' इत्यनेनाऽपि एधांबभूवेति सिद्धौ 'कृञ्' इति प्रत्याहारमाश्रित्य कृभ्वस्तीनामनुप्रयोगविधिसामर्थ्येन च अनुप्रयुक्तस्यास्तेर्भूभावो नेति ज्ञापनेनादोषात् ।

एधिताहे । ५८ । एधधातोर्लुटि उत्तमपुरुषैकवचने आत्मनेपदे इटि 'टित आत्मनेपदानां टेरे' इति एत्वे तासि प्रत्यये 'आर्धधातुकस्येड् वलादेः' इति इटि 'एधि तास् ए' इति स्थिते 'ह एति' सूत्रेण तासः सस्य हकारे 'एधिताहे' इति सिद्धम् ।

एधस्व । ५७ । एधधातोर्लोटि थासः से' कृते एध से इत्य वाभ्यां वामौ इति एकारस्य वकारे रूपम् ।

एधेरन् । ५६ । एध्धातोः 'विधिनिमन्त्रणे'ति लिङि तत्स्थाने झप्रत्यये 'झस्य रन्' इति झस्य रनादेशे सार्वधातुकसंज्ञायां शपि 'एध् अ रन्' इति स्थिते 'लिङः सीयुट्' इति सीयुडागमे अनुबन्धलोपे 'लिङः सलोपोऽनन्त्यस्य' इति सलोपे 'लोपो व्योर्वलि' इति यलोपे 'आद्गुणः' इति गुणे 'एधेरन्' इति ।

एधिषीष्ट । ४० । एध्धातोराशीर्लिङि तत्स्थाने तप्रत्यये 'लिङः सीयुट्' इति सीयुडागमे अनुबन्धलोपे 'सुट्तिथोः' इति सुडागमे 'लोपो व्योर्वलि' इति यलोपे 'आर्धधातुकस्येड्वलादेः' इति इटि अनुबन्धलोपे 'किदाशिषि' इत्यनेन आर्धधातुकत्वात् 'लिङः सलोपोऽनन्त्यस्य' इति सलोपाभावे सीयुट्सुटोः प्रत्ययावयवत्वात् 'आदेशप्रत्यययोः' इति षत्वे ष्टुत्वे एधिषीष्ट इति सिद्धम् ।

एधिढ्वम् । ५६ । एध-धातोर्लुङि तत्स्थाने आत्मनेपदे ध्वमि च्लिप्रत्यये 'च्लेः सिच्' इत्यनेन सिजादेशे अनुबन्धलोपे सिचः आर्धधातुकसंज्ञाम्, 'आर्धधातुकस्येड्वलादेः' इत्यनेन इडागमेऽनुबन्धलोपे 'आडजादीनाम्' इत्यनेनाडागमे 'आटश्च' इत्यनेन वृद्धौ, 'धि च' इत्यनेन सकारलोपे इटो लुप्तसिजन्तत्वेन सिजन्ताङ्गान्तभूतत्वेन इडन्तस्य इणन्तत्वात् 'इणः षीध्वंलुङ्लिटां धोऽङ्गात्' इत्यनेन धस्य ढत्वे 'ऐधिढ्वम्' इति सिद्धम् ।

केचित्तु इड्भिन्न एव इह इण् गृह्यते, उत्तरसूत्रे 'विभाषेटः' इत्यत्र इड्ग्रहणात् । तन्मते प्रकृते इटः [illegible] 'ऐधिध्वम्' इत्येव रूपम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

एतन्मते धकारस्य 'अनचि च' इत्यनेन द्वित्वविकल्पाद् द्धिधमेकधमिति रूपद्वयं । एवं ढत्वे द्विढमेकढमिति रूपद्वयम् । रूपचतुष्टयेऽपि 'यणो मयो द्वे वाच्ये' इत्यत्र मय इति पञ्चमीमाश्रित्य वकारस्य द्वित्वविकल्पादेकवकाराणि द्विवकाराणि च चत्वारि रूपाणि जायन्ते ।एवञ्च मिलित्वा अष्टौ रूपाणि भवन्ति । उक्तवार्तिकेनैव मकारस्यापि द्वित्वविकल्पादुक्ताष्टरूपाणि एकमकाराणि द्विमकाराणि चेति षोडश रूपाणि भवन्ति । न च मस्येत्संज्ञा कथन्नेति वाच्यम्, 'न विभक्तौ तुस्माः' इति तन्निषेधात् इति दिक् ।

पस्पर्धे । ४४ । 'स्पर्ध' धातोर्लिटि तत्स्थाने तप्रत्यये तस्य एशादेशे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वेऽभ्याससंज्ञायां हलादिःशेषे प्राप्ते तं प्रबाध्य 'शर्पूर्वाः खयः' इत्यनेन अभ्यासे पकारस्य शेषे पस्पर्धे' इति सिद्धम् । न च 'नन्द्राः संयोगादयः' इत्यनेन रेफस्य द्वित्वनिषेधः कुतो नेति वाच्यम्, द्वितीयैकाजवयवस्यैव तन्निषेधात् ।

अत एकहल्मध्येऽनादेशादेर्लिटि । अयमर्थः—'अत एकहल्मध्येऽनादेशादेर्लिटि' इति सूत्रेऽनादेशादेरिति पदे आदेश आदौ यस्य स आदेशादिः न आदेशादिरनादेशादिस्तस्येति समासे आदेशपदेन यो हि वैरूप्यस्य सम्पादकः स एव ग्राह्यः । यथा—'जगाद' इत्यत्र गकारस्य जकारादेशो भवति । तत्र गकारस्यान्यद्रूपं जायते । तथा च दधधात्वादौ दकारस्य दकाररूपादेशे जातेऽपि एत्वाभ्यासलोपौ भवत एव ।

अत्र प्रमाणञ्च 'न शसददवादिगुणानम्' इति सूत्रे एत्वप्रतिषेधार्थं शसिदद्योः पाठः । अन्यथा आदेशपदेन यदि सामान्यादेशस्य ग्रहणं स्यात्तदा शसिदद्योरपि 'अभ्यासे चर्च' इति सूत्रेण शकारस्य शकाररूपादेशो दकारस्य च दकाररूपादेशो भवत्येवेति तत्रैत्वविधायकस्याप्रवृत्तौ निषेधकशास्त्रे तयोः पाठो निष्फल एव स्यात् । अतः अनादेशपदेन वैरूप्यसम्पादक एव आदेशः व्यावर्त्य इति दिक् ।

देधे । ४७ । धारणार्थक—'दध्' धातोर्लिटि तत्स्थाने तप्रत्यये लिटि धातोरनभ्यासस्येत्यनेन द्वित्वेऽभ्याससंज्ञायाम्, 'असंयोगाल्लिट् कित्' इति लिटः कित्त्वे 'अभ्यासे चर्च' इत्यनेन जशां चरां च जशि चरि च कृते 'अत एकहल्मध्येऽनादे-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

शादेर्लिटि' इत्यनेन दकारात्परस्याकारस्य एत्वेऽभ्यासलोपे च जाते 'देवे' इति सिद्धम् ।

नन्वत्र 'अभ्यासे चर्च' इत्यनेन प्रकृतिजश्वां प्रकृतिजश्वरादेशे लिण्निमित्तादेशत्वात् अनादेशादेरिति पर्युदासप्रतिषेधेन कथमेत्वाभ्यासलोपाविति चेत् ? शृणु, वैरूप्यसंपादकादेशादेरेव प्रतिषेधात् । अन्यथा शसिदद्योरभ्यासे शकारदकारयोश्चर्जशोः शकारदकारादेशे आदेशित्वादेव एत्वाभ्यासलोपयोरसिद्धौ 'न शसददवादिगुणानाम्' इति प्रतिषेधस्य वैयर्थ्यं स्यात् । अतो वैरूप्यसंपादकस्य आदेशस्यैव प्रतिषेधेन दोषाभावात् ।

ददवे । ४५ । दानार्थक—'दद्' धातोर्लिटि तत्स्थाने तप्रत्यये तस्य एशादेशे द्वित्वेऽभ्याससंज्ञा हलादिःशेषं प्रबाध्य 'अत एकहल्मध्येऽनादेशादेर्लिटि' इत्यनेन एत्वाभ्यासलोपयोः प्राप्तयोः 'न शसदद-वादिगुणानाम्' इत्यनेन तन्निषेधे हलादिःशेषे 'ददवे' इति सिद्धम् ।

अनुस्वदते । ३९ । आस्वादनार्थकानुपूर्वकात् 'ष्वद्'–धातोः 'धात्वादेः षः सः' इत्यनेन सत्वे लटि तत्स्थाने तप्रत्यये टेरेत्वे शपि अनुबन्धलोपे 'अनुस्वदते' इति । नचात्रादेशसकारसत्वात्–'आदेशप्रत्यययोः' इत्यनेन षत्वापत्तिरिति वाच्यम् 'सात्पदाद्योः' इत्यनेन तन्निषेधात् ।

षोपदेशकारिका । ४४ । 'सेक्-सृप्-सृ-स्तृ-सृज्-स्तु स्त्याऽन्ये दन्त्याजन्तसादयः । एकाचः षोपदेशाः ष्वष्क्-स्विद्-स्वञ्ज्-स्वप्–स्मिङ् ।' इति । सेगिति—दन्त्याजन्तसादयः षोपदेशाः स्युरित्यन्वयः । दन्त्यश्च अच्च दन्त्याचौ तौ अन्तौ अव्यवहितपरौ यस्य स दन्त्याजन्तः, तथाविध सः–सकारः आदिर्येषां ते दन्त्याजन्तसादयः । दन्त्यपरकोऽच्परकश्च यः सकारस्तदादय एकाचो धातव इदानीं कृतसत्वास्सकारादित्वेन दृश्यमाना अपि षकारादित्वेनोपदिष्टा इति प्रत्येतव्या इत्यर्थः । नचैवं सेक्प्रभृतीनमपि षोपदेशत्वं स्यात् इति वाच्यम्, आद्यानां चतुर्णां चरकसादित्वादन्त्यानाञ्च त्रयाणां दन्त्यपरकसादित्वादतः सेक्प्रभृतीन्वायति । नचैवमपि ष्वष्कादीनामसङ्ग्रहः स्यात् इति वाच्यम्, एषु सकारस्य दन्त्याच्परकत्वाभावात्, अतस्तान्ष्वष्केत्यादिना संगृह्णाति । अत्र दन्त्यपदेन केवलदन्त्यो गृह्यते न तु दन्त्यौष्ठ्योऽपि, वकारादिः, तृप्यमहणज्ञापकात् ।

Sri Vidyadhiraja Thirtha Book Centre, Sringeri

 CC-O. In Public Domain. Digitized by eGangotri

आतत् —अत्धातोर्लङि तत्स्थाने तिपि 'इतश्च' इति तिपः इकारस्य लोपे सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे 'लुङ्लङ्' इति प्राप्तमटं बाधित्वा 'आडजादीनाम्' इत्याडागमे 'आटश्च' इति वृद्धौ 'आतत्' इति ।

आतीत् । ४६ । अत्धातोर्लुङि तत्स्थाने तिपि अनुबन्धलोपे 'इतश्च' इतीकारलोपे 'च्लि लुङि' इति च्लौ 'च्लेः सिच्' इति सिचि अनुबन्धलोपे 'अत् स् त्' इति जाते 'आडजादीनाम्' इत्याटि अनुबन्धलोपे 'आटश्च' इति वृद्धौ सिचः सकारस्यार्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड्वलादेः' इतीटि अनुबन्धलोपे 'आत् इ स् त्' इति स्थिते तिपः तकारस्य 'अपृक्त एकाल्प्रत्ययः' इत्यपृक्तसंज्ञायाम् 'अस्तिसिचोऽपृक्ते' इति ईडागमे अनुबन्धलोपे 'आत् इ स् ई त्' इति स्थिते 'इट ईटि' इति सलोपे 'आत् इ ई त्' इति दशायां सलोपस्य त्रैपादिकत्वेन 'पूर्वत्रासिद्धम्' इत्यसिद्धत्वेन दीर्घत्वाऽभावे प्राप्ते 'सिज्लोप एकादेशे सिद्धो वाच्यः' इति वार्तिकेन सिज्लोपस्य असिद्धत्वाऽभावेन सवर्णदीर्घे 'आतीत्' इति सिद्धम् ।

सिषेध । ५६ । सिध्धातोर्लिटि 'धात्वादेः षः सः' इति सत्वे लिटः स्थाने तिपि णलि द्वित्वे अभ्यासंज्ञायां हलादिः शेषे 'पुगन्तलघूपधस्य च' इति गुणे आदेशप्रत्ययोरिति षत्वे 'सिषेध' इति सिद्धम् ।

सिषेधिथ । सिध्धातोर्लिटः सिपि 'धात्वादेः षः सः' इति सत्वे 'परस्मैपदानाम्–' इति सिपस्थलि द्वित्वे अभ्याससंज्ञायां 'हलादिः शेष' इति अभ्यासावयवधकारस्य लोपे 'सिसिध्' इथ इति जाते 'आदेश-प्रत्यययोः' इति तस्य षत्वे लिट्च' इति थलः आर्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति थलः इटि अनुबन्धलोपे 'पुगन्त' इति गुणे 'सिषेधिथ' इति ।

निषेधति । ४५ । नि इत्युपसर्गपूर्वकात् षिध्धातोर्लटि 'धात्वादेः षः स' इति षस्य सत्वे लटः स्थाने तिपि सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे 'पुगन्तलघूपधस्य च' इति गुणे निसेधति इति स्थिते 'उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेधसिचसञ्जस्वञ्जाम्' इति सस्य षत्वे निषेधति इति सिद्धम् ।

न्यषेधत् । ४४ । नि इत्युपसर्गपूर्वकात् षिध्धातोः सत्वे लङि तिपि 'इतश्च' इति तिपि इकारलोपे सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे 'पुगन्तलघूपधस्य च' इति गुणे अडागमे अनुबन्धलोपे 'प्राक्सितादड्व्यवायेऽपि' इति सस्य षत्वे यणि उक्तं रूपं सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

न्यषेधीत् । ४५ । षिध् धातोः 'धात्वादेः षः सः' इत्यनेन सत्वे लुङि तत्स्थाने तिपि अनुबन्धलोपे, इतश्चेतीकारलोपे च्लिप्रत्यये तस्य सिजादेशे अनुबन्धलोपे आर्धधातुकसंज्ञायाम्, आर्धधातुकसंज्ञायाम्, 'आर्धधातुकस्येड्वलादेः' इत्यनेन इडागमे 'इट ईटि' इत्यनेन सलोपे सवर्णदीर्घे 'पुगन्ते' ति गुणे अडागमे अकारेण व्यवहितत्वादिणः परत्वाभावात् 'आदेशप्रत्यययोः' इत्यनेन षत्वाप्रवृत्तौ 'प्राक्सितादड्व्यवायेऽपि' इति सस्य षत्वे यणि 'न्यषेधीत्' इति सिद्धम् ।

अखदीत, अखदीत् । ४४ । 'खद' धातोर्लुङि तत्स्थाने तिप्यनुबन्धलोपे इतश्चेति इकारलोपे अडागमे च्लिप्रत्यये तस्य सिजादेशे इचावितौ आर्धधातुकस्येड्वलादेइत्यनेन इडागमे 'अस्तिसिचोऽपृक्ते' इत्यनेन च इडागमे 'इट ईटि' इत्यनेन सलोपे सवर्णदीर्घे कर्त्तव्ये सिज्लोपस्यासिद्धत्वं तु न 'सिज्लोप एकादशे सिद्धो वाच्यः' इति वार्तिकेन निषेधात् 'अतो हलादेर्लघो' रित्यनेन वैकल्पिकवृद्धौ 'अखादीत्' इति । वृद्ध्यभावपक्षे अखदीत् इति रूपम् ।

णो नः खोपदेशाश्च ।४५। धातोरादेर्णस्य नो भवति, यथा 'णद अव्यक्ते शब्दे' अस्य धातोर्णस्य नत्वे 'नदति' इति रूपम् । धात्वादेः ष सः इत्यतो 'धात्वादे' इत्यनुवर्तते तेन 'अनती' त्यादौ न णत्वम् । अत्र के णोपदेशाः ? के वा तद्भिन्नाः ? इति संशये पर्युदासमुखेन कौमुद्यामुक्तं ग्रन्थकृता 'णोपदेशास्त्वनर्द-नाटि-नाथ-नन्द-नक्क-नृ-नृतः' इति । 'नर्द शब्दे' 'नट अवस्यन्दने' 'नाथृ-नाधृ याच्आदौ' द्वितीयचतुर्थान्तौ, 'टुनदि समृद्धौ' नक्क नाशने' 'नृ नये' 'नृती गात्रविक्षेपे' एभ्योऽष्टभ्योऽन्ये णपकारादिधातव इदानीं नकारादित्वेनाऽवलोक्यमाना अपि नत्वसम्पन्ननकारादितया णोपदेशा बोध्या इत्यर्थः । अत्र 'नृतुनर्दनन्दनक्कनाटनाथृनाधृनृवर्जं णोपदेशा' इति भाष्यमेव प्रमाणम् । न च तवर्गचतुर्थान्तनाधतेर्नन्धोश्च णोपदेशता कुतो नेति वाच्यम्, उक्तभाष्यविरोधात् । नचैवमप्यण्यन्तानां पर्युदासमध्ये नाटः ण्यन्तस्य पर्युदासः कथमिति वाच्यम्, ण्यन्तनाटेः पर्युदासेन घटादेः 'नट नृत्ता' वित्यस्य णोपदेशार्थत्वात् । न च तथापि णकारमुपदिश्य किमर्थं नकारो विधीयते नकार एवोपदिश्यतामिति वाच्यम्? धातोर्नस्य णत्वविधानेन णोपदेशस्य बोद्धुमावश्यकत्वात् ।

तस्मान्नुड् द्विहलः । द्विहलो धातोर्दीर्घीभूतादकारात् परस्य नुट् स्यात् इति

Sri Vidyabharathi Book Centre, Sringeri

 CC-O. In Public Domain. Digitized by eGangotri

सूत्रार्थः । तेन आनर्द, आनर्छ, आनञ्ज इति सिद्ध्यति । अत्र द्विहल्ग्रहणम् आत, आट इत्यादौ नुट् निषेधाय । ऋकारैकदेशो रेफः हल्ग्रहणेन गृह्यते । तेन आनृधतुः आनृधुः इत्यादौ नुट् सिद्ध्यति । न चात्र किं प्रमाणम् इति वाच्यम्, ऐऔच् सूत्रभाष्ये ऋवर्णान्नस्य णत्वं वाच्यम् इति वार्तिकप्रत्याख्यानाय वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते इत्युक्तेः इति दिक् ।

आनर्द । ४४ । अर्द धातोर्लिटि तिपि तस्य 'परस्मैपदाना' मित्यादिना णलादेशे द्वित्वेऽभ्यास-संज्ञायां हलादिः शेषे 'अत आदेः' इत्यनेन नुडागमेऽनुबन्ध-लोपे 'आनर्द' इति सिद्धम् ।

ववृके । ५३ । आवरणार्थक 'वृक्' धातोर्लिटि तत्स्थाने तप्रत्यये 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वेऽभ्याससंज्ञायाम् उरदित्यत्वे हलादि शेषे 'असंयोगाल्लिट् कित्' इत्यनेन लिटः कित्वाल्लघूपधगुणनिषेधे तस्य 'लिटस्तझयोरेशिरेच्' इत्यनेन एकादेशेऽनुबन्धलोपे 'ववृके' इति सिद्धम् । न च कित्वात्परत्वाद् गुणे कृते रपरत्वे संयोगात्परत्वेन कित्वस्याऽनित्यत्वादुक्तरूपं न सिद्ध्येदिति वाच्यम्, 'ऋदुपधेभ्यो लिटः कित्वं गुणात्पूर्वविप्रतिषेधेन' इत्यनेन 'पूर्वविप्रतिषेधेन' कित्वस्यैव प्रवृत्तावुक्तरूपसिद्धेः इति दिक् ।

उवोख । ५३ । उख धातोर्लिटि तत्स्थाने तिपि तस्य 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इत्यनेन णलादेशे णलावितौ 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वेऽभ्याससंज्ञायां हलादिः शेषे अन्तरङ्गत्वात् सवर्णदीर्घे प्राप्ते 'वार्णादाङ्गं बलीयः' इति परिभाषया तं बाधित्वा लघूपधगुणे कृते 'उ ओख अ' इत्यवस्थायाम् उवर्णस्य यणि प्राप्ते 'अभ्यासस्यासवर्णे' इत्यनेन उवङादेशे पररूपे 'उवोख' इति सिद्धम् ।

न च यदा णलादेशो जातस्तदा तस्य पित्त्वेनाकित्त्वाल्लघूपधगुणः कथन्नेति वाच्यम्, द्विर्वचनेऽचीति निषेधात् । न च कृते द्वित्वे लघूपधगुणेऽपि इजादिगुरुमत्त्वात् 'इजादेश्च गुरुमतोऽनृच्छः' इत्यनेनाम् कथन्नेति वाच्यम्, सन्निपातपरिभाषाविरोधात् । न च 'अचि श्नुधातुभ्रुवाम्' इत्यनेनैवोवङादेशे सिद्धे इदं सूत्रं व्यर्थमिति वाच्यम्, अजादौ परत एव तत्प्रवृत्तेः, अभ्यासस्याङ्गत्वाभावाच्च तदप्राप्तेरिति दिक् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ऊखतुः । २७ । उख्-धातोर्लिटि तस्स्थाने तसि तस्य अतुसादेशे 'असंयोगाल्लिट् कित्' इत्यनेन अपित्वात्कित्वेन लघूपधगुणाभावे, द्वित्वे, अभ्याससंज्ञायां हलादिः शेषे पर्जन्यवल्लक्षणप्रवृत्त्या ह्रस्वे 'अभ्यासस्याऽसवर्णे' इत्यनेन इयङभावे सवर्ण-दीर्घे रुत्वे विसर्गे 'ऊखतुः' इति सिद्धम् ।

नन्वत्रोकारस्य एकादेशतया पूर्वान्तवद्भावेनाभ्याससम्बन्धित्वात सकृत्प्रवृत्तेऽपि ह्रस्वः पुनरपि कथं न प्रवर्त्तेत इति चेत् न, 'लक्ष्ये लक्षणं सकृदेव प्रवर्त्तते' इति न्यायेन पर्जन्यवल्लक्षणप्रवृत्त्या ह्रस्वस्य दीर्घे जाते पुनः प्रवृत्त्यभावात् । न च वर्ण-मात्रापेक्षत्वेनान्तरङ्गत्वात्प्रथमं सवर्णदीर्घस्यैव प्रवृत्तिः कथं न स्यादिति वाच्यम्, 'वार्णादाङ्गं बलीयः' इति परिभाषया बहिरङ्गस्यापि ह्रस्वस्य प्रथमं प्रवृत्तेः । न च अन्तरंगं सवर्णदीर्घं प्रति ह्रस्वस्य परत्वकथनमसंगतमिति वाच्यम्, परत्वादित्यस्य परकालप्राप्तिकत्वादित्यर्थः । तेन अभ्यासविकारेषु परस्परं बाध्यबाधकभावाऽभावेन युगपदेव हलादिःशेषे ह्रस्वे च कृते पश्चात् प्रवर्तमानस्य सवर्णदीर्घस्य पूर्वपूर्व-मन्तरङ्गं परं परं बहिरङ्गम् इति बहिरङ्गत्वावगमात् !

आनृजे । ५३ । ऋज्धातोर्लिटि तत्स्थाने आत्मनेपदे तप्रत्यये 'असंयोगाल्लिट् कित्' इति कित्वात् क्ङिति च इति गुणनिषेधे 'लिटस्तझयोरेशिरेच्' इति तस्य एशादेशे अनुबन्धलोपे द्वित्वे अभ्यास-संज्ञायाम् 'उरत्' इति अत्वे रपरत्वे हलादिः शेषे 'अत आदेः' इत्यभ्यासस्यातो दीर्घे तस्मान्नुड् द्विहलः इति नुटि अनुबन्धलोपे 'आनृजे' इति सिद्धम् । नचात्र द्विहल्त्वाभावात् कथं नुडिति वाच्यम् 'नुड्विधौ ऋकारैकदेशा रेफो हल्त्वेन गृह्यते' इति वार्त्तिकात्सूत्रे र द्विहल्त्वात् नुट्सिद्धेः ।

अम्रोचीत्: अम्रुचत् ।३८। म्रुच् धातोर्लुङि तिपि इतश्चेतीकारलोपे अडागमे अनुबन्धलोपे च्ली तस्य सिजादेशे प्राप्ते तम्प्रबाध्य 'जृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चु-श्विभ्यश्च' इति विभाषया च्लेरङि ङित्वाल्लघूपधगुणाभावे 'अम्रुचत्' इति । अङभावे तु च्लेः सिचादेशे सस्य इटि तस्य च ईटि 'इट ईटि' इति सलोपे सवर्ण-दीर्घे पुगन्तेति गुणे 'अम्रोचीत्' इति सिद्धयति ।

अग्रुचत् । ३८ । ग्रुच् धातोर्लुङि तत्स्थाने तिपि अनुबन्धलोपे इतश्चेति इकारलोपे 'लुङ्लङ्' इत्यडागमे शपं प्रबाध्य च्लिप्रत्यये तस्य 'जृस्तम्भम्रुचुम्लु-चुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च' इत्यनेनाङि सति ङित्वाल्लघूपधगुणाभावे 'अग्रुचत्' इति सिद्धम् । अङभावे तु च्लेः सिजादेशे अनुबन्धलोपे 'आर्धधातुकस्येड्वलादेः'

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

इत्यनेन इडागमे' अस्ति सिचोऽपृक्ते' इत्यनेन च ईडागमे 'इट ईटि' इति सलोपे सिज्लोप एकादेशे सिद्धो वाच्यः इति वार्तिकबलेन सवर्णदीर्घे लघूपधगुणे 'अम्लोचीत्' इति सिद्ध्यति।

अग्लुचत्—'ग्लुच्' धातोर्लुङि तत्स्थाने तिप्यनुबन्धलोपे इतश्चेतीकारलोपे अडागमे च्लिप्रत्यये तस्य सिजादेशे प्राप्ते तं प्रबाध्य 'जृस्तम्भुम्रुचुम्लुचुग्लुचुग्लुञ्चुश्विभ्यश्च' इत्यनेन विकल्पेन अङि ङित्वाल्लघूपधगुणाभावे 'अग्लुचत्' इति सिद्धम्। पक्षे सिजादेशे इटि, ईटि च कृते सलोपादिके 'अग्लोचीत्' इति सिद्धम्।

आञ्छ। इकारेत्संज्ञकात् आछि धातोः 'इदितो नुम् धातोः' इत्यनेन नुमागमे अनुस्वारे परसवर्णे लिटि तिपि तस्य णलादेशेऽनुबन्धलोपे लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे, अभ्याससंज्ञायाम् हलादिः शेषे 'ह्रस्व' इत्यनेनाभ्यासह्रस्वे, अ आञ्छ अ, इति स्थिते 'अकः सवर्णे दीर्घः' इत्यनेन दीर्घे 'आञ्छ' इति सिद्धम्।

नच 'अत आदेः' इत्यनेनाभ्यासस्यादेरतो दीर्घे 'तस्मान्नुड् द्विहलः' इत्यनेन नुट् कथन्नेति वाच्यम्, तत्र तपरकरणेन स्वाभाविकह्रस्वाकारस्यैव ग्रहणेन दीर्घाऽभावान्नुटोऽप्राप्तेः। तपरकरणं मुखसुखार्थमिति मते तु नुटि 'आनाञ्छे'ति रूपं भवतीति दिक्।

विवाय। ४५। अज् धातोः लिटि तिपि तत्स्थाने णलि अनुबन्धलोपे अजेर्व्यघञपोः इति वीभावे वी अ इत्यवस्थायाम् द्वित्वात् परत्वात् यणि प्राप्ते तं प्रबाध्य वृद्धौ प्राप्तायां द्विर्वचनेऽचीति तन्निषेधेन द्वित्वे अभ्याससंज्ञायाम् हलादिः शेषे ह्रस्वे, वृद्धौ आयादेशे विवाय इति सिद्धम्।

विव्यतुः। ५३। अज्धातोः 'परोक्षे लिट्' इति लिटि, 'लिट् च' इति आर्धधातुकसंज्ञायाम् 'अजेर्व्यघञपोः' इति वीभावे लिटोऽतुसि 'लिटि धातोरनभ्यासस्य' इति द्वित्वे अभ्यासकार्ये 'असंयोगाल्लिट् कित्' इति लिटः कित्वाद्गुणाभावे प्राप्ते इयङ् प्रबाध्य 'एरनेकाच' इति यणि विव्यतुः इति रूपम्। नचात्र द्वितीयवकारस्य यकारात्मकहल्परकत्वात् 'उपधायाश्च' इति इकारस्य दीर्घः स्यादिति वाच्यम्, इकार-स्थानिकस्य यकारस्य 'अचः परस्मिन्' इति स्थानिवत्वेन हल्परत्वाभावात्।' न च 'न पदान्त' इति स्थानिवद्भावस्य निषेधः स्यादिति वाच्यम्, 'स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिवत्' इत्युक्तेः इति दिक्।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

विव्युः । ५४ । 'अज्' धातोः 'अजेर्व्यघञपोः' इत्यनेनाजेर्वीभावे लिटि तत्स्थाने झिप्रत्यये तस्य 'परस्मैपदाना' मित्यादिना उसादेशे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वेऽभ्याससंज्ञायां हलादिः शेषे, ह्रस्वे 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इत्यनेन प्राप्तम् इयङं प्रबाध्य 'एरनेकाचोऽसंयोगपूर्वस्य' इत्यनेन यणि [illegible] रुत्वे विसर्गे कृते 'विव्युः' इति सिद्धम् । नचात्र द्वितीयवकारस्य हल्परकत्वात् 'उपधायाञ्च' इत्यनेनेकारस्य दीर्घः कुतो नेति वाक्यम्, ईकारस्थानिकस्य यस्य 'अचः परस्मि' न्नित्यनेन स्थानिवद्भावेन हल्परकत्वाऽभावात् । न च दीर्घविधौ [illegible] पदान्ते'ति निषेधः स्यादिति वाच्यम्, 'स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिवत्' इत्युक्तेः इति दिक् ।

कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि । ५४ । कृ-सृ-भृ-वृ-स्तु-द्रु-स्रु-श्रु इत्येतेषां लिटि इट् न भवति इति सूत्रार्थः । ननु एषु कृ-सृ-भृ-एषामनुदात्तत्वात् एकाच उपदेशेऽनुदात्तात्' इत्यनेन प्रकृत्याश्रये इण् निर्षधे प्राप्ते वृङ् वृञोस्तु उदात्तत्वात् [illegible]यूकः किति इति' प्रत्ययाश्रये निषेधे प्राप्ते अस्मिन् सूत्रे कृ-सृ-वृ-भृ एषां चतुर्णां ग्रहणं व्यर्थमिति चेन्न, क्रादीनां चतुर्णां ग्रहणं नियमार्थं यत् 'प्रकृत्याश्रयः प्रत्ययाश्रयो वा यावान् इण्निषेधः स लिटि चेत्तर्हि क्रादिभ्य एव नान्येभ्यः' । तेन क्रादयः लिटि अनिटः, अन्ये तु सेट्काः । नच स्तुद्रवादीनां चतुर्णां ग्रहणं किमर्थमिति [illegible]च्यम्, थलि भारद्वाजनियमप्रापितस्य वामादिषु से-छे-वहि-महिषु च क्रादिनियमप्रापितस्य च इटो निषेधाय स्तुद्रवादिग्रहणस्य चारितार्थ्यात् इति दिक् ।

[illegible] अजन्तोऽकारवान्वा । ५७ । यो धातुः ऋदन्तभिन्नोऽजन्तः ह्रस्वाऽकारवान् वा तासौ नित्याऽनिट्, सोऽयं थलि विकल्पितेट्कः भवति । तेन 'पपिथ—पपाथ, पेचिथ—पपक्थ' इत्यादि रूपाणि भवन्ति । 'ऋदन्त ईदृक्'—यः ऋदन्तस्तासौ नित्यानिट् स थलि नित्यानिट् इत्यर्थः । 'अचस्तास्वत्थल्यनिटो नित्यम्' इति पाणिनिमते, 'ऋतो भारद्वाजस्य' इति भारद्वाजमतेऽपि तस्य अनिट्कत्वादिति भावः । तेन चकर्थ, जहर्थ इत्यादिरूपाणि भवति । क्रादन्यः—कृसृभृवृस्त्वाद्यतिरिक्तो धातुः लिटि नित्यं सेट्कः । तेन पेचिव, पेचिम, जह्रिव, जह्रिम, इत्यादि रूपाणि भवन्ति इति । १—कृसृभवृस्तुद्रुस्रुश्रुवो लिटि'

Sri Vidyatheertha Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

२. 'अचस्तास्वत्थल्यनिटो नित्यम्' ३. 'उपदेशेऽत्वतः, ४. ऋतो भारद्वाजस्य' इति सूत्रचतुष्टयानां फलितार्थः कारिकया संगृहीतः।

विवयिथ । ४६ । 'अज्—धातोः लिटि तत्स्थाने सिपि 'परस्मैपदाना' मित्यादिना तस्य णलादेशेऽनुबन्धलोपे वमादावार्धधातुके विकल्पेन 'अजेर्व्यघञपोः' इत्ययेन अजेर्वी आदेशे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वेऽभ्याससंज्ञायां ह्रस्वे 'आर्धधातुकस्येड्वलादेः' इत्यनेनेडागमे प्राप्ते 'एकाच उपदेशेऽनुदात्तात्' इत्यनेन तन्निषेधे 'ऋतो भारद्वाजस्य' इति नियमेन वैकल्पिकेडागमे गुणेऽयादेशे च कृते 'विवयिथ' इति सिद्धम् । इडभावे तु---'विवेथ' इति रूपम् । अजेर्व्यादेशाभावपक्षे अजिथ इति सिद्धम् ।

वीयात् । ४० । अजधातोराशीर्लिङि तिपि अनुबन्धलोपे 'इतश्चे' तीकारलोपे 'लिङाशिषि' इति लिङः आर्धधातुकत्वात् 'अजेर्व्यघञपोः' इति अजेर्वीभावे 'यासुट्परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे सुटि च अनुबन्धलोपे 'स्कोः' इति सकारद्वयस्य लोपे वीयात् इति सिद्धम् ।

अवषीत् । ५७ । अजधातोः लुङि तिपि 'इतश्च' इति इकारलोपे 'अजेर्व्यघञपोः' इति विकल्पेन अजेर्वीभावे शपं प्रबाध्य च्लौ तस्य सिचि अनुबन्धलोपे आर्धधातुकस्येड्वलादे 'रिति' इटि प्राप्ते 'एकाच उपदेशेऽनुदात्तात्' इति निषेधे 'अस्तिसिचोऽपृक्ते' इति ईटि 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ सस्य षत्वे अडागमे अवष त् इति । अजेर्व्यादेशाभावपक्षे-आटि 'आटश्चेति' वृद्धौ च्लौ सिचि अनुदात्तोपदेशत्वाभावात् इटि ईटि, च कृते 'इट ईटि' इति सलोपे सवर्णदीर्घे आजीत् इति सिद्धम् । निषेधात् 'वदव्रजे'ति हलन्तलक्षणा वृद्धिः नेटीति ।

अकटीत् । ४४ । कटधातोर्लुङि 'लुङ् लङ्' इत्यडागमे लङः तिपि अनुबन्धलोपे 'इतश्च' इताकारलोपे च्लौ तस्य सिचि अनुबन्धलोपे 'अकट स् त्' इति जाते सार्वधातुकसंज्ञायाम् आर्धधातुकस्येड्वलादेः' इति इटि अनुबन्धलोपे 'अस्तिसिचोऽपृक्ते' इत्यनेन ईटि च जाते अनुबन्धलोपे 'अतो हलादेर्लघोः' इति वृद्धौ प्राप्तायां 'ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्' इति तन्निषेधे 'इट ईटि' इति सिचः सस्य लोपे सिज्लोपस्य सिद्धत्वात् सवर्णदीर्घे 'अकटीत्' इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

तितिक्षिषे । ३७ । तिप्—धातोर्लिटि तत्स्थाने आत्मनेपदे थास्प्रत्यये तस्य

CC-O. In Public Domain. Digitized by eGangotri

'थासः से' इत्यनेन से आदेशे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे, अभ्याससंज्ञायां 'हलादिः शेषे' 'आर्धधातुकस्येड् वलादेः' इत्यनेन क्रादिनियमादिति इडागमे सस्य षत्वे 'तितिपिषे' इति सिद्धम्।

तिप्सीष्ट। ४५। ऋकारेत्संज्ञक तिप् धातोराशीर्लिङि तत्स्थाने आत्मनेपदे तप्रत्यये 'लिङः सीयुट्' इत्यनेन सीयुडागमे अनुबन्धलोपे 'सुट् तिथोः' इत्यनेन सुडागमे अनुबन्धलोपे 'पुगन्तलघूपधस्य च' इत्यनेन लघूपधगुणे प्राप्ते 'लिङ्सिचावात्मनेपदेषु' इत्यनेन कित्वात्तन्निषेधे 'आदेशप्रत्यययोः' इत्यनेन षत्वे ष्टुत्वे च 'तिप्सीष्ट' इति सिद्धम्।

त्रेपे। ४४। त्रप्धातोर्लिटि तत्स्थाने आत्मनेपदे तप्रत्यये 'लिटस्तझयोरेशिरेच्' इत्यनेन एशादेशे द्वित्वेऽभ्याससंज्ञायां 'तॄफलभजत्रपश्च' इत्यनेन एत्वाभ्यासलोपयोः कृतयोः 'त्रेपे' इति। अत्र 'अत एकहल्मध्ये' इत्यनेन एत्वाभ्यासलोपौ न संयुक्तहल्मध्यस्थत्वात्।

त्रेपिरे। ५६। त्रपधातोर्लिटि प्रथमपुरुषबहुवचने झः तस्य इरेचि द्वित्वादिकार्ये सिद्धम्।

उत्तम्भते। ३९। इकारेत्संज्ञक-उदुपसर्गक 'ष्टभ' धातोः 'धात्वादेः षः सः' इत्यनेन षकारस्य सकारे 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति परिभाषया ष्टुत्वनिमित्तकषकारनिवृत्तौ टकारस्यापि निवृत्तौ सत्याम् लटि तत्स्थाने आत्मनेपदे तप्रत्यये 'उदः स्थास्तम्भोः पूर्वस्य' इत्यनेन पूर्वसवर्णे सकारस्य थकारे, इदित्वात् 'इदितो नुम् धातोः' नुमि अनुबन्धलोपे नकारस्यानुस्वारे परसवर्णे च कृते थकारस्य 'खरि च' इत्यनेन चर्त्वे 'टित आत्मनेपदानां टेरे' इत्यनेन टेरत्वे 'उत्तम्भते' इति सिद्धम्।

विस्तम्भते। ४७। इकारेत्संज्ञक-व्युपसर्गक-'ष्टभ्' धातोः 'धात्वादेः षः सः' इति षस्य सत्वे निमित्तस्य षस्य निवृत्तौ नैमित्तिकस्य टस्यापि निवृत्तौ धातुत्वाल्लटि तत्स्थाने आत्मनेपदे तप्रत्यये शपि इदित्वान्नुमि अनुबन्धलोपे नस्यानुस्वारे परसवर्णे टेरेत्वे 'विस्तम्भते' इति सिद्धम्। न चात्र 'स्तम्भेः' इत्यनेन षत्वं कुतो नेति वाच्यम्, 'स्तन्भुस्तुन्भुस्कन्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च' इति सूत्रे निर्दिष्टस्यैव प्रतिपदोक्तस्य षत्वविधौ ग्रहणात्। न च तत्र किं मानमिति

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

वाच्यम्, 'उदः स्थास्तम्भोः पूर्वस्य:' इत्यत्र पवर्गीयोपधपाठस्यैव मानत्वात्। माधवमते 'स्तन्भेः' इति तवर्गीयोपधपाठस्यापि मानत्वात्। यदि तु स्वाभाविक एव टकारो न तु ष्टुत्वसम्पन्न इति मन्यते तदा 'विष्टम्भते' इति भवत्येव।

जम्भते ४५४। जभधातोर्लटि आत्मनेपदे तप्रत्यये सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे 'रधिजभोरचि' इति नुमि अनुस्वारे परसवर्णे च कृते 'टित आत्मनेपदानां टेरे' इति एत्वे 'जम्भते' इति सिद्धम्।

अगादीत्—गद्धातोर्लुङि 'लुङ्लङ्' इत्यडागमे अनुबन्धलोपे तिपि 'इतश्च' इतीकारलोपे 'च्लि लुङि' इति च्लौ 'च्लेः सिच्' इति सिचि अनुबन्धलोपे 'आर्धधातुकं शेषः' इत्यनेन सस्यार्धधातुकसंज्ञायाम् 'आर्धधातुकस्येड्वलादेः' इत्यनेन सस्य इटि अनुबन्धलोपे 'अस्तिसिचोऽपृक्ते' इत्यनेन तकारस्य 'इट ईटि' इति सलोपे 'सिज्लोप एकादेशे सिद्धो वाच्यः' इति सिज्लोपस्याऽसिद्धत्वाभावेन सवर्णदीर्घे 'अतो हलादेर्लघोः' इति विकल्पेन वृद्धौ 'अगादीत्' इति वृद्ध्यभावे 'अगदीत्' इति।

प्रणदति—प्रोपसर्गात् णद्धातोर्लटि 'णो नः' इति णस्य नत्वे लटस्तिपि शपि 'उपसर्गादसमासेऽपि णोपदेशस्य' इति णत्वे तत्सिद्धिः।

चुच्योत—इरित्संज्ञकात् श्च्युतिर्धातोर्लिटि तिपि णलि द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायां 'हलादिः शेषः' इति सूत्रं प्रबाध्य 'शर्पूर्वाः खयः' इत्यनेन अभ्यासस्य शर्पूर्वस्य खयः 'च्' इत्यस्य शेषे अन्यस्य हलः 'श—य्' इत्यनयोः लोपे 'पुगन्तलघूपधस्य च' इति गुणे उक्तं रूपं सिद्धम्।

आनर्च—अर्च् धातोर्लिटस्तिपि 'परस्मैपदानाम्' इति तिपो णलि अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इति द्वित्वे अभ्याससंज्ञायां 'हलादिः शेषः' इति हलो लोपे 'अ अर्च् अ' इति स्थिते 'अत आदेः' इत्यनेन अभ्यासाकारस्य दीर्घे 'तस्मान्नुड्द्विहलः' इति नुट्यनुबन्धलोपे 'आनर्च' इति सिद्धम्।

ववनतुः—वनधातोर्लिटि तसि 'परस्मैपदानाम्–' इति तसोऽतुसि 'लिटि धातोरि'ति द्वित्वे अभ्याससंज्ञायां हलादिः शेषे 'अत एकहल्मध्येऽनादेशादेर्लिटि' इति एत्वाऽभ्यासलोपे प्राप्ते 'न शसददवादिगुणानाम्' इति निषेधे सस्य रुत्वे विसर्गे 'ववनतुः' इति सिद्धम्।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

चिक्षयिथ, चिक्षेथ—क्षिधातोर्लिटि तत्स्थाने सिपि 'परस्मैपदानामि' ति सिपः स्थाने थलादेशे अनुबन्धलोपे 'क्षि थ' इति स्थिते 'लिटि धातोरनभ्यासस्य' इति द्वित्वे अभ्यासादिकार्ये 'चि क्षि थ' इति स्थिते क्षिधातोरजन्तत्वात् तासौ नित्यानिट्कत्वाच्च 'ऋतो भारद्वाजस्य' इति भारद्वाजमते इटि अनुबन्धलोपे 'अचि श्नुधातुभ्रुवाम्' इति इयङि 'चिक्षयिथ' इति। इडभावपक्षे गुणे 'चिक्षेथ' इति सिद्धं भवति।

क्षीयात्—क्षिधातोराशिषि लिङि तत्स्थाने तिपि अनुबन्धलोपे 'इतश्च' इति तिप इकारलोपे 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इति यासुट्यनुबन्धलोपे सुटि 'यास् स् त्' इति यासुटः ङित्वेन 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घे 'स्कोः संयोगाद्योरन्ते च' इति सकारयोः लोपे 'क्षीयात्' इति सिद्धम्।

अक्षैषीत्—क्षिधातोर्लुङि तिपि अनुबन्धलोपे 'लुङ्लङ्, इत्यडागमे अनुबन्धलोपे 'इतश्च' इति तिप इकारलोपे च्लौ तस्य सिचि इचि गते 'अक्षि स् त्' इति स्थिते 'अस्तिसिचोऽपृक्ते' इति ईटि अनुबन्धलोपे 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ 'आदेशप्रत्यययोः' इति षत्वे 'अक्षैषीत्' इति सिद्धम्।

क्राम्यति—क्रमधातोर्लटि तिपि अनुबन्धलोपे सार्वधातुसंज्ञायां शपि प्राप्ते तम्प्रबाध्य 'वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः' इत्यनेन विकल्पेन श्यनि अनुबन्धलोपे 'क्रमः परस्मैपदेषु' इति 'क्राम्यति' इति। श्यनोऽभावे शपि 'क्रामति' इति च सिद्धं भवति।

गोपायाञ्चकार, जुगोप ।५६। गुप्धातोः 'परोक्षे लिट्' इति लिटि प्राप्ते तं प्रबाध्य 'गुपूधूपविच्छिपणिपनिभ्य आयः' इति नित्यम् आयप्रत्यये प्राप्ते तम्बाधित्वा 'आयादय आर्धधातुके वा' इति विकल्पेन आयप्रत्यये तस्यार्धधातुकत्वात् 'पुगन्तलघूपधस्य च' इति गुणे 'सनाद्यन्ता धातवः' इति धातुसंज्ञायां लिटि 'कास्यनेकाच आम् वक्तव्यः' इत्याम्प्रत्यये 'लिटि आस्कासोराम्विधानान्मकारस्येत्वाभावेन लोपाभावे 'गोपाय आम् लिट्' इति स्थिते आम्प्रत्ययस्यार्धधातुकसंज्ञायाम् 'अतो लोपः' इत्यल्लोपे 'गोपाय् आम् लिट्' इति जाते 'आमः' इति लिटो लुकि आमः कृत्त्वात् प्रत्ययलक्षणेन गोपायामित्यस्य प्रातिपदिकत्वेन सुबुत्पत्तौ अव्ययसंज्ञायाम् 'अव्ययादाप्सुपः' सौ लुकि गोपायामित्यतः 'कृञ्चानु-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

प्रयुज्यते 'लिटि धातोरनभ्यासस्य' इति कृञो द्वित्वे 'गोपायाम् कृ कृ अ' इति जाते 'पूर्वोऽभ्यासः' इति पूर्वस्य कृञोऽभ्याससंज्ञायाम् 'उरत्' इत्यभ्यासऋवर्णस्य अकारे 'उरण् रपरः' इति रपरे च कृते 'गोपायाम् कर् कृ अ' इति जाते 'हलादिः शेषः' इति रलोपे 'कुहोश्चुः' इत्यनेन अभ्यासककारस्य चुत्वेन चकारे मस्य पदान्तत्वादनुस्वारे परसवर्णे 'अचो ञ्णिति' इति वृद्धौ रपरत्वे च कृते 'गोपायाञ्चकार' इति। आयप्रत्ययाभावे 'जुगोप' इति सिद्धयति।

जुगोपिथ—गुपधातोरायप्रत्ययाभावपक्षे लिटि तत्स्थाने सिपि सिपस्थला-देशे अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इति द्वित्वे अभ्याससंज्ञायां 'हलादिः शेषः' इत्यनेन अन्त्यहलो लोपे 'कुहोश्चुः' इति चुत्वे 'पुगन्तलघूपस्य च' इति गुणे 'स्वरतिसूतिसूयतिधूञूदितो वा' इत्यनेन वैकल्पिके इडागमे अनुबन्धलोपे 'जुगोपिथ' इति। इडभावपक्षे 'जुगोप्थ' इति च सिद्धयति। आयप्रत्ययपक्षे तु गोपायाञ्चकर्थ इति भवति।

अगोपायीत् । ४४ । गुप्धातोः 'आयादय आर्धधातुके वा' इत्यायप्रत्यये 'पुगन्ते' ति गुणे 'गोपाय' इति, तस्य 'सनाद्यन्ता धातवः' इति धातुत्वाल्लुङि 'लुङ्लङ्' इत्यडागमे लुङः स्थाने तिपि च्लौ तस्य सिचि अनुबन्धलोपे 'आर्ध-धातुकस्येड्वलादेः' इति इटि अनुबन्धलोपे 'इतश्च' इति पितः इकारलोपे तस्य 'अस्तिसिचोऽपृक्ते' इति ईडागमे अनुबन्धलोपे 'अतो लोपः' इत्यल्लोपेइट ईटि' इति सलोपे सिज्लोपस्य सिद्धत्वात् सवर्णदीर्घे 'अगोपायीत्' इति।

आयप्रत्ययाऽभावपक्षे गुपधातोः 'लुङ् लुङ् लङ्लृङ्क्ष्वडुदात्तः' इत्यडागमे अनुबन्धलोपे तिपि अनुबन्धलोपे 'इतश्च' इतीकारलोपे 'अगुप् त्' इति स्थिते 'च्लि लुङि' इति च्लौ 'च्लेः सिच्' इति सिचि अनुबन्धलोपे 'अगुप् स् त्' इति जाते 'स्वरतिसूतिसूयतिधूञूदितो वा' इति विभाषया इटि अनुबन्धलोपे 'अस्तिसिचो-ऽपृक्ते' इति ईटि अनुबन्धलोपे 'अगुप इ स ई त्' इति स्थिते 'इट ईटि' इति सलोपे सवर्णदीर्घे 'अगुप् ई त्' इति दशायां 'वदव्रजहलन्तस्याचः' इति वृद्धौ प्राप्तायां 'नेटि' इति निषेधे 'पुगन्तलघूपधस्य च' इति गुणे 'अगोपीत्' इति। इडभावपक्षे 'वदव्रजे'ति वृद्धौ 'अगौप्सीत्' इति च सिद्धयति।

धूपायाञ्चकार । ४० । सन्तापार्थक-धूप-धातोः 'गुपूधूपविच्छिपणिपनिभ्य आयः' इति सूत्रेण आयप्रत्यये धूपायेत्यस्य 'सनाद्यन्तेति' धातुसंज्ञायां 'कास्प्रत्या-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

दाममन्त्रे लिटि' सूत्रस्थेन 'कास्यनेकाच आम्वक्तव्यः' इति वार्तिकेन आम्प्रत्यये 'अतो लोपः' इत्यनेनाल्लोपे 'आमः इति सूत्रेण लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इत्यनेन लिट्परक-'कृ'-इत्यस्यानुप्रयोगे द्वित्वे अभ्यासत्वे रपरत्वे हलादिः शेषे चुत्वे वृद्धौ रपरत्वे कृते 'धूपायाञ्चकार' इति सिद्धम् ।

पणायति । ४२ । 'पण्'-धातोः 'गुपूधूपविच्छिपणिपनिभ्य आयः' इत्यनेन आयप्रत्यये पणायेत्यस्य 'सनाद्यन्ता धातवः' इति धातुसंज्ञायां लटि तत्स्थाने तिपि अनुबन्धलोपे शपि शकारपकारयोरित्संज्ञायां लोपे च 'अतो लोपः' इत्यनेन अल्लोपे 'पणायति' इति सिद्धम् । पनिसाहचर्यादस्मादपि धातोः स्तुतावेवाय-प्रत्ययः, व्यवहारे तु—पणते, पेणे, इत्यादि रूपम् । नचास्यानुदात्तत्वेने आत्मनेपदं कथ नेति वाच्यम्, आयप्रत्ययान्तस्यानुदात्तत्वाभावेनात्मनेपदाभावात् । नचैवं पणधातौ श्रुतस्यानुदात्तेत्वस्य वैयर्थ्यं स्यादिति वाच्यम्, तस्यार्द्धधातुक-विषये कदाचिदायप्रत्ययविनिर्मुक्ते चारितार्थ्येन वैयर्थ्याभावात् ।

पणायाञ्चकार । ४१ । व्यवहारस्तुत्यर्थकस्यापि पण्-धातोः 'गुपूधूपवि-च्छिपणिपनिभ्य आयः' इत्यत्र पनिसाहचर्यात् स्तुतावर्थे आयप्रत्यये पणायेत्यस्य 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां लिटि 'कास्यनेकाच आम्वक्तव्यः' इत्यामि अतो लोपे लिटोऽपि लुकि—'कृञ्चानुप्रयुज्यते लिटि' इत्यनेन लिट्परक 'कृ' इत्यस्यानुप्रयोगे द्वित्वेऽभ्यासादिकार्ये 'पणायाञ्चकार' इति सिद्धम् ।

क्षंसीष्ट । ३८ । क्षमधातोराशीर्लिङि तत्स्थाने आत्मनेपदे तप्रत्यये 'लिङः सीयुट्' इत्यनेन सीयुडागमे अनुबन्धलोपे 'सुट् तिथोः' इत्यनेन सुडागमे अनुबन्ध-लोपे, मस्यानुस्वारे षत्वे ष्टुत्वे इडभावपक्षे 'क्षंसीष्ट' इति रूपम् । ऊदित्वात् 'स्वरतिसूतिसूयतिधूञूदितो वा' इत्यनेन इडागमपक्षे तु क्षमिषीष्टेति सिद्ध्यति ।

अक्षमिष्ट । ६५ । 'क्षम्'—धातोर्लुङि तत्स्थाने आत्मनेपदे तप्रत्यये 'लुङ्-लङ्लृङ्क्ष्वडुदात्तः' इत्यनेनाडागमेऽनुबन्धलोपे च्लिप्रत्यये तस्य सिजादेशे इचा-वितौ 'आर्धधातुकस्येड्वलादेः' इत्यनेन इडागमे प्राप्ते तम्प्रबाध्य ऊदित्वेन 'स्वर-तिसूतिसूयतिधूञूदितो वा' इत्यनेन वैकल्पिके इडागमे अपृक्तहलोऽभावात् 'अस्ति-सिचोऽपृक्ते' इत्यनेनेडभावे षत्वे च कृते 'अक्षमिष्ट' इति सिद्धम् । इडभावपक्षे तु—मस्याऽनुस्वारे 'अक्षंस्त' इति बोध्यम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

णेरनिटि । ७८।८२। अत्र 'णे' रिति णिङ्णिचोर्ग्रहणम् । 'आर्धधातुके' इत्यधिकृतम् । 'अतो लोप' इत्यस्माल्लोप इत्यनुवर्तते, अनिटोत्यस्य आर्द्धधातुकविशेषणत्वात् 'यस्मिन्विधिस्तदादावल्ग्रहणे' इति परिभाषया तदादिविधिः । तथा च—अनिडादावार्द्धधातुके परे णेर्लोपः स्यादित्यर्थः । तेन 'अचीकमत इत्यादौ णिलोपः सिद्ध्यति ।

सन्वल्लघुनि चङ्परेऽनग्लोपे । ६८ । अत्र सूत्रे सन्वत्, लघुनि, चङ्परे, अनग्लोपे इति च्छेदः । अङ्गस्येति णिरिति चानुवर्तते । कार्यकालपक्षे पूर्वोऽभ्यास इत्यस्योपस्थितिर्भवति । णिरिति अङ्गस्य चेति द्वयमप्यावर्तते । तत्र एको णिः लघुनि इत्यत्रान्वेति । अङ्गस्येति षष्ठी निमित्तनिमित्तिभावे तस्य चैकस्य चङ्परे इत्यत्रान्वयः । तथा च अङ्गसंज्ञानिमित्तं यच्चङ्परं णिः तत्परं यल्लघु तस्मिन् परे इत्यर्थो लभ्यते । ततः द्वितीयस्य अङ्गस्य इत्यत्रान्वयः । सन्वत् इति सप्तम्यन्तात् वतिः तथा च यः अङ्गस्याभ्यासस्तस्य सति इव कार्यं स्यात् इत्यर्थो लभ्यते । ततः द्वितीयस्य णिः इत्यस्य अनग्लोपे इत्यत्रान्वयः । तेन णावग्लोपेऽसति इति लभ्यते । तथा च अङ्गसंज्ञानिमित्तं यच्चङ्परं णिः तत्परं यल्लघु तत्परको यः अङ्गकर्मकद्विरुच्चारणकर्मीभूतस्य पूर्वो भागः अभ्यासः तस्य सनीव कार्यं स्यात् चङ्परे णावग्लोपेऽसति इत्यर्थं इति माधवः ।

वस्तुतस्तु अङ्गस्येति नावर्तते । प्रत्ययस्याङ्गांशे उत्थिताकांक्षतया चङ्परे इत्येतावतैव णिरिति लभ्यते । लघुनि इति च अभ्यासस्येत्येत्रान्वेति । तथा च चङ्परे णौ यदङ्गं तदवयवो योऽभ्यासः लघुपरस्तस्य सनीव कार्यं स्यात् णावग्लोपेऽसति इत्यर्थः । इदं व्याख्याद्वयं कैयटेनैव वर्णितम् इति ।

संज्ञायाः कार्यकालत्वात् । ६३,६५ । कार्यकालं संज्ञापरिभाषम् इति पक्षे संज्ञाशास्त्रविधिशास्त्रयोरेकवाक्यतया 'सन्वल्लघुनि चङ्परेऽनग्लोपे' इत्यस्य उपस्थित्या चङ्परो यस्मात् इति बहुव्रीहौ समासे अङ्गस्य णिः इत्यस्यानुवृत्तौ आवृत्तौ च कृतायां एको णिः लघुनीत्यत्र, अपरो णिः अनग्लोपे इत्यत्रान्वेति । एवं एकः अङ्गस्येति चङ्परे इत्यत्र अपरश्च अभ्यासस्येत्यत्रान्वेति । तेन अङ्गसंज्ञानिमित्तं यच्चङ्परं णिः तत्परं यल्लघु तत्परको यः अङ्गकर्मकद्विच्चारणकर्मीभूतस्य पूर्वो भागः अभ्यासस्तस्य सनीव कार्यं भवति चङ्परे णावग्लोपेऽ-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सति इति सूत्रार्थः । एवं च यत्र अङ्गकर्मकद्विरुच्चारणं अचीकमत इत्यादौ तत्रैव सन्वद्भावः दीर्घश्च भवतः नतु अनेकाक्षु । तथाच अचचकासत्, आर्तथपत् औणु-नवत् इत्याद्येव रूपमिति माधवमतम् ।

नच कार्यकालपक्षे संज्ञाशास्त्रविधिशास्त्रयोरेकवाक्यताङ्गीकारे पूर्वोऽभ्यासः हलादिः शेषः, इत्यादीनामपि यत्र अङ्गस्य द्विरुच्चारणं तत्रैव प्रवृत्तिः स्यात् इति अचचकासत् इत्यादि न सिद्ध्येत । अतः संज्ञाशास्त्रविधिशास्त्रयोः यथोद्देशं संज्ञापरिभाषम् इति पक्ष एवाङ्गीकर्तव्यः । यथा च अङ्गस्येति नावर्तते प्रत्यय-स्याङ्गांशे उत्थिताकांक्षत्वात् चङ् परे इत्येतावतैव णिरिति लभ्यते । एवं च चङ् परे णौ यदङ्गं तदवयवो योऽभ्यासः लघुपरस्तस्य सनीव कार्यं स्यात् णावग्लोपेऽसति इत्यर्थः । एवं सति अचचकासत् इति रूपस्य च सिद्धिः । यद्वा सन्निहितत्वात् चङ् पर इत्यस्य लघुनि अन्वयः, चङ् परे च णौ यल्लघु तत्पर-को यदङ्गस्याभ्यासस्तस्य सनीव कार्यं स्यात् चङ् परे णावग्लोपेऽसति इति सूत्रार्थः । तेन अचीचकासत् इति रूपं व्याख्याद्वयेऽपि साध्वेव । औणुनवत इत्यत्र दीर्घः सन्वभावश्च सिद्ध्यतः । इदं च व्याख्याद्वयं कैयटेनैव वर्णितम् । न च णेः आवृत्तौ अग्लोपसम्बन्धे च किं मानम् इति वाच्यम्, पचिकमिशकिप्रभृती-नाम् अपि सन्वद्भावादिसिद्धेरेव मानत्वात्, अन्यथा अनुबन्धलोपमादायाग्लोपि त्वात् दीर्घसन्वद्भावौ न स्याताम् इति दिक् ।

निरयते, दुरयते, प्रत्ययः । ननु निस्, दुस्, इति सान्तयोरुपसर्गयोरय-धातुयोगे निरयते दुरयते इत्यादौ 'उपसर्गस्यायतौ' इतिलत्वं स्यादिति चेन्न, रुत्वस्यासिद्धत्वेन तदप्राप्तेः । न च प्रत्ययः इत्यत्र लत्वं कुतो नेति वाच्यम् तस्य इण्धातोः सिद्धे लत्वस्य प्राप्त्यभावात् ।

कथं विततोर्ध्वरश्मिरज्जाविति । ६७ । ननु अय-धातोरनुदात्तत्वेन आत्म नेपद एव रूपाणि भवन्ति । तर्हि कथं भावे उदयति इति उदुपसर्गात् अयधातो शतृप्रत्यये कृदन्तत्वाद् प्रातिपदिकत्वेन सप्तम्येकवचने ङौ उदयति इति प्रयोग आत्मनेपदत्वेन शानचः एव प्रसक्तेरिति चेन्न, इटकिटकटी इत्यत्र प्रश्लिष्टस्य इधातोरनुदात्तत्वाभावात् शतृप्रत्ययस्य निर्बाधत्वात् । नच इकारप्रश्लेषे माना-भाव इति वाच्यम् । अनुदात्तेत्वलक्षणमात्मनेपदमनित्यम् इति नियमेन उदयति

Sri Vidyabharathi Book Centre, Sringeri

 CC-O. In Public Domain. Digitized by eGangotri

इति रूपे बाधाभावात् । नचात्र किं मानमिति वाच्यम्, चक्षिङः इकारस्यानुदात्तत्वेन आत्मनेपदसिद्धौ ङित्करणस्यैव मानत्वात् ।

पिप्ये । ७१, ७३ । 'प्याय्' धातोर्लिटि तत्स्थाने तप्रत्यये द्वित्वे प्राप्ते 'प्यायः पी' इत्यनेन पीभावे च प्राप्ते तत्र परत्वात् पीभावे कृते ततो द्वित्वेऽभ्याससंज्ञायां ह्रस्वे तस्य 'लिटस्तझयोरेशिरेच्' इत्यनेन एकादेशे शकारस्येत्संज्ञायां लोपे च जाते 'एरनेकाचोऽसंयोगपूर्वस्य' इत्यनेन यणि 'पिप्ये इति सिद्धम् । नचात्र द्वित्वं बाधित्वा प्यायः पीभावे कृते 'विप्रतिषेधे यद्बाधितं तद् बाधितमेवे'ति न्यायात् पुनर्द्वित्वं न स्यादिति वाच्यम्, 'पुनः प्रसङ्गविज्ञानात्सिद्धम्' इति परिभाषया विप्रतिषेधबाधितस्य पुनः प्रवृत्तेरभ्युपगमात् ।

पिप्याते । ५६ । 'प्याय' धातोर्लिटि तत्स्थाने आताम्प्रत्यये द्वित्वे प्राप्ते 'प्यायः पी' इत्यनेन पीभावे च प्राप्ते तत्र परत्वात् पीभावे कृते ततो द्वित्वेऽभ्याससंज्ञायां ह्रस्वे 'एरनेकाचोऽसंयोगपूर्वस्य' इत्यनेन यणि टेरेत्वे पिप्यात् इति सिद्धम् । नचात्र द्वित्वं बाधित्वा प्यायः पीभावे कृते विप्रतिषेधे यद्बाधितं तद्बाधितमेवेति न्यायात् पुनर्द्वित्वं न स्यादिति वाच्यम्, 'पुनः प्रसङ्गविज्ञानात्सिद्धम्' इति परिभाषया विप्रतिषेधबाधितस्य पुनः प्रवृत्तेरभ्युपगमात् ।

अप्यायि । ७२ । प्याय्-धातोर्लुङि तत्स्थाने तप्रत्यये 'लुङ् लङ् लृङ् क्ष्वडुदात्तः' इत्यनेन अडागमे च्लिप्रत्यये तस्य सिजादेशे प्राप्ते तमपवाद्य 'दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्' इत्यनेन विकल्पेन चिणि अनुबन्धलोपे 'चिणो लुक्' इत्यनेन तशब्दस्य लोपे 'अप्यायि' इति सिद्धम् । चिणभावपक्षे सिजादेशे 'आर्धधातुकस्येड्वलादेः' इत्यनेन इडागमे षत्वे ष्टुत्वे 'अप्यायिष्ट' इति सिद्धम् । अपृक्तहलोऽभावात् 'अस्तिसिचोऽपृक्ते' इत्यनेन ईडागमस्तु न भवतीति दिक् ।

जिगाय । ७०,७२ । जि—धातोर्लिटि तत्स्थाने तिपि तस्य परस्मैपदानामित्यादिना णलादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वेऽभ्याससंज्ञायां 'संल्लिटोजेः' इत्यनेनाभ्यासात्परस्य जस्य कुत्वे 'अचो ञ्णिति' इत्यनेन वृद्धौ, आयादेशे जिगाय इति सिद्धम् ।

अचीकमत । ६९,७० । कान्त्यर्थकात् कम् धातोः 'कमेर्णिङ्' इत्यनेन विकल्पेन णिङ् प्रत्ययेऽनुबन्धलोपे णिङन्तत्वाद् कामिस्वरूपे सनाद्यन्ता धातवः

Sri Vidyadhiraja Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

इत्यनेन धातुसंज्ञायां लुङि तत्स्थाने त-प्रत्यये अडागमे च्लिप्रत्यये तस्य 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इत्यनेन चङादेशेऽनुबन्धलोपे 'अकाम इ अ त इत्यवस्थायां परत्वात्। 'एरनेकाचोऽसंयोगपूर्वस्य' इत्यनेन यणि प्राप्ते 'ण्यल्लोपावियङ्गुणवृद्धिदीर्घेभ्य पूर्वविप्रतिषेधेन' इति वार्तिकेन 'णेरनिटि' इत्यनेन णिलोपे ततः णौ चङ्युपधाया ह्रस्वः' इत्यनेन उपधाया ह्रस्वो 'चङि' इत्यनेन द्वित्वेऽभ्याम संज्ञायां हलादिः शेषे 'कुहोश्चुः' इति सूत्रेण चुत्वे 'सन्वल्लघुनि चङ्परेऽनग्लोपे' इत्यनेन सन्वद्भाव 'सन्यतः' इत्यनेन इत्वे 'दीर्घो लघोः इति सूत्रेण लधोरभ्यासस्य दीर्घे 'अचीकमत' इति। णिङभावपक्षे तु—'कमेश्च्लेश्चङ् वाच्यः, इत्यनेन च्लेश्चङि चङ्परकणेरभावेन सन्वद्भावाभावादित्वदीर्घयोरभावे—'अचकमत' इति सिद्धम्।

सायात्। ४५। 'षण' धातोर्लिङि 'धात्वादे षः सः' इत्यनेन षस्य सकारे नैमित्तिकस्य णत्वस्याऽपि निवृत्तौ लिङः स्थाने तिप्यनुबन्धलोपे 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे 'सुट तिथोः' इत्यनेन च सुडागमेऽनुबन्धलोपे 'स्कोः संयोगाद्योरन्ते च' इत्यनेन सकारद्वयस्यापि निवृत्तौ 'ये विभाषा' इत्यनेन वैकल्पिके आत्वे 'सायात्, सिद्धम्। पक्षे 'सन्यात्, इति रूपम्।

अक्रमीत। ७२। ७४। क्रमधातोर्लुङि तिपि 'लुङ्लङ्' इत्यागमे अनुबन्धलोपे 'इतश्च' इति इकारलोपे 'स्नुक्रमोरनात्मनेपदनिमित्ते' इत्यनेन सस्य इटि 'अस्तिसिचोऽपृक्ते' इत्यनेन तस्य च ईटि अनुबन्धलोपे अक्रम् इ स् ई त् इति जाते 'इट ईटि' इति सलोपे सवर्णदीर्घे 'अक्रमीत्' इति सिद्धम्। न च अतो हलादेर्लघोः इति वृद्धिः कुतो नेति वाच्यम 'ह्मयन्तक्षणश्वसजागृणिश्व्येदिताम्' इति निषेधात्। न चास्य धातोरनुदात्तोपदेशान्तभावादिटि सिद्धे 'स्नुक्रमो' रित्यनेन इड्विधानं व्यर्थमिति वाच्यम्, अत्रैवेडिति नियमार्थत्वेन स्तोष्यते जलेन, उपक्रंस्यते इत्यादिभावकर्मलकारेषु इडभावात्।

धिनोति। ६१।६६। 'धिव' धातोर्लटि तिपि अनुबन्धलोपे इदित्वान्नुमि सार्वधातुकसंज्ञायां शपि प्राप्ते 'धिन्विकृण्व्योर च' इत्यनेनाकारान्तादेशे उप्रत्यये च कृते धिन्-अ-उ-ति' इत्यावस्थायाम् 'अतो लोप इत्यनेन अकारलोपे 'सार्वधातुकार्धधातुकयोः' इत्यनेनोकारस्य गुणे कृते 'पुगन्तलघुपधस्ये'ति गुणस्तु अल्लोपस्य स्थानिवद्भावान्न, 'धिनोति' इति सिद्धम्।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

नन्वत्र वकारस्याकारं विधायाल्लोपापेक्षया लाघवात् वलोप एवानेन विधीयतामिति चेत् ? न, लोपस्याजादेशत्वाभावात्स्थानिवद्भावाभावेन लघूपधगुणापत्तेः। अल्लोपे तु अजादेशत्वेन स्थानिवद्भावाद् गुणस्याप्रवृत्तेः।

धिनु। ६५।६६। धिव् धातोर्लेटि तत्स्थाने सिपि 'सेर्ह्य पिच्च' इत्यनेन ह्यादेश इदित्वात् 'इदितो नुम् धातोः' इत्यनेन नुमि शपं प्रबाध्य 'धिन्विकृण्व्योर च' इत्यनेन वकारस्याऽकारे उप्रत्यये च कृते 'अतो लोपः' इत्यनेनाऽल्लोपे तस्य स्थानिवद्भावाल्लधूपधगुणाभावे 'उतश्च प्रत्ययादसंयोगपूर्वात्' इत्यनेन हेर्लुकि धिनु' इति सिद्धम्।

धिनवाव। ७६ : धिव' धातोर्लोटि तत्स्थाने वस्प्रत्यये इदित्वान्नुमि अनुबन्धलोपे सार्वधातुकसंज्ञायाम् 'धिन्वकृण्व्यो र च' इत्यनेन शपं प्रबाध्य वकारस्याकारे उत्प्रत्यये च कृते, अतो लोपे 'लोपश्चस्यान्यतरस्याम्म्वोः इत्यनेनोकारलोपे प्राप्ते ततो नित्यत्वादाडागमे अनुबन्धलोपे गुणेऽवादेशे च कृते 'लोटो लङ्वत्' इति लङ्वदतिदेशे 'नित्यं ङितः इत्यनेन सकारस्य लोपे 'धिनवाव' इति सिद्धम्।

अघाक्षि ६६,७२। 'गाह'—धातोर्लुङि तत्स्थाने इट्प्रत्यये तस्य एत्वे अडागमे च्लिप्रत्यये तस्य सिजादेशे इजावितौ 'स्वरतिसूयतिधूञूदितो वा' इत्यनेन वैकल्पिकस्य इडो विधानादत्तभावपक्षे 'हो ढः' इति हस्य ढत्वे 'एकाचो बशो भष् झषन्तस्य स्ध्वः' इत्यनेन भष्भावे 'षढोः कः सि' इत्यनेन ढस्य कत्वे ततः षत्वे कषसंयोगे क्षे जाते अघाक्षि इति सिद्धम्।

जघृक्षे। ६७,७५। गृह-धातोर्लिटि तत्स्थाने आत्मनेपदे थासि 'थासः से' इत्यनेन थासः से कृते कादित्वेनेटो वैकल्पिकत्वात्तद्भावपक्षे 'लिटि धातो' रिति द्वित्वे अभ्याससंज्ञायां तस्य 'उरत्' इत्यत्वे रपरत्वे हलादिः शेषे 'कुहोश्चुः' इत्यनेन चुत्वेन जकारे लिटः कित्त्वेन गुणाभावे हस्य ढत्वे 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इत्यनेन भष्भावे 'षढोः कः सि' इत्यनेन ढस्य कत्वे कषसंयोगे क्षे जाते 'जघृक्षे' इति सिद्धम्। नचात्र कित्त्वात्परत्वेन गुणः कथन्नेति वाच्यम्? 'ऋदुपधेभ्यो लिटः कित्त्वं गुणात् पूर्वविप्रतिषेधेन' इति वार्तिकेन पूर्वं कित्वस्यैव जातेन गुणस्य प्रसक्तेरभावात्। अतो 'जघृ' इति जघृक्षे इति भवति।

Sri Vidyabharathi Book Centre Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अक्ष्णोति । ५७ । अक्षधातोर्लटि तिपि शपं प्रबाध्य 'अक्षोऽन्यतरस्यामिति' श्नुप्रत्यये गुणे अक्ष्णोति इति । पक्षे शपि अक्षति इति सिद्ध्यति ।

अक्ष्णुतः । ७० । 'अक्ष्' धातोर्लटि तत्स्थाने तसि सार्वधातुकसंज्ञायां शपि प्राप्ते तमपवाद्य 'अक्षोऽन्यतरस्याम्' इत्यनेन विकल्पेन श्नुप्रत्ययेऽनुबन्धलोपे तसो ङित्त्वेन श्नोरुकारस्य गुणाभावे णत्वे सस्य रुत्वे विसर्गे 'अक्ष्णुतः' इति सिद्धम् । पक्षे शपि 'अक्षतः' इति सिद्ध्यति ।

अक्ष्यति । ७८ । अक्षधातोर्लृटि तत्स्थाने तिपि अनुबन्धलोपे शपमवाद्य स्यप्रत्यये 'अक्ष स्यति' इत्यवस्थायां 'स्कोः संयोगाद्योरन्ते च' इत्यनेन कलोपे 'षढोः कः सि' इत्यनेन षस्य कत्वे तत्परस्य सस्य षत्वे 'अक्ष्यति' इति रूपं निष्पन्नम् ।

आष्टाम् । ७० । अक्षधातोर्लुङि न माङ्योगे इति निषेधेन आटो निषेधे तत्स्थाने तसि 'तस्थस्थमिपां तान्तन्तामः' इति तसस्तामादेशे च्लौ तस्य सिजादेशे 'वदव्रजहलन्तस्याचः' इत्यनेन हलन्तलक्षणवृद्धौ 'स्कोः संयोगाद्योरन्ते च' इत्यनेन ष्टुत्वे 'आष्टाम्' इति, स्वरतीतीडोऽभावे रूपं निष्पन्नम् । अत्र प्रयोगे आडोऽभावे वृद्धौ रूपसिद्धिदर्शनाय 'मा भवान्' मूले प्रयुक्तम् ।

तक्ष्णोति । ७६ । 'तक्ष'-धातोर्लटि तत्स्थाने तिप्यनुबन्धलोपे शब्विषये 'तनूकरणे तक्षः' इत्यनेन विकल्पेन श्नुप्रत्यये तिपः पित्त्वेन ङित्वाभावात् 'सार्वधातुके'ति गुणे णत्वे 'तक्ष्णोति' इति सिद्धम् । श्नुप्रत्ययाऽभावे शपि तक्षति— इति रूपम् ।

अपोषीत् । ७५ । 'पुष्'—धातोर्लुङि तत्स्थाने तिप्यनुबन्धलोपे अडागमे च्लिप्रत्यये तस्य सिजादेशे इचावितो 'आर्धधातुकस्येड्वलादेः' इत्यनेन इडागमे 'अस्तिसिचोऽपृक्ते' इत्यनेन सलोपे सवर्णदीर्घे लघूपधगुणे षत्वे 'अपोषीत्' इति सिद्धम् । नचानिट्कारिकास्वस्य पाठात् शल इगुपधादनिटः क्सः' इत्यनेन क्सादेशः स्यादिति वाच्यम्, अनिट्कारिकासु श्यना निर्देशनास्य सेट्कत्वात् । नचैवमपि पुषादित्वात् च्लेरङ् कुतो नेति वाच्यम्, अत्रापि श्यना निर्देशात् ।

घस्लृ अदने । ३७ । 'अदनार्थकः घसधातुः न सार्वत्रिकः' अदधातोः स्थाने लिट्यन्यतरस्यामितिघ सलादेशविधानात् । अन्यथा घसधातुनैव लिटि जघासादिप्रयोगाणां सिद्धौ अदो घसादेशविधानं व्यर्थं स्यात् । न च केषु लकारेषु प्रत्ययेषु च अस्य प्रयोग इति निर्णयः कथं स्यादिति वाच्यम्, यत्र लिङ्ग वचनं वा अस्ति

Sri Vidyabharathi Book Centre, Sringeri

 CC-O. In Public Domain. Digitized by eGangotri

तत्रैवास्य प्रयोगकल्पनेनादोषात्। ततश्च अत्रैव भ्वादिगणे परस्मैपदे च लिङ्गम्। न च धातुसंज्ञार्थं पाठ इति वाच्यम्, द्युत दीप्तौ इत्यतः प्राक् घसधातोः पाठेनैव सिद्धे अत्र पाठस्य ज्ञापकत्वात्। एवं लृदित्करणम् अङि लिङ्गम्। न च घसादेशेनैव अघसत् इत्यादीनां सिद्धौ लृदित्करणं व्यर्थमिति वाच्यम्, अघात्सीत् इति प्रयोगवारणाय लृदित्करणस्य अङर्थमावश्यकत्वात्। एवं अनिटकारिकासु घसधातोः पाठः वलाद्यार्धधातुके लिङ्गम्। एवं 'सृघस्यदः क्मरच्' इति प्रत्यक्षवचनेन विशिष्य घसेः क्मरच् विधानात् क्मरचि घस्मरः इति सिद्धयति। यतः धातुमध्ये पठनीयत्वात्।

शेखरकृतस्तु लिट्यन्यतरस्याम् इति आदेशविधानात् स्वतन्त्रस्य घसः असार्वत्रिकत्वकल्पनापेक्षया लिटि प्रयोगाभावकल्पनस्यैवौचित्यम्। अन्यथा अनिटकारिकासु पाठबलेन वलाद्यार्धधातुके प्रयोगे तासौ नित्यानिटकत्वात् थलि 'उपदेशेऽत्वतः' इतीटो निषेधे जघस्थ इति रूपापत्तिः स्यात्। न च 'घसेः प्रतिषेधो वक्तव्यः' इति वार्तिकेन निषेधे इट स्यादिति वाच्यम्, वार्तिकप्रत्याख्यानासङ्गतिवारणाय लिट्यप्रयोगकल्पनस्यैवौचित्यात्। अन्यथा वार्तिकप्रत्याख्यानपक्षे जघसिथ इति न स्यात्। घस्लादेशेऽच्युपसंख्यानम् इति अचि घस्लादेशविधानात् प्रघसः इत्येव यथा स्यात् अदः इति मा भूत् इति वदन्ति इति दिक्।

विद्युते। ६८। द्युत्धातोर्लिटि प्रथमपुरुषैकवचने तादेशे 'लिट् च' इत्यार्धधातुकत्वे 'लिटस्तझयोः—' इति तकारस्य स्थाने एशि अनुबन्धलोपे 'लिटि धातो—' इति द्वित्वे अभ्यासत्वे 'द्युतिस्वाप्योः सम्प्रसारणम्' इति अभ्यासयकारस्य सम्प्रसारणे इकारे 'सम्प्रसारणाच्च' इति पूर्वरूपे 'दित् द्युत् ए' इति स्थिते हलादिः शेषः' इति अभ्यासतकारस्य लोपे दिद्युते इति सिद्धम्।

अद्युतत्।६४,७९। द्युत्धातोर्लुङि 'द्युद्भ्यो लुङि' इति विभाषया परस्मैपदसंज्ञके तिपि 'लुङ् लुङ्' इत्यडागमे अनुबन्धलोपे शपं प्रबाध्य 'च्लि लुङि' इति च्लौ 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' इति च्लेरङि अनुबन्धलोपे ङित्वाद् गुणनिषेधे 'इतश्च' इति तिप इकारलोपे अद्युतत् इति सिद्धत्।

अद्योतिष्ट। ६५। द्युत्धातोर्लुङि 'द्युद्भ्यो लुङि' इति विकल्पेन लुङ्लङ—इत्यडागमे अनुबन्धलोपे 'च्लि लुङि' इति च्लौ 'च्लेः सिच्' इति सिचि इडागमे, 'आर्धधातुकस्येड्वलादेः' इति इति 'पुगन्तलघूपधस्य च' इति गुणे 'आदर्श-

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

प्रत्ययोः' इति षत्वे ष्टुत्वे 'अद्योतिष्ट' इति । नचात्र द्युतादित्वादङ् कुतो नेति वाच्यम्, सूत्रे परस्मैपदे एव च्लेरङ् विधानेनात्राप्रवृत्तेः ।

मिमिदे । ७४ । स्नेहनार्थक–'मिद्'–धातोर्लिटि तप्रत्यये 'लिटस्तझयोरेशिरेच्' इत्यनेन एकादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वेऽभ्याससंज्ञायां हलादिः शेषे 'असंयोगाल्लिट कित्' इत्यनेन लिटः कित्त्वाल्लघूपधगुणाभावे 'मिमिदे' इति सिद्धम् । नच अत्र 'मिदेर्गुणः' इत्यनेन गुणः कुतो नेति वाच्यम्, ष्ठिवुक्लमुचमां शिति' इत्यादावेव गुणविधानात्प्रकृते एश आदेशित्वाभावान्नानेन गुण इति दिक् ।

वत्स्यति । ७६,७८ । वृतधातोर्लुटि 'वृद्भ्यः स्यसनोः' इति विभाषया परस्मैपदे लुटः स्थाने तिपि अनुबन्धलोपे 'स्यतासी लृलुटोः इति स्यप्रत्यये तस्यार्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति इटि प्राप्ते 'न वृद्भ्यश्चतुर्भ्यः' इति निषेधे 'पुगन्तलघूपधस्य च' इति गुणे रपरत्वे 'वत्स्यति' इति । पक्षे 'वर्तिष्यते' इति सिद्धम् ।

सस्यन्दे । ७० ७२ । प्रस्रवणार्थक 'स्यन्द' धातोर्लिटि तप्रत्यये 'लिटस्तझयोरेशिरेच्' इत्यनेन तस्यैशादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वेऽभ्याससंज्ञायां हलादिःशेषे प्राप्ते तमपवाद्य 'शर्पूर्वाः खयः' इत्यनेन खयः शेषे सस्यन्दे इति सिद्धम् ।

स्यन्त्स्यति । ७१,७३ । प्रस्रवणार्थक 'स्यन्द्' धातोर्लृटि वृद्भ्यः स्यसनोः' इति परस्मैपदपक्षे तिपि अनुबन्धलोपे शपमपवाद्य स्यप्रत्यये 'आर्धधातुकस्येड्वलादेः' इत्यनेन इडागमे प्राप्ते तं प्रबाध्य ऊदित्वात् 'स्वरतिसूतिसूयतिधूञूदितो वा' इत्यनेन वैकल्पिकः इट् प्राप्तः, तस्यापि 'न वृद्भ्यश्चतुर्भ्यः' इत्यनेन निषेधे इस्य चर्त्वे 'स्यन्त्स्यति' इति सिद्धम् ।

नच सकारादिविशेषापेक्षतया तङानाभावनिमित्तापेक्षतया च न 'वृद्भ्यः' इति निषेधस्य बहिरङ्गत्वेन तदपेक्षया ऊदिल्लक्षणेड्विकल्पस्यैवान्तरङ्गत्वादिदिति नोक्तरूपं सिद्धयतीति वाच्यम्, 'न वृद्भ्यश्चतुर्भ्यः' इत्यत्र चतुर्ग्रहणवैयर्थ्यापत्त्या अन्तरङ्गमपि विकल्पं बाधित्वानेन निषेधात् । न च कृपुव्यावृत्त्यर्थं तदिति वाच्यम्, तत्र 'तासि च क्लृपः' इत्यत्र चकारेण सकाराद्यार्धधातुकेऽपि निषेधसिद्धिनिषेधप्रवृत्तेः इति दिक् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अस्यदत् । ८५ । प्रस्रवणार्थक—'स्यन्द्'—धातोर्लुङि 'द्युद्भ्यो लुङि' इत्यनेन वैकल्पिकपरस्मैपदे तिप्यनुबन्धलोपे अडागमे च्लिः, तस्य सिजादेशे प्राप्ते तमपवाद्य 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' इत्यनेनाङि 'अनिदितां हल उपधायाः क्ङिति' इत्यनेन नलोपे 'अस्यदत्' इति । परस्मैपदाऽभावपक्षे आत्मनेपदे तु—अङभावाच्च्लेः सिजादेशे ऊदित्वात् 'स्वरतिसूतिसूयतिधूञूदितो वा' इत्यनेन वैकल्पिकेडागमे नलोपाऽभावे षत्वे ष्टुत्वे 'अस्यन्दिष्ट' इति । इडभावपक्षे—अस्यन्द् स् त' इति दशायां 'झलो झलि' इत्यनेन सलोपे दस्य चर्त्वे 'अस्यन्त' इति च सिध्यति । नचाऽपित्वेन ङित्वात् 'अनिदिता' मिति नलोपः कथं नेति वाच्यम्, सिज्लोपस्याऽसिद्धत्वेनाऽनुपधात्वात् ।

अनुस्यन्दते । ४५,७३ । 'अनु' इत्युपसर्गपूर्वकात् 'स्यन्द' धातोर्लटि आत्मनेपदे तप्रत्यये सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे 'टित आत्मनेपदानां टेरे' इत्येत्वे 'अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु' इति विभाषया सस्य षत्वे 'अनुस्यन्दते' इति च सिद्धयति । जलम् इति शेषः । 'अनुस्यन्दते हस्ती' इत्यत्र तु न षत्वं प्राणिनो हस्तिनः कर्तुर्वर्तमानत्वेन अप्राणिकर्तृकत्वाभावात् ।

चक्लृपे । ६६,६९ । कृपूधातोर्लिटि तत्स्थाने तप्रत्यये एशादेशे 'लिटि धातोः—' इत्यनेन द्वित्वेऽभ्याससंज्ञायाम् 'उरत्' इत्यत्वे रपरत्वे हलादिःशेषे 'कुहोश्चुः' इत्यनेन चुत्वे 'चकृप ए' इत्यवस्थायाम् 'असंयोगाल्लिट् कित्' इत्यनेन लिटः कित्वेन गुणाऽभावे ऋकारैकदेशस्य रेफसदृशस्य 'कृपो रो लः' इत्यनेन लकारसदृशे कृते 'चक्लृपे' इति सिद्धम् ।

कल्प्तासि । ७८ । सामर्थ्यार्थक-'कृपू'—धातोर्लुटि 'लुटि च क्लृपः' इत्यनेन विकल्पेन परस्मैपदे सिपि अनुबन्धलोपे तासि, ऊदित्वात्—'स्वरतिसूतिसूयतिधूञूदितो वा' इत्यनेनेड्विकल्पे प्राप्ते 'तासि च क्लृपः' इत्यनेन तन्निषेधे 'पुगन्तेति' गुणे रपरत्वे 'कृपो रो लः' इत्यनेन लत्वे च कृते 'कल्प्तासि' इति सिद्धयति । परस्मैपदाभावपक्षे तु आत्मनेपदे विकल्पेनोदिल्लक्षणेडागमे टेरेत्वे कल्पितासे । इडभावपक्षे च 'कल्प्तासे' इति सिद्धयति ।

क्लृप्सीष्ट—कृपू इत्यस्माद्धातोराशीर्लिङि आत्मनेपदे तप्रत्यये 'लिङः सीयुट्' इति सीयुटि 'सुट् तिथोः' इति सुटि अनुबन्धलोपे 'कृप् सी स् त' इति

Sri Vidyabharathi Book Centre, Shringeri

CC-O. In Public Domain. Digitized by eGangotri

स्थिते स्वरतिसूति-' इति ऊदित्वात् वेटि 'पुगन्त—' इति गुणे रपरत्वे 'कृपो रो लः' इति रेफस्य लत्वे उभयोः सकारयोः पर्यायेण षत्वे ष्टुत्वे 'कल्पिषीष्ट' इति। इडभावे तु 'कृप् सी स् त' इत्यवस्थायां 'कृपो रो लः' इति लत्वे कृते 'पुगन्त—' इति गुणे प्राप्ते 'लिङ्सिचावात्मनेपदेषु' इति लिङः कित्त्वेन 'क्ङिति च' इति गुणनिषेधे सस्य षत्वे ष्टुत्वे 'क्लृप्सीष्ट' इति सिद्धम्।

अक्लृप्त। ७१—कृप्धातोर्लुङि 'द्युद्भ्यो लुङि' इति विकल्पक्षे आत्मनेपदे तप्रत्यये 'लुङ्लङ्—' इत्यडागमे च्लौ सिचि, अनुबन्धलोपे 'स्वरतिसूति' इति ऊदित्वाद् वेटि 'अ कृ प् स् इ त' इति स्थिते 'पुगन्तलघूपधस्य च' इति गुणे रपरत्वे 'कृपो रो लः' इति रेफस्य लत्वे षत्वे ष्टुत्वे अकल्पिष्ट' इति। इडभावे तु 'कृपो रो लः' इति लत्वे 'अक्लृप् स् त' इति स्थिते 'झलो झलि' इति सलोपे 'अक्लृप्त' इति सिध्यति।

प्रविघाटयिता। ६७, ६९—ननु 'घटादयो मितः' इत्यनेन मित्संज्ञायां 'प्रविघाटयिता' 'कमलवनोद्घाटनं कुर्वते' इत्यादौ 'मितां ह्रस्वः' इति ह्रस्वत्व उक्तं रूपं न स्यादिति चेन्न, चुरादौ पठितस्य 'घट संघाते' इति धातोः तथा प्रयोगात्। न च चौरादिकस्यैव घट संघाते इति धातोश्चेष्टारूपविशेषार्थे मित्त्वार्थमनुवाद इति वाच्यम्, अहेतौ स्वार्थे णिचि चुरादिपठितानां धातूनां मित्वाभावात्। एवञ्च घट चेष्टायामिति स्वतन्त्रोऽन्यधातुः तत्रैव ह्रस्वः, न घट संघाते इत्यत्रेति दिक्।

नान्ये मितोऽहेताविति। ६८। इदञ्च गणसूत्रं चुराद्यन्तर्गतम्। तत्र हि 'ज्ञप मिच्च' 'यम च परिवषणे' 'चह परिकल्कने' 'रह त्यागे' 'बल प्राखने' 'चिञ् चयने' इति पञ्च धातून् पठित्वा 'नान्ये मितोऽहेतौ' इति पठितम्। एषु पञ्चष्वपि मिदित्यनुवर्तत। 'अहेता' विति च्छेदः। कस्मादन्ये इत्यपेक्षायां सन्निधानात्ज्ञपादिपञ्चभ्य इति लभ्यते। हेतुशब्देन 'हेतुमति च' इति सूत्रविहितो णिज्लभ्यते' तद्भिन्नो णिच् स्वार्थिकोऽहेतु। तथा च-अहेतौ स्वार्थे णिचि ज्ञपादिपञ्चकव्यतिरिक्ताश्चुरादयो मितो नेत्यर्थः। एवञ्च-चुरादौ ज्ञपादिपंचकव्यतिरिक्तानां मित्त्वाऽभावात् 'घट चेष्टाया' मिति निर्देशश्चौरादिकस्य 'घट सङ्घाते' इत्यस्य चेष्टायां वृत्तौ मित्वार्थोऽनुवाद इति न। किन्तु इहैव घटादिगणे 'घट चेष्टाया'

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

मित्यपूर्वोऽयं धातुः । तस्य चार्थान्तरवृत्तावपि मित्त्वमस्त्येवेति 'विघटयतो, त्यादौ मित्त्वाध्रस्वो भवत्येवेति दिक् ।

विव्यथे । ६६ । व्यथ्धातोर्लिटि तत्स्थाने तप्रत्यये 'लिटि धातोः-' इति द्वित्वेऽभ्याससंज्ञायां हलादिः शेषमपवाद्य 'व्यथो लिटि' इत्यनेन अभ्यासस्य सम्प्रसारणे पूर्वरूपे थस्य हलादिःशेषे 'टित आत्मनेपादानां टेरे' इति एत्वे विव्यथे इति सिद्धम् ।

णट नृतौ । ४० । भ्वादौ टवर्गान्तेषु पठितस्य णट्धातोर्नृत्तमित्यस्य नाट्यमर्थः । नाट्यञ्चवाक्यार्थाभिनयः । तस्यैव घटादौ पाठात् नृत्यं नृत्तं वार्थः । तत्र पदार्थाभिनयो नृत्यम्, गात्रविक्षेपमात्रं नृत्तम् । एवाञ्चार्थभेदसत्त्वादर्थविशेषे मित्वार्थोऽनुवादः इति दिक् ।

प्रज्वलयति । ६०, ६३ । ज्वल-धातोर्णिचि अनुबन्धलोपे वृद्धौ धातुसंज्ञायां लटि तिपि घटादिगणे पाठान्नित्यमित्वेन 'मितां ह्रस्वः' इत्यनेन ह्रस्वे शपि गुणेऽयादेशे 'प्रज्वलयति' इति सिद्धम् । नच ज्वलयति, ज्वालयति, इत्युभयरूपदर्शनात्सोपसर्गे विकल्पेन कथन्न मित्वमिति वाच्यम्, 'ज्वलह्वलह्मलानामनुपसर्गाद्वा' इत्यनेनानुपसर्गादेव वैकल्पिकमित्वविधानेन प्रकृतेऽप्राप्तेः । नचैवं 'प्रज्वालयति' इति प्रयोगो न स्यादिति वाच्यम् प्रज्वलनं प्रज्वालः, भावे घञ् उपधावृद्धिः । प्रज्वालं करोतीत्यर्थे णिचि उक्तरूपस्य सिद्धत्वात् ।

गणान्तरे पठितानां । ६४ । धातूनां मित्वार्थं घटादौ पाठफलन्तु णौ मितां ह्रस्वः इत्येव न, किन्तु तत्तद्गणनिर्दिष्टकार्यमपि भवत्येव यथा 'दॄ विदारणे' क्र्यादौ पठितः तस्येहाऽनुवादेऽपि श्नाप्रत्यय एव भवति न तु शप् । नच तत्र विदारणेऽर्थे पठितः, अत्र तु 'भये' इति भेदात् कथं श्नाविकरण एवेति वाच्यम्, अर्थनिर्देशस्योपलक्षणत्वात् । धात्वन्तरमेवेदन्न तु क्र्यादेरनुवाद इति मते तु शबेव भवति भीवादिकत्वात् एवं 'नॄ नये' इत्यादयोऽपि ये गणान्तरप्रयुक्तास्तेऽपि श्नाविकरण एव जायते इति दिक् ।

श्रपयति । ७०, ७६ । घटादौ 'श्रै पाके' इति कृतात्वस्य 'श्रा पाके' इत्यादादिकस्य च सामान्येनानुकरणं विधाय 'श्रा पाके' इति पठितः । 'सति सम्भवेऽन्यत्र पठितानामिह मित्वार्थोऽनुवाद' इति सिद्धान्तात् तत्र 'लुग्विकरणाऽलुग्विकरणयोरलुग्विकरणस्य ग्रहणम्' 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहण'मिति

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

परिभाषाभ्यामुभयोर्ग्रहणम्भवति । यद्यप्युक्तपरिभाषयोः परस्परं विरोधेनाप्यनुत्वाद्भीष्टं सिध्यति, तथाऽप्यविशेषादुभयोरपि प्रवृत्तिः । ततश्च—स्मारणिणचि अनुबन्धलोपे 'अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ् णौ' इत्येन पुगागमे श्रापीत्यस्य 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां लटि तिपि घटादित्वेन मित्वात् 'मितां ह्रस्वः' इत्यनेनोपधाह्रस्वे शपि गुणे अयादेशे च कृते 'श्रपयति' इति साधु ।

मारणतोषणनिशामनेषु ज्ञा । ६८, ७० । श्नाविकरणस्यैव 'ज्ञा अवबोधने' इति धातोः मारणतोषणनिशामनेष्वर्थेषु पाठात् णौ मित्वर्थमिहानुवादः । तत्फलं यथाक्रमं—पशु संज्ञपयति, हरिं ज्ञपयति, रूपं ज्ञपयति, शरं ज्ञपयति इत्यादौ मितां ह्रस्वः इत्यनेन ह्रस्वसिद्धि ।

विज्ञापना भर्तृषु सिद्धिमेति । ६०, ६४ । ननु ज्ञाधातोः ज्ञप्धातोश्च णौ मित्त्वात् 'मितां ह्रस्वः' इत्यनेन ह्रस्वत्वात् विज्ञापनेति प्रयोगः कथमिति चेत् ? माधवमतेऽचाक्षुषज्ञाने मित्वाभावेन ह्रस्वाभावात् । तथा च बोधने ज्ञा धातोः 'ज्ञापयति' ज्ञप् धातोस्तु ज्ञपयतीति रूप माधवमते बोध्यम् । न च ज्ञापनमात्रे मित्वमिति मते विज्ञापनेत्यत्र मित्वं दुर्वारमिति वाच्यम्, तन्मते 'ज्ञानियोगे' इति चौरादिकधातोः 'नान्ये मितोऽहेतौ' इति मित्त्वनिषेधेन ह्रस्वाभावे रूपसिद्धेः । न च नियोगार्थस्य तस्य कथं ज्ञापने वृत्तिरिति वाच्यम्, धातूनामनेकार्थत्वात् । निशानेष्विति पठतां हरदत्तादीनां मते तु मारणतोषणतीक्ष्णीकरणान्यत्वात्तस्मिन्नर्थे ज्ञाधातोर्मित्वाप्रसक्तेरिति दिक् ।

कम्पने चलिः । ६० । ज्वलादिः 'चल कम्पने' धातुस्तस्य घटादौ पाठान्मित्वे 'शाखा चलयति' इत्यत्र मितां ह्रस्वः । कम्पनादन्यत्र ह्रस्वाभावे—शीलं चालयतीति रूपम् । तथाहि चल धातोर्णिति वृद्धौ धातुसंज्ञायाम् लटि तिपि शपि गुणायादेशयोः रूपम् सिद्धम् ।

मदी हर्षग्लेपनयो । ७१ । श्यन्विकरणस्य दैवादिकस्य मदी धातोः घटादौ मित्वार्थोऽनुवादः । तेन मदयतीत्यादौ मितां ह्रस्वो भवति । अन्यत्र मादयति इत्येव ।

रजो विश्रामयत् राज्ञामिति । ६२. ६८ । विपूर्वकात् श्रमेः ण्यन्ताल्लटः शत्रादेशे प्रातिपदिकत्वान्नुमादिके कृते विश्रामयन्निति सिद्धम् । नच 'मितां ह्रस्वः' इत्यनेन ह्रस्वः कथं नेति वाच्यम्, उक्तसूत्रे 'वा चित्तविरागे' इत्यतो वेत्यनुवर्त्य व्यवस्थितविभाषाश्रयणेन अत्र ह्रस्वाभावात् ।

Sri Vidyabharathi Book Centre, Sringeri

 CC-O. In Public Domain. Digitized by eGangotri

सतीतयो राघवयोरधीयन्निति । ३७ । अधिपूर्वकात् स्मरणार्थकेण्धातोर्लटः शतरि अनुबन्धलोपे शपि तस्य अदादित्वेन लुकि इयङि अनुबन्धलोपे सवर्णदीर्घे शत्रन्तादधीयच्छब्दात् प्रातिपदित्वेन स्वाद्युत्पत्तौ नुमादिके कृते 'अधीयन्नि'ति सिद्धम् ।

नन्वत्र सवर्णदीर्घात्प्राक् 'पूर्वं धातुः साधनेन युज्यते' इति नियमाच्छत्रादेशान्तर० 'इण्वदिक' इत्यतिदेशेन 'इणो यणि'ति यणादेशे उक्त रूपं न सिद्ध्यतीति चेत् ? न' 'आर्धधातुके' इत्यधिकारे भाष्ये 'इणो गा लुङि' इति सूत्रे 'इण्वदिकः' इति वार्तिकपाठोपलम्भात्तदधिकारोक्तानामेव कार्याणामुपस्थितत्वेन 'इणो यण्' इत्यस्यार्धधातुकाधिकारस्थत्वाभावादतिदेशाभावेन यणाद्यप्राप्तौ इयङ् दीर्घादिके उक्तरूपं सिद्धम् ।

शमो दर्शने । ६१, ६५ । इदञ्च घटादौ गणसूत्रम् । दर्शनञ्च चाक्षुषज्ञानम् । एवं च शाम्यतिर्दर्शने मिन्न स्यादित्यर्थः सम्पद्यते । शमधातुर्हि दिवादौ श्यन्विकरणः उपशमार्थको वर्तते, आलोचनार्थकशमधातुस्तु चौरादिकः । तत्र दैवादिकः श्यन्विकरण एवात्र गृह्यते, चौरादिकस्य तु 'नान्ये मितोऽहेतौ' इत्यनेनैव मित्वनिषेधात् । उदाहरणं यथा—निशामयति रूपम्, पश्यतीत्यर्थः । नचोपशमार्थकस्य शमधातोः दर्शने कथं प्रवृत्तिरिति वाच्यम्, धातूनामनेकार्थत्वात् । दर्शनादन्यत्र तु—निशमय्येति रूपम् । तत्र श्रावयित्वेत्यर्थः । तथा च 'निशमय्य वधूः कथा' इति माघः संगच्छते ।

निशामय तदुत्पत्तिम् । ६७, ६९ । 'शमो दर्शने' इति गणसूत्रम् । शाम्यतिर्दर्शने मिन्न स्यादिति तदर्थः । उदाहरणं यथा—'निशामय' इति, दर्शय इत्यर्थः । दर्शनार्थातिरिक्ते मित्वादेव 'प्रणयिनो निशमय्य वधूः कथाः' इत्यादिप्रयोगः संगच्छते । नच श्रवणे मित्वात् 'निशामय तदुत्पत्ति' इत्यत्र श्रावय इत्यर्थे उक्तं रूपं कथं सिद्ध्यति इति वाच्यम्, 'शम आलोचने' इति चौरादिकस्य रूपं गृहाण । तत्र 'नान्ये मितोऽहेतौ' इति मित्वनिषेधेन ह्रस्वाभावात् । नचालोचनार्थकस्य धातोः श्रवणे कथं प्रवृत्तिरिति वाच्यम्, धातूनामनेकार्थत्वाभ्युपगमेन दर्शने प्रवृत्त्यभ्युपगमेनादोषात् ।

पर्यवसितं नियमयन्निति । ६०, ६३ । घटादौ 'यमोऽपरिवेषणे' इति गणसूत्रम् । परिवेषणभिन्ने मित्वं भेति तदर्थः । यथा—'आयामयति' इति

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

दैर्घ्यं सम्पादयति तदर्थः । अत्रापरिवेषणे वृत्तेन, मित्वम्, परिवेषणे तु मित्वं भवत्येव । यथा--यमयति ब्राह्मणान् । नच यद्यपरिवेषणे मित्वनिषेधोऽनेन क्रियते तर्हि 'पर्यवसितं नियमयन्नि' त्यत्रापि परिवेषणभिन्नत्वेन मित्वनिषेधात्कथं ह्रस्व इति वाच्यम् ? नियमनं नियमः, निपूर्वकाद् यञ धातोः 'यमः समुपनिविपु चे' त्यनेन भावेऽप्रत्ययः, तदुमान्मतुपि अनुबन्धलोपे मस्य वत्वे नियमवच्छब्दात् 'तत्करोति तदाचष्टे' इति णिचि अनुबन्धलोपे 'विन्मतोर्लुक' इति मतुपो लुकि ण्यन्तात्लटः शतरि गुणायादेशयोः कृतयोर्नियमवच्छब्दो निष्पन्नः । तस्मात्प्रातिपदिकत्वात्स्वाद्युत्पत्तौ नुमादिके 'नियमयन्नि'ति निष्पन्नम् ।

वस्तुतस्तु मतुपो लुकि टिलोपस्य प्राप्तयभावेन 'अचो ञ्णिति' इत्यनेन वृद्धौ पुगागमापत्तिः । अतश्च नियमवदित्यर्थकादर्श आद्यजन्तान्नियमशब्दात् 'तत्करोति' इति णिचि इष्टत्वाट्टिलोपे तस्य स्थानिवद्भावेन वृद्धयभावे लटि शत्रादेशे नियमयन्निति भवतीति दिक् ।

वनु च नोच्यते । अस्यायमर्थः इति विशिष्य नोच्यते क्रियासामान्यार्थत्वात्; धातूनामनेकार्थत्वाद् वा । नच 'अन्यत्र पठितस्य घटादौ मित्वार्थोऽनुवादः' इति सिद्धान्तात् । वनु याचने इति तनादौ पठितस्य अनुवादोऽयं धातुः तदन्यो वा । आद्ये अनुदात्तेतोऽत्रानुवादस्य क्रियासामान्येऽर्थे आत्मनेपदे उप्रत्यये च वनुते इति अनिष्टं रूपं स्यात् । अतः अपूर्व एवायं धातुः उदित्करणसामर्थ्यात् इति द्वितीयः पक्षः स्वीकर्तव्यः । एवं च सति क्रियासामान्येऽर्थे शपि वनति इति सिद्ध्यति । णिचि मित्वात् ह्रस्वे प्रवनयति इति । अनुपसर्गस्य तु 'ग्लास्नावनुवमां च' इत्यनेन मित्वविकल्पे वानयति इत्यपि सिद्ध्यतीति-दिक् ।

फण गतौ । ननु घटादयो मितः इति स्वनत्वातोरनन्तरं पाठेन धातोः घटादित्वेऽपि न मित्वम् । तेन अत्र नेति न सम्बद्ध्यते, असम्भवात् । न चैवं 'न कम्यमिचमाम्' इत्यतः पूर्वं एवायं पठितव्य इति वाच्यम्, फणादिकार्यानुरोधात् पूर्वं न पठितः । अन्यथा न कम्यादीनां फणादित्वं स्यात् । घटादौ फणादेः पाठस्य प्रयोजनं मित्वं ह्रस्वत्वं च सिद्ध्यति ।

स्खदिः अवपरिभ्यां च । ७३ । इदमपि गणसूत्रम् । स्खदिरितीकारनिर्देशः । अव-परि--भ्यां परः स्खदधातुर्मिन्न इत्यर्थः । उदाहरणं यथा—

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अवस्खादयति, परिस्खादयति । 'स्खद स्खदने' इत्यस्य घटादौ पाठान्मित्वप्राप्ताव-नेन निषिध्यते । षत्वन्तु न भवति अषोपदेशत्वेनादेशसकारत्वाऽभावात् ।

न कम्यमिचमाम् इत्यतः नेति अनुवर्तते नवा । ७४ । अत्र त्रिसूत्र्यां क्षीरस्वामी'न कम्यमिचमाम्' इत्यतो नत्रमननुवर्त्य 'शम-अदर्शने' इति चिच्छेद । तत्र शमधातुर्दर्शने मित्स्यादित्यर्थः । अमन्तत्वादेव सिद्धे 'अदर्शन एवायं मित्स्यान्न तु दर्शने' इति नियमार्थम् । यमधातावपि अमन्तत्वादेव सिद्धे'परिवेषणे एव मिन्न तु परिवेषणे इत्यर्थः । एवञ्च—द्राघयति, व्यापारयति वेत्यर्थे मित्वाद्ध्रस्वे 'आयमयती' त्येव रूपम् ।

परिवेषणे तु—मित्वाऽभावाध्रस्वाभावे 'यामयति ब्राह्मणान्' इति भवतीति पूर्वमताद्विपरीतं फलति । तथा च 'पर्यवसितं नियमयम्' इत्यत्र यमेर परिवेषणार्थत्वान्मित्वे ह्रस्वो निर्बाध इति तदर्थः नियमवच्छब्दात्करोत्यर्थे णिचि नियमयान्नति साधनीयं तदा कष्टकल्पना न कर्तव्येति भावः । एवं स्खदिधातौ घटादित्वादेव मित्वसिद्धेः 'सोपसर्गस्य चेत् स्खदेर्मित्वं तर्हि अव-परिभ्यां परस्यैव मित्वं न तूपसर्गान्तरादि'ति नियमार्थं 'स्खदिरवपरिभ्याञ्च'ति सूत्रम् । एवञ्च प्रस्खादयतीत्यत्र मित्वाऽभावान्न ह्रस्वः । अवस्खादयति, परिस्खादयतीत्यत्र तु मित्वाध्रस्वो भवति । पूर्वमते अवपरिभ्यां परस्य मित्वनिषेधाद् 'अवस्खादयति' इत्यत्र न ह्रस्वः । प्रस्खादयतीत्यत्र तु अवपरिपूर्वकत्वाऽभावेन मित्वनिषेधाऽभावाद् ह्रस्व इति विपरीतम् । तस्मात्—'यमोऽपरिवेषणे' 'स्खदिरवपरिभ्याञ्च'ति सूत्रद्वये उक्तदिशा मित्वनियमविध्याश्रयणादुदाहरणयोरुक्तरीत्या व्यत्यासः फलितः । यद्यपि 'न पादम्याङिति' सूत्रव्याख्यानाऽवसरे 'यमोऽपरिवेषणे' इति मित्वं प्रतिषिध्यत इति वृत्तिन्यासयोरुक्तत्वान्नेदं समीचीनं मतमिति प्रतीयते, तथापि 'पर्यवसितं नियमयन्नि' त्यादिसामञ्जस्यात्तावेवोपेक्ष्याविति केचित्समर्थयन्ति ।

रेजे । ६७ । दीप्त्यर्थक—राज् धातोर्लिटि तत्स्थाने स्वरितेत्त्वेन 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इत्यनेन वैकल्पिके आत्मनेपदे तप्रत्यये द्वित्वे अभ्याससंज्ञायां हलादिः शेषे अभ्यासस्य ह्रस्वत्वे 'लिटस्तझयोरेश्' इत्यनेन एशादेशे 'फणां च सप्तानाम्' इत्यनेन विकल्पेनैत्वाभ्यासलोपयोः कृतयोः 'रेजे' इति सिद्धम् । न च 'फणां च सप्तानाम्' इत्यत्र 'अत एकहल्मध्ये' इत्यादिना अतोऽनुवृत्त्या कथमत्रैत्वा-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

भ्यासलोपाविति वाच्यम्, विधानसामर्थ्येनात एत्वावगमात् । एतदभावे तु 'रराजे' इति रूपं भवति ।

टु भ्राजृ दीप्तौ इति धातोः फणादौ पाठे को विशेषः । भ्राज्धातोः फणादौ पाठः 'फणाञ्च सप्तानाम्' इति सूत्रेण एत्वाभ्यासलोपार्थः । पूर्वपाठस्तु 'व्रश्च-भ्रस्ज०' इति सूत्रेण प्राप्तस्य षत्वस्य निषेधार्थः । 'सहचरितासहचरितयोर्मध्ये सहचरितस्यैव ग्रहणम्' इति परिभाषया राजधातुः फणादिगृ ह्यते, तत्साहचर्याच्च भ्राज्धातुरपि फणादिरेव ग्राह्यः, तेन फणाद्यरिक्ते भ्राजधातुविषये षत्वाभावः सिद्धयतीति दिक् ।

अपप्तत् । ६६ । पतनार्थकपत् धातोर्लुङि तत्स्थाने तिपि अडागमे अनुबन्धलोपे शबादिकमपवाद्य च्लिप्रत्यये सिचं प्रबाध्य 'पुषादिद्युताद्य्लृदितः परस्मैपदेषु' इत्यनेन अङि 'अपत् अत्' इति दशायां 'पतः पुम्' इत्यनेन पुमागमे अनुबन्धलोपे 'अपप्तत्' इति सिद्धम् ।

भ्रेमतुः । ६८ । भ्रम्धातोर्लिटि तत्स्थाने तसि 'परस्मैपदानाम्'–इत्यनेन तसोऽतुसादेशे द्वित्वेऽभ्याससंज्ञायां हलादिःशेषे प्राप्ते तम्प्रबाध्य 'वा जृभ्रमुत्रसाम्' इत्यनेन विभाषया एत्वेऽभ्यासलोपे च कृते सस्य रुत्वे विसर्गे 'भ्रेमतुः' इति । पक्षे 'बभ्रमतुः' इति सिद्धयति ।

अभ्रमीत् । ७७ । भ्रम्धातोर्लुङि अडागमे अनुबन्धलोपे च्लौ तस्य सिजदेशे अनुबन्धलोपे अर्धधातुकत्वात् सस्य बलादिलक्षणेडागमे 'अस्तिसिचोऽपृक्ते' इत्यनेन तस्येडागमे 'इट ईटि' इति सिचः सस्य लोपे सवर्णदीर्घे हलन्तलक्षणवृद्धौ प्राप्तायां 'ह्यचन्तक्षण-' इति तन्निषेधे 'अभ्रमीत्' इति सिद्धम् ।

परिसोढा । ६९ । परिपूर्वकमर्षणार्थक–'सह्' धातोर्लुटि तस्थाने तप्रत्यये शपं प्रबाध्य तासिप्रत्यये 'तीषसहलुभरुषरिषः' इतीडभावपक्षे 'लुटः प्रथमस्य डारौरसः' इत्यनेन तस्य डादेशे डित्वादभस्यापि टेर्लोपे हस्य ढत्वे तकारस्य 'झषस्तथोर्धोऽधः' इत्यनने, धत्वे तस्य ष्टुत्वेन ढकारे 'ढो ढे लोपः' इत्यनेन ढस्य लोपे स–ढा' इत्यवस्थायां ढलोपे दीर्घं प्रबाध्य 'सहिवहोरोदवर्णस्य' इत्यनेन सकारात्परस्याकारस्योत्वे 'परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्' इत्यनेन षत्वे प्राप्ते तस्य 'सो ढः' इत्यनेन निषेधे परिसोढेति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

 CC-O. In Public Domain. Digitized by eGangotri

अरंस्त । ६७ : रम्धातोर्लुङि अडागमे तस्थाने तस्प्रत्यये च्लौ तस्य सिचि मस्यानुस्वारे 'अरंस्त' इति । अनिट्कोऽयं धातुः तेन नेट् ।

विशीर्णतायामयमित्यादि । ६१ । ननु शातनार्थकः 'शद' धातुः । ततः हेतुमण्यन्ताल्ल्युटि 'शदेरगतौ तः' इत्यनेन दकारस्य तकारे योरनादेशादिके कृते शातनशब्दः निष्पन्नः । शातनञ्च विशीर्णतानुकूलो व्यापारः । एवञ्च सकर्मकत्वापत्तौ विशीर्यतीत्यर्थे शीर्यते इत्युदाहरणमसङ्गमिति चेन्न, विशीर्णतायामयम् । विशरण इत्यर्थः । नचैवं शातनमित्यत्र हेतुमण्णिजन्तस्यानया च तत्प्रयोगो न युक्तिसह इति वाच्यम् ? प्रयोजकव्यापारं बिना विशरणस्याऽसंभवाच्छातननिर्देशः, तत्र ण्यर्थस्याविवक्षितत्वाद्विशरणमेव शद्धात्वर्थः । नच विशरणे इत्येव वक्तव्ये शातने इति कथमुक्तमिति वाच्यम्, णम गतौ, पच पाके इत्यादिवदुपपत्तेः ।

अबोधिष्ट । ६० । बोधनार्थक-'बुध्' धातोर्लुङि तत्स्थाने तप्रत्ययेऽडागमे च्लिप्रत्यये तस्य तस्य सिजादेशेऽनुबन्धलोपे 'आर्धधातुकस्येड्वलादेः' इत्यनेन इडागमे गुणे ततः षत्वे ष्टुत्वे च कृते 'अबोधिष्ट' इति सिद्धम् । न चात्र दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्' इत्येन च्लेश्चिण् कुतो नेति वाच्यम्, पूर्वोत्तरसाहचर्येण दैवादिकस्यैव तत्र ग्रहणात् । परस्मैपदे तु इदित्वाद्विकल्पेनाङादेशे 'अबुधत्', पक्षे 'अबोधीत्' इति रूपद्वयम् । नचोक्तस्थलेषु इर इत्त्वेन 'इदितो नुम् धातोः' इत्यनेन नुम् कथन्नेति वाच्यम्, इर इत्त्वेऽपि तदवयवस्येकारस्य प्रत्येकमित्वाभावात्नुमोऽप्राप्ते ।

खायात् खन्यात् । ७५ । अवदारणार्थक खन् धातोराशीर्लिङि तत्स्थाने तिपि अनुबन्धलोपे 'इतश्चे'तिकारलोपे 'यासुट् परस्मैपदेषदात्तो ङिच्च' इत्यनेन यासुडागमेऽनुबन्धलोपे सुटि'स्कोः संयोगाद्योरन्ते च' इत्यनेन सलोपे नकारस्य 'ये विभाषा' इत्यनेन आत्वे 'खायात्' इति सिद्धम् । आत्वाभावे 'खन्यात्' इति रूपं भवति ।

अगूहीत् । ६५, ६९ । गुहू-धातोर्लुङि तत्स्थाने तिप्यनुबन्धलोपे अडागमे च्लिप्रत्यय तस्य सिजादेशे इचावितौ ऊदित्वात् 'स्वरतिसूतिसूयतिधूञूदितो वा' इत्यनेन विकल्पेन इटि 'अस्तिशिचोऽपृक्ते' इत्यनेन च इडागमे सलोपे सवर्णदीर्घे लघूपधगुणे प्राप्ते तमपवाद्य 'ऊदुपधाया गोहः' इत्यनेन ऊत्वे अगूहीत्, इति सिद्धम् । इडभावे 'शल इगुपधादनिटः क्सः' इत्यनेन च्लेः क्सादेशे हस्य ढत्वे

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

गस्य मष्भावेन घत्वे 'षढोः कः सि' इति कत्वे ततः षत्वे क्षसंयोगे क्षे जाते 'अघुक्षत्' इति रूपम् । तङि क्सः सस्य 'लुग्वा दुहदिहगुहामात्मनेपदे दन्त्ये' इत्यनेन विकल्पेन लुकि ढत्वधत्वष्टुत्वढलोपदीर्घेषु जायमानेषु 'अगूढ' इति । क्सलुगभावे-ढत्वमष्भावकत्वषत्वेषु कृतेषु अघुक्षत इति । इत्थं संवरणार्थकगुह-धातोर्लुङि परस्मैपदे--अगूहीत्, अघुक्षत् इति रूपद्वयम् । आत्मनेपदे च अगूढ अघुक्षत इति रूपद्वयमिति चत्वारि रूपाणि ।

अगूढ । ६९, ७१ । संवरणार्थक—ऊकारेत्संज्ञ-गुह्-धातोर्लुङि तत्स्थाने आत्मनेपदे तप्रत्यये अङागमे च्लिप्रत्यये तस्य 'शल इगुपधादनिटः क्सः' इत्यनेन क्सादेशे अनुबन्धलोपे कित्वेन गुणाभावे अजादित्वाभावात् 'ऊदुपधाया गोहः' इत्यनेन ऊत्वाभावे 'लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये' इत्यनेन क्सस्य लुकि अगुह् त इति दशायां 'हो ढः' इति हस्य ढत्वे 'झषस्तथोर्धोऽधः' इत्यनेन तस्य धत्वे तस्य ष्टुत्वे 'ढो ढे लोपः' इत्यनेन पूर्वढकारस्य लोपे 'ढ्लोपे पूर्वस्य दीर्घोऽणः' इत्यनेन दीर्घे अगूढ' इति सिद्धम् । क्सस्य लुगभावे तु ढत्वमष्भावकत्वषत्वेषु कृतेषु 'अघुक्षत' इति रूपं भवति ।

अगुह्वहि । ६८ । गुह् धातोर्लुङि अडागमे आत्मनेपदे वहिप्रत्यये च्लौ तस्य सिजादेशे प्राप्ते तम्प्रबाध्य 'शल इगुपधादनिटः क्सः' इति च्लेः क्सादेशे 'लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये' इत्यनेन क्सस्य लुकि अगुह्वहि इति । नच ऊदुपधाया गोहः इति ऊत्वं कुतो नेति वाच्यम्, अजादिप्रत्ययपरत्वाभावात् । पक्षे तु ढत्वमष्भावकत्वषत्वेषु कृतेषु अतो दीर्घे 'अघुक्षावहि' इति सिध्यति ।

अशिश्रियत । ७३ । सेवार्थक-श्रि-धातोर्लुङि तत्स्थाने तिप्यनुबन्धलोपे अडागमे च्लिप्रत्यये तस्य 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इत्यनेन चङादेशेऽनुबन्धलोपे 'चङि' इत्यनेन द्वित्वेऽभ्याससंज्ञायां हलादिःशेषे इयङि पररूपे 'अशिश्रियत्' इति सिद्धम् । तङि तु-'अशिश्रियत' इति रूपम् सिद्धम् ।

म्रियात् । ६७ । मरणार्थक-मृङ् धातोराशीर्लिङि परस्मैपदे तिपि अनुबन्धलोपे इतश्चेतीकारलोपे 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे अनुबन्धलोपे सुट् तिथोः इति सुटि स्कोः संयोगाद्योरन्ते च इत्यनेन सलोपे 'रिङ्शयग्लिङ्क्षु' इत्यनेन ऋङो रिङादेशे 'म्रियात्' इति सिद्ध्यति ।

Sri Vidyabharathi Book Centre, Sringeri

 CC-O. In Public Domain. Digitized by eGangotri

न चात्र कृते रिङादेशे अकृत्सार्वधातुकयोर्दीर्घः इत्यनेन दीर्घः कुतो नेति वाच्यम्, एवं सति 'रीङृतः' इत्यनेन रीङादेशेन दीर्घसिद्धौ ऋतो रिङादेशविधानवैयर्थ्यापत्तेः ।

अभार्षीत् । ६४ । मरणार्थक–'भृ'–धातोर्लुङि अडागमे तिप्यनुबन्धलोपे इकारलोपे च्लिप्रत्यये सिजादेशे इत्संज्ञायां 'अस्तिसिचोऽपृक्ते' इति ईडागमे 'आर्धधातुकस्येड्वलादेः' इत्यनेन इडागमे प्राप्ते 'एकाच उपदेशेऽनुदात्तात्' इत्यनेन निषेधे 'सिचि वृद्धिः परस्मैपदेषु' इत्यनेन वृद्धौ रपरत्वे षत्वे 'अभार्षीत्' इति सिद्धम् । आत्मनेपदे तु 'अभृ स् त्' इति स्थिते 'उश्च' इति गुणाभावे 'ह्रस्वादङ्गात्' इति सिज्लोपे 'अभृत' इति सिद्धम् ।

धेयात् । ७६ । धेट् धातोराशीर्लिङि तिपि अनुबन्धलोपे 'आदेच उपदेशेऽशिति' इत्यात्वे यासुटि सुटि च कृते अनुबन्धलोपे 'स्कोः संयोगाद्योः—' इति सलोपे 'दाधा घ्वदाप्' इति घुसंज्ञायाम् 'एर्लिङि' इति एत्वे धेयात् इति सिद्धम् ।

अदधत्, अधात्, अधासीत् । ६८, ६९ 'धेट् पाने' अस्माद्धातोर्लुङि अडागमे तिप्यनुबन्धलोपे 'आदेच उपदेशेऽशिति' इत्यात्वे च्लौ तस्य सिजादेशे प्राप्ते तं प्रबाध्य 'विभाषा धेट्श्व्योः' इति चङि अनुबन्धलोपे 'चङि' इति द्वित्वे अभ्यासहलादिशेषे अभ्यासस्य ह्रस्वे 'अभ्यासे चर्च' इति जश्त्वे 'आतो लोप इटि च' इत्याल्लोपे 'इतश्च' इति तिप इकारलोपे 'अदधत्' इति । चङभावे च्लेः सिजादेशे 'विभाषा घ्राधेट्शाच्छासः' इति सिचो लुकि 'अधात्' इति । लुगभावपक्षे 'यमरमनमातां सक् च' इति च्लेः सकि इटि च कृते 'अस्तिसिचोऽपृक्ते' इति ईटि 'इट ईटि' इति सलोपे 'सिज्लोपे एकादेशे सिद्धो वाच्यः' इति सिज्लोपस्य सिद्धत्वात् सवर्णदीर्घे 'अधासीत्' इति च सिद्धं भवति ।

अग्लासीत् । ६९ । ग्लैधातोर्लुङि 'लुङ्लङ्' इत्यडागमे अनुबन्धलोपे तिपि अनुबन्धलोपे 'इतश्च' इति तिप इकारलोपे 'आदेच उपदेशेऽशिति' इत्यात्वे च्लौ तस्य 'यमरमनमातां सक् च' इति सकि इटि च कृते अनुबन्धलोपे 'अग्ला इस त्' इति दशायाम् 'अस्तिसिचोऽपृक्ते' इति ईटि अनुबन्धलोपे 'इट ईटि' इति सलोपे 'सिज्लोपे एकादेशे सिद्धो वाच्यः' इति सिज्लोपस्य सिद्धत्वात् सवर्णदीर्घे अग्लासीत् इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

D. In Public Domain. Digitized by eGangotri

अषासीत् । ६६ । 'षै क्षये' इति धातोर्लुङि अडागमे अनुबन्धलोपे 'धात्वादेः षः सः' इति सत्वे तिपि 'आदेच उपदेशेऽशिति' इत्यात्वे च्लौ 'यमरमनमातां सक् च' इति च्लेः सकि इटि च कृते 'अस्तिसिचोऽपृक्ते' इति ईटि 'इट ईटि' इति सलोपे 'सिज्लोप एकादेशे सिद्धो वाच्यः' इति वार्तिकबलेन सवर्णदीर्घे असासीत् इति सिज्लोपस्तु न, तत्र स्यतेरेव ग्रहणात् ।

दायात् । १७० 'दैप्' धातोराशीर्लिङि तिपि अनुबन्धलोपे 'आदेच उपदेशेऽसिति' इत्यात्वे यासुटि सुटि 'इतश्च' इति तिप इकारलोपे 'लिङाशिषि' इत्यार्धधातुकत्वात् 'लिङः सलोपोऽनन्तस्य' इत्यस्याऽप्राप्त्या 'किदाशिषि' इति यासुटः कित्वात् 'स्कोः संयोगाद्योः—' इति सलोपे 'दाधादाप्' इत्यत्राऽदाप् इति पर्युदासेन घुत्वाऽभावात् 'एर्लिङि' इति एत्वाभावे दायात् इति सिद्धम् ।

घ्रेयात् । ६०, ६२ । गन्धोपादानार्थक 'घ्रा' धातोराशीर्लिङि तत्स्थाने तिपि अनुबन्धलोपे इकारलोपे यासुडागमे च 'सुट्तिथोः' इति सुटि 'लिङाशिषि' इति सूत्रेणार्धधातुकत्वात् स्कोरिति सकारद्वयस्यापि निवृत्तौ 'वाऽन्यस्य संयोगादेः' इत्यनेन विकल्पेनैत्वे 'घ्रेयात्' इति सिद्धम् । एत्वाभावे 'घ्रायात्' इति ।

स्थेयात् । ७० । ष्ठा धातोर्लिङि तिपि 'धात्वादेः षः सः' इति सत्वे ष्टुत्वनिवृत्तौ 'स्था ति' इति स्थिते यासुटि अनुबन्धलोपे सुट्तिथोः इति सुटि 'इतश्च' इति सिप इकरलोपे 'स्कोः संयोगाद्योः' इति सलोपे 'एर्लिङि' इत्येत्वे स्थेयात् इति सिद्धम् ।

जह्वार । ६६, ६८ । ह्वृधातोर्लिटि तिपि णलि द्वित्वे अभ्याससंज्ञायां हलादिः शेषे 'कुहोश्चुः' इति चुत्वे 'ऋतश्च-संयोगादेर्गुणः' इत्यनेन परत्वात् गुणे रपरे च कृते उपधावृद्धौ जह्वार इति सिद्धम् ।

गुणोऽर्तिसंयोगाद्योः । ६३, ६७ । अत्र 'अङ्गस्य' इत्यधिकारः, 'रीङ् ऋतः' इत्यतः इत्यतः 'ऋत' इत्यतः 'ऋतः' इत्यनुवर्तते; "अकृत्सार्वधातुकयोः' इत्यतः असार्वधातुकग्रहणमनुवर्तते—'आर्धधातुके' इति लभ्यते, 'रिङ्शयग्लिङ्क्षु' इत्यतः 'यकि' 'लिङि' इति च लभ्यते, 'अयङ् यि क्ङिति' इत्यतो 'यि' इति सप्तम्यन्तमनुवर्तते आर्धधातुकविशेषणात् तदादिविधिः । ततश्च—'अर्तेः संयोगादेरिदन्तस्य च गुणो यकि, यादावार्धधातुके लिङि च' इत्यर्थः सम्पद्यते । उदाहरणं तु 'ह्वर्यात्' इति ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सस्स्वरिव । ६६, ६९ शब्दोपतापार्थक 'स्वृ' धातोर्लिटि तत्स्थाने वसि 'परस्मैपदानाम् —' इति वसो वादेशे 'लिटि धातोः—' इति द्वित्वे अभ्याससंज्ञायाम् 'उरत्' इत्यत्वे रपरत्वे 'शपूर्वाः खयः' इति सस्य शेषे परमपि स्वरत्यादिविकल्पमिटं बाधित्वा पुरस्ताद्विप्रतिषेधकाण्डारम्भसामर्थ्यात् 'श्र्युक, किति' इतीण्निषेधे प्राप्ते क्रादिनियमात् नित्यमिटि गुणे रपरत्वे च कृते उक्तं रूपं सिद्धम् ।

सस्वरिम । ६५, ६९ । शब्दोपतार्थकात्—'स्वृ' धातोर्लिटि तत्स्थाने मस्प्रत्यये तस्य परस्मैपदानामित्यादिना मादेशे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वेऽभ्याससंज्ञायाम् 'उरत्' इत्यत्वे रपरत्वे हलादिःशेषे परमपि स्वरत्यादिविकल्पमिटं बाजित्वा पुरस्ताद्विप्रतिषेधकाण्डारम्भसामर्थ्यात् 'श्र्युकः किति' इत्यनेनेण्निषेधे प्राप्ते क्रादिनियमान्नित्यमिटि ततो गुणे रपरत्वे सस्वरिम इति सिद्धम् ।

अस्वारीत्, अस्वार्षीत् । ६५ । शब्दोपतापार्थक 'स्वृ'—धातोर्लुङि अडागमे तिप्यनुबन्धलोपे 'इतश्चेती' कारलोपे च्लिप्रत्यये तस्य सिजादेशेऽनुबन्धलोपे 'स्वरतिसुतिसूयतिधूञूदितो वा' इत्यनेन वैकल्पिकेडागमे 'अस्तिसिचोऽपृक्ते' इत्यनेन ईडागमे 'सिचि वृद्धिः परस्मैपदेषु' इत्यनेन वृद्धौ रपरत्वे 'इट ईटि' 'इत्यनेन सलोपे सवर्ण दीर्घे अस्वारीत् इति सिद्धम् । इडभावपक्षे 'सिचि वृद्धिरि'ति वृद्धौ रपरत्वे 'अस्ति- सिचः' इतीडागमे षत्वे अस्वार्षीत् इति सिद्धम् ।

आरिथ । ६६ । ऋ धातोर्लिटि सिपि थलि अनुबन्धलोपे द्वित्वे अभ्याससंज्ञायाम् 'उरत्' इति सूत्रेण ऋवर्णस्य अत्वे रपरत्वे हलादिःशेषे 'अत आदेः' इति दीर्घे 'ऋच्छत्यृताम्' इति उत्तरखण्डस्य गुणे रपरत्वे सवर्णदीर्घे 'इडत्यर्तिव्ययतीनाम्' इति नित्यमिटि आरिथ इति सिद्धम् ।

असावीत् । ६४ । प्रसवैश्वर्यार्थक—'षु' धातोर्लुङि अडागमे 'धात्वादेः षः सः' इति सत्वे तिप्यनुबन्धलोपे इतश्चेतीकारलोपे च्लिप्रत्यये तस्य सिजादेशे इचावितौ 'स्तुसुधूञ्भ्यः परस्मैपदेषु' इत्यनेन सिचः इटि 'अस्तिसिचोऽपृक्ते' इत्यनेन च ईटि 'सिचि वृद्धिः परस्मैपदेषु' इत्यनेन वृद्धौ आवादेशे 'इट ईटि' इति सलोपे सवर्णदीर्घे असावीत् इति । सिद्धयां स्तुसुधूञ्भ्यां साहचर्यात्सुनोतेरेव ग्रहणमिति तस्ले तु 'असोषीत्' इति भवति ।

Sri Vidyabharathi Book Centre, Sringeri

 CC-O. In Public Domain. Digitized by eGangotri

शृण्वन्ति । ६३ । श्रवणार्थक 'श्रु' धातोर्लटि तत्स्थाने झिप्रत्यये झस्य 'झोऽन्तः' इत्यनेनान्तादेशे शपमवाद्य 'श्रुवः शृ च' इत्यनेन शृइत्यादेशे श्नुप्रत्यये च कृते श्नोर्ङित्वाद्धातोर्गुणनिषेधे 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इत्यनेनोवङि प्राप्ते 'हुश्नुवोः सार्वधातुके' इत्यनेन यणि 'ऋवर्णान्नस्य' णत्वं वाच्यम् इति णत्वे पररूपे शृण्वन्ति ईति सिद्धम् ।

शृण्मः, शृणुमः— श्रुधातोर्लटि तत्स्थाने 'तिप्तस्झि' इत्यादिना मसि 'श्रुवः शृ च' इति श्रुवः 'शृ' आदेशे चकारात् 'श्नु' प्रत्यये च कृते शकारस्येत्संज्ञायां लोपे च कृते शित्वाद् सार्वधातुकत्वे सार्वधातुकमपित्' इति श्नोर्ङित्वे 'क्ङिति च' इति गुणनिषेधे 'शृ नु मस्' इति स्थिते णत्वे 'लोपश्चास्यान्यतरस्यां म्वोः' इति विकल्पेन उकारलोपे सस्य रूत्वे विसर्गे 'शृण्मः इति । लोपाऽभावे 'शृणुमः' इति च सिद्धम् ।

शृणु, शृणुतात्—श्रुधातोर्लोटि सिपि 'श्रुवः शृ च' इत्यनेन 'शृ' आदेशे चकारात् श्नुप्रत्यये शस्य 'लशक्वतद्धिते' इतीत्संज्ञायां लोपे च जाते शित्वात् सार्वधातुकत्वे 'सार्वधातुकमपित् इति ङित्वेन गुणनिषेधे 'सेर्ह्यपिच्च' इत्यनेन सेर्ह्यादेशे 'शृ नु हि' इत्यवस्थायां 'उतश्च प्रत्ययादसंयोगपूर्वात्' इति हेर्लुकि णत्वे 'शृणु' इति सिद्धम् । तातङ्पक्षे 'शृणुतात्' इति भवति ।

शृणयुः ६८—श्रुधातोर्विधिलिङि तत्स्थाने झौ झेर्जुसि अनुबन्धलोपे 'श्रुवः शृ च' 'शृ' इत्यादेशे चकारात् श्नुप्रत्यये च कृते 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति णत्वे 'यासुट् परस्मैपदेषु—' इति यासुटि सुट्तिथोः इति सुटि उभयत्र अनुबन्धलोपे लिङः सलोपोऽनन्त्यस्य इति सकारद्वयस्य लोपे 'उस्यपदान्तात्' इति पररूपे सस्य रुत्वे विसर्गे शृणुयुः इति सिद्धम् ।

अगे । ६६ । गत्यर्थक 'गा'—धातोर्लुङि 'लुङ्लङ्' इति अटि आत्मनेपदे इटि अनुबन्धलोपे सार्वधातुकत्वात् शपि अनुबन्धलोपे सवर्णदीर्घे 'आत् गुणः इत्यनेन गुणे च कृते अगे इति सिद्ध ।

गेत, गासीष्ट । ६८ । 'गा'—धातोर्विधिलिङि तत्स्थाने तप्रत्यये शपि क्षपावितो, 'गा अ त' इत्यवस्थायां सवर्णदीर्घे सीयुडागमे अनुबन्धलोपे सुटि लिङः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

लोपोऽनन्त्यस्य इति सकारपोर्लोपे 'आद् गुणः' इति गुणे गत्र इति इति सिद्धम् । आशीर्लिङि तु सीयुटि कृते 'सुटेतियोः' इत्यनेन सुडागमे यलोपे कत्वे ष्टुत्वे च कृते 'गासीष्ट' इति सिद्धम् ।

अगास्त । ६०, ६४ । गाधातोर्लुङि अडागमे आत्मनेपदे तप्रत्यये च्लौ तस्य सिजादेशे 'अगास्त' इति । नच 'घुमास्था—इति इत्वं कुतो ने वाच्यम्, 'गाङ्-कुटादिभ्यः' इत्यत्र इणादेशस्यैव गापो ग्रहणात् ।

ऊवे । ६६ । शब्दार्थक 'उ' धातोर्लिटि तत्स्थाने आत्मनेपदे 'त' प्रत्यये तस्य 'लिटस्तझयोरे शिरेच्' इत्यनेन एशत्वे कृते 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे —'उ उ ए' इत्यवस्थायां द्वितीयस्य उवर्णस्य 'अचिश्नुधातुभ्रुवां य्वोरियङुवङौ' इत्यनेन उवङि कृते सवर्णदीर्घे ऊवे इति निष्पन्नम् । न च उवङो बहिर्भूतप्रत्यायापेक्षतया बहिरङ्गत्वादन्तरङ्गे सवर्णदार्घे 'ऊ ए' इति स्थिते उवङि 'उवे' इत्येव स्यादिति वाच्यम्, 'वार्णादाङ्गं बलीयः' इति परिभाषया उवङ एव व्याप्यत्वात् प्रवृत्तेः ।

ओषीष्ट । ६८ । शब्दार्थक–उ–धातोराशीर्लिङि तत्स्थाने आत्मनेपदे तप्रत्यये 'लिङः सीयुट्' इत्यनेन सीयुडागमे अनुबन्धलोपे यलोपे 'सुट् तियोः' इत्यनेन तकारस्य सुडागमे अनुबन्धलोपे 'पुगन्त-लघूपधस्य च' इत्यनेन गुण ततो द्वयोरपि सकारयोः षत्वे ष्टुत्वे च कृते ओषीष्ट इति सिद्धम् ।

प्रणिमयते इत्यत्र माक्पाभावात् णत्वं कथम् । ६७ । प्रन्युपसर्गक—प्रणिदानार्थक–'मे' धातोर्लटि तत्स्थाने तप्रत्यये शपि गुणेऽयादेशे टेरेत्वे 'नेर्गदनदपतपद-घुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च' इत्यनेन णत्वे प्रणिमयते इति सिद्धम् ।

नन्वत्र णत्वं दुर्लभम्, शिद्विषये आत्वाऽभावेन माङ्पाऽभावात् । कृतात्वेऽस्मिन् णत्वं दुर्लभमेव लक्षणप्रतिपदोक्तपरिभाषया, प्रति तदोक्तस्य 'मा' धातोरेव ग्रहणौचित्यात् । न च 'गामादाग्रहणेष्वविशेषः' इति परिभाषया कृतात्वस्य मेङोऽपि ग्रहणं स्यादिति वाच्यम्, तथा सति मिनातिमिनोत्योरात्वे कृते 'प्रनिमाता, प्रनिमास्यति' इत्यादावप्यतिप्रसक्तिः स्यादिति चेन्न, णत्वविधायकशास्त्रे 'घुमे' त्यस्य स्थाने 'घुमाप्रकृतिमाङि'ति पठित्वा तत्र प्रकृतिशब्दस्य घुमाङ्प्रकृतिपर-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

रूपमाश्रित्य घौ, माङ् धातो, घुमाप्रकृतौ च परत इति अर्थमाश्रित्य माप्रकृतेर्ङितो मेङ् धातो कृ ित्वेऽपि ग्रहणस्य भाष्यकृताऽभ्युपगमेन प्रकृते दोषाऽभावाद् इति दिक् ।

दिग्ये । ६४, ६७ । रक्षणार्थक-'दे' धातोर्लिटि तत्स्थाने तप्रत्यये तस्य एशादेशे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे प्राप्ते 'दयतेर्दिगि लिटि' इत्यनेन दिग्यादेशे च प्राप्ते तत्र विशेषविहित दिग्यादेशेन द्वित्वस्य बाधात् दिग्यादेश एव जाते यणि 'दिग्ये' इति सिद्धम् । नचैवं 'प्यायः पी' इत्यादेरपि विहितत्वेन द्वित्वबाधः स्यादिति वाच्यम्, विषयसप्तमीमाश्रित्य लिङ् त्पत्तेः प्रागेव पीभावा-दिप्रवृत्तेः, दिग्यादेशविधौ तु लिटीति परसप्तम्येव नतु विषयसप्तमी; लक्ष्यानुरोधात् ।

अदिथाः । ७० । रक्षणार्थक 'दे' धातोर्लुङि अडागमे थास्प्रत्यये च्लिप्रत्यये तस्य सिजादेशे ऽनुबन्धलोते 'आदेच उदेशेऽशिति' इति सूत्रेणात्वे घुसंज्ञायां 'स्थाघ्वोरिच्च' इति इत्वे सिचः कित्वे च कृते 'ह्रस्वादङ्गात्' इति सिज्लोपे सस्य रुत्वे विसर्गे अदिथाः इति सिद्धम् ।

तरिता । ५७ । तृ धातोर्लुटि तिपि शपं प्रबाध्य तासि डादेशे गुणे रपरे इटि 'वृतो वेति' विकल्पेन इटो दीर्घे तरिता इति सिद्धम् ।

जुगुप्सते । ६७, ७१ । गोपनार्थयक—गुप्—धातोर्गम्यमाननिन्दायां 'गुप्तिज्किद्भ्यः सन्' इत्यनेन सन्प्रत्ययेऽनुबन्धलोपे धात्वधिकारत्वाभावात्सनोरार्धधातुकत्वाभावेनेड्गुणयोरभावे 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां लटि, तत्स्थाने त-प्रत्यये 'टित आत्मनेपदानां टेरे' इत्यनेन टेरेत्वे सन्यङोः, इत्यनेन द्वित्वेऽभ्याससंज्ञायां हलादिःशेषे 'कुहोश्चुः' इत्यनेन चुत्वे शपि अनुबन्धलोपे पररूपे 'जुगुप्सते' इति सिद्धम् । न चात्र सन्नन्तस्य रूपस्य प्रदर्शनमनुचितमिति वाच्यम् निन्दार्थेषु नित्यसन्नन्तत्वद्योतनायात्र रूपप्रदर्शनस्यावश्यकत्वात् ।

जुगुप्साञ्चक्रे । ६० । गुपधातोर्निन्दायां 'गुप्तिज्किद्भ्यः सन्' इति सन प्रत्यये अनुबन्धलोपे 'सनाद्यन्तेति' धातुसंज्ञायां लिटि 'सन्यङोः' इत्यनेन द्वित्वे अभ्याससंज्ञायां हलादिःशेषे चुत्वे, 'कास्प्रत्ययादाममन्त्रे लिटि' इत्यनेन आमि, 'आमः' इत्यनेन लिटो लुकि 'कृञ्चानुप्रयुज्यतेलिटि' इत्यनेन लिट्परक-'कृ'-इत्यस्यानुप्रयोगे लिटः स्माने तप्रत्यये तस्य 'लिटस्तझयोरेशिरेच्' इत्यनेन एशादेशे द्वित्वादिके कृते जुगुप्साञ्चक्रे इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

मीमांसते । ४१ । मानधातोः जिज्ञासायां 'मान्बधदानशान्भ्यो दीर्घश्चाभ्यासस्य' सन्प्रत्यये 'सन्यङोः' इत्यनेन द्वित्वेऽभ्याससंज्ञायां हलादिःशेषे अभ्यासह्रस्वे 'सन्यतः' इत्यनेनेत्वे 'मान्बधेत्य'नेनाभ्यासदीर्घे 'नश्चापदान्तस्य झलि' इत्यनेनानुस्वारे मीमांसेत्यस्य 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां लटि तत्स्थाने तप्रत्यये शपि 'अतो गुणे' इत्यनेन पररूपे टेरेत्वे कृते मीमांसते इति सिद्धम् ।

परिषस्वजे । ६३ । परि—उपसर्गात् ष्वज्धातोर्लिटि 'धात्वादेः षः सः' इति सत्वे लिटः स्थाने आत्मनेपदे तप्रत्यये द्वित्वेऽभ्याससंज्ञायां हलादिःशेषे तप्रत्ययस्य एशादेशे 'परिनिविभ्यः' इति षत्वे परिषस्वजे इति । उत्तरस्य सस्य षत्वन्तु न, 'सदेः परस्य लिटि' इति षत्वनिषेधसूत्रे 'स्वञ्जेरुपसंख्यानम्' इति वार्तिकेन तथैव विधानात् ।

परिष्कण्णः इत्यत्र णत्वं कथमिति । ६७, ६९ । परिपूर्वकात् 'स्कन्द'—धातोः क्तप्रत्ययेऽनुबन्धलोपे 'अनिदितां हल उपधायाः क्ङिति' इत्यनेन नलोपे 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' इत्यनेन निष्ठातकारस्य तत्पूर्वदकारस्य च नत्वे 'परेश्च' इत्यनेन वैकल्पिकषत्वपक्षे प्रथमनकारस्य रेफापेक्षया भिन्नपदस्थत्वेऽपि षात्परत्वाण्णत्वे द्वितीयनकारस्य ष्टुत्वेन णत्वे परिष्कण्णः इति रूपं सिद्धम् ।

नन्वत्र निमित्तकार्यिणोरेकपदस्थत्वात् दकारस्थानिकनकारस्य षकारनिमित्तकं णत्वमन्तरङ्गं तदपेक्षया परीत्युपसर्गात्मकपदान्तरस्थनिमित्तीकृत्य प्रवर्त्तमानं बहिरङ्गमिति 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषयाऽन्तरङ्गे णत्वे कर्त्तव्ये बहिरङ्गस्य षत्वास्याऽसिद्धत्वात्षात् परत्वाभावेन कथं णत्वमिति वाच्यम्, 'पूर्वं धातुरुपसर्गेण युज्यते ततः साधनेने'ति भाष्येण धातूपसर्गयोः कार्यमन्तरङ्गमित्यभ्युपगमात्, 'पूर्वं धातुः साधनेन यज्यते' इति स्वीकारे तु 'परिष्कन्नः' इति रूपम् । वस्तुतस्तु भाष्यनये त्रैपादिकेऽन्तरङ्गे परिभाषाया अप्रवृत्त्याऽस्मिन्पक्षेऽपि णत्वं भवत्येव । अत एव 'अभिषिषेणयिषति, 'अभिषुणु' इत्यादयः भाष्यप्रयोगाः सङ्गच्छन्ते ।

गमिष्यति । ६० । गत्यर्थकगम्धातोर्लृटि तत्स्थाने तिपि अनुबन्धलोपे शपमपबाध्य 'स्यतासीलृलुटोः' इत्यनेन स्यप्रत्यये 'गमेरिट् परस्मैपदेषु' इत्यनेन स्यस्यादेरार्धधातुकस्य इडागमे षत्वे गमिष्यति इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अयंसीत् । ६५ । उपयमार्थकात्—'यम्'—धातोर्लुङि अडागमे तिप्यनुबन्धलोपे इतश्चेतीकारलोपे च्लिप्रत्यये तस्य सिजादेशे इत्वाचितौ 'यमरमनमातां सक् च' इत्यनेन सकि इडागमे च कृते 'अस्तिसिचोऽपृक्ते' इत्यनेन सिज्लोपे 'वदव्रजहलन्तस्याऽचः' इत्यनेन हलन्तलक्षणवृद्धौ प्राप्तायां 'नेटि' इत्यनेन निषेधे मस्याऽनुस्वारे अयंसीत् इति सिद्धम् ।

सजति । ७० । 'षञ्ज्'—धातोर्लटि 'धात्वादेः षः सः' इत्यनेन सत्वे लटः स्थाने तिप्यनुबन्धलोपे शपि शपाविती शपः पित्त्वेन कित्वाऽभावात् 'अनिदितां हल उपधायाः क्ङिति' इत्यनेन नलोपाऽप्राप्तौ 'दंशसञ्जस्वञ्जां शपि' इत्यनेन अनुस्वारपरसवर्णयोरसिद्धत्वान्नलोपे कृते सजति इति सिद्धम् ।

अदर्शत्, अद्राक्षीत् । ६५ । 'दृश्' धातोर्लुङि अडागमे तत्स्थाने तिप्यनुबन्धलोपे च्लिप्रत्यये तस्य 'इरितो वा' इत्यनेन विकल्पेनाङि ततो ङित्वात् गुणनिषेधे प्राप्ते 'ऋदृशोऽङि गुणः' इत्यनेन गुणे रपरत्वे च कृते अदर्शत् इति रूपं सिद्धम् । अङभावे तु 'शल इगुपधादनिटः क्सः' इत्यनेन क्सादेशे प्राप्ते 'न दृशः' इत्यनेन निषेधे सिजादिके कृते अद्राक्षीत् इति सिद्ध्यति ।

अक्राक्षीत् । ७२ । विलेखनार्थकात्—'कृष्'—धातोर्लुङि अडागमे तत्स्थाने, तिप्यनुबन्धलोपे इतश्चेतिकारलोपे च्लिप्रत्यये तस्य सिजादेशे प्राप्ते तं प्रबाध्य 'स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः' इत्यनेन विकल्पेन सिजादेशे इत्वाविती 'अनुदात्तस्य चर्दुपधस्याऽन्यतरस्याम्' इत्यनेनामागमेऽनुबन्धलोपे यणि 'षढोः कः सि' इत्यनेन षस्य कादेशे सस्य षत्वे सवर्णदीर्घे च कृते 'अक्राक्षीत्' इति । सिचि अमाभावपक्षे तु—'वदव्रजहलन्तस्याऽचः' इत्यनेन वृद्धौ रपरत्वे अकार्क्षीत् इति । सिजभावपक्षे च 'शल इगुपधादनिटः क्सः' इत्यनेन क्सादेशे अनुबन्धलोपे कित्वादमोऽभावे गुणाभावे च अकृक्षत् इति रूपम् सिद्धम् ।

अक्राष्टाम् । ६७, ६६ 'कृष' धातोर्लुङि अडागमे तस् प्रत्यये 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन तसस्तामादेशे च्लिप्रत्यये तस्य 'शल इगुपधादनिटः क्सः' इत्यनेन क्सादेशे प्राप्ते 'स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः' इत्यनेन विकल्पेन सिजादेशेऽनुबन्धलोपे 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' इत्यनेन विकल्पेनामादेशे 'वदव्रजहलन्तस्याचः' इत्यनेन वृद्धौ 'झलो झलि' इत्यनेन सिज्लोपे ततः ष्टुत्वे

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अकाङ्क्षम् इति सिद्धम्। अडभावे–अकाङ्क्षीम्, सिजादेशाभावे पक्षे तु–अकाङ्क्षाताम् इति रूपाणि भवन्ति।

अधाक्षीत्। ७१। भस्मीकरणार्थक–'दह्' धातोर्लुङि 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेनाडागमेऽनुबन्धलोपे तत्स्थाने तिप्यनुबन्धलोपे च्लिप्रत्यये तस्य सिजादेशे इत्यादिनी अनिट्कत्वेन वलादिलक्षणेटोऽभावे 'अस्तिसिचोऽपृक्ते' इत्यनेन ईडागमे 'वदव्रजहलन्तस्याचः' इत्यनेन वृद्धौ हस्य ढत्वे दस्य 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इत्यनेन भष्भावे ढस्य जश्त्वे तस्य चर्त्वे सस्य षत्वे कषसंयोगे क्षे जाते अधाक्षीत् इति सिद्धम्।

ईजतुः। ९६। यज्धातोर्लिटि तसि तस्योऽतुसि 'सम्प्रसारणं तदाश्रयञ्च कार्यं बलवत्' इति न्यायाद् द्वित्वात् प्राक् 'असंयोगाल्लिट् कित्' इत्यतुसः कित्त्वेन 'वचिस्वपियजादीनां किति' इति यकारस्य सम्प्रसारणे 'सम्प्रसारणाच्च' इति पूर्वरूपे 'इज् अतुस्' इति स्थिते 'पुनः प्रसङ्गविज्ञानात् सिद्धम्' इति न्यायेन 'लिटि धातोरनभ्यासस्य' इति द्वित्वे अभ्याससंज्ञायां 'हलादिः शेषः' इति अभ्यासस्य लोपे 'इ इज् अतुस्' इति स्थिते सवर्णदीर्घे सकारस्य रुत्वे विसर्गे ईजतुः इति सिद्धम्।

ईजे। ७१। 'यज्'—धातोर्लिटि तस्थाने तप्रत्यये 'लिटस्तझयोरेशिरेच्' इत्यनेन एशादेशे 'लिटि धातोरनभ्यासस्य' इत्यनेन सम्प्रसारणे च प्राप्ते 'असंयोगाल्लिट् कित्' इत्यनेन लिटः कित्त्वात् 'वचिस्वपियजादीनां किति' इत्यनेन सम्प्रसारणे च प्राप्ते द्वित्वात्परत्वात्सम्प्रसारणे पूर्वरूपे च कृते द्वित्वेऽभ्याससंज्ञायां हलादिः शेषे सवर्णदीर्घे च विहिते ईजे इति सिद्धम्। न च 'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेवे'ति परिभाषया कथं द्वित्वमिति वाच्यम्, 'पुनः प्रसङ्गविज्ञानात् सिद्धम्' इति तन्निषेधः।

अयाक्षीत्—यज्धातोर्लुङि 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यडागमे अनुबन्धलोपे तिपि च्लौ च्लेः, सिचि अनुबन्धलोपे तस्यार्धधातुकत्वात् 'एकाच उपदेशेऽनुदात्तात्' इतीण्निषेधे [illegible] इकारलोपे सकारस्यापृक्तत्वात् 'अस्तिसिचोऽपृक्ते' इति ईटि 'अयज् स् ई त्' इति स्थिते 'वदव्रजहलन्तस्याचः' इति वृद्धौ '[illegible]' इति [illegible] [illegible] 'षढोः कः सि' इति जस्य कत्वे 'आदेशप्रत्यययोः' इति षत्वे 'अयाक्षीत्' [illegible] आत्मनेपदे तु 'अयष्ट' इति भवति।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

उवोढ । ६५ । वह् धातोर्लिटि सिपि सिपः थलि अनुबन्धलोपे 'एकाच उपदेशेऽनुदात्तात्' इति इण्निषेधे प्राप्ते क्रादिनियमान्नित्ये इटि प्राप्ते 'उपदेशेऽत्वतः' इति तन्निषेधे थलः पित्वात् 'असंयोगाल्लिट् कित्' इत्यस्याप्राप्त्या कित्त्वाभावेन 'वचिस्वपि' इति सम्प्रसारणाऽभावे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे अभ्याससंज्ञायां 'लिट्यभ्यासस्योभयेषाम्' इति अभ्यासवकारस्य सम्प्रसारणे 'सम्प्रसारणाच्च' इति पूर्वरूपे 'हलादिः शेषः' इति अभ्यासहकारस्य लोपे 'उ वह् थ' इति स्थिते 'हो ढः' इति हस्य ढत्वे 'झषस्तथोर्धोऽधः' इति थस्य धत्वे 'ष्टुना ष्टुः' इति धस्य ष्टुत्वेन ढत्वे 'ढो ढे लोपः' इति पूर्वढकारस्य लोपे 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति दीर्घे प्राप्ते तदपवादात् 'सहिवहोरोदवर्णस्य' इत्यकारस्य ओत्वे 'उवोढ' इति सिद्धम् ।

अवाक्षीत्—वह् धातोर्लुङि अडागमे अनुबन्धलोपे तिपि 'इतश्च' इति इकारलोपे च्लौ सिचि अनुबन्धलोपे तस्यापृक्तत्वात् 'अस्तिसिचोऽपृक्ते' इति ईटि 'अवह् स् ई त्' इति स्थिते 'वदव्रजहलन्तस्याचः' इति वृद्धौ 'हो ढः' इति हस्य ढत्वे 'षढोः कः सि' इति ढस्य कत्वे 'आदेशप्रत्यययोः' इति सिचः सस्य षत्वे 'अवाक्षीत्' इति । आत्मनेपदे तु 'अवोढ' इति भवति ।

अवोढाम् । ७० । वह् धातोर्लुङि 'लुङ्—लङ्—' इत्यडागमे तसि तसः स्थाने तामादेशे च्लौ तस्य सिचि अनुबन्धलोपे 'वदव्रजे'ति वृद्धौ 'हो ढः' इति हस्य ढत्वे 'अवाढ् स् ताम्' इति स्थिते 'झलो झलि' इति सलोपे 'झषस्तथोर्धोऽधः' इति तस्य धत्वे ष्टुत्वे 'ढो ढे लोपः' इति ढलोपे 'सहिवहोरोदवर्णस्य' इत्यकारस्यौत्वे 'अवोढाम्' इति सिद्धम् ।

वत्स्यति । ४५ । निवासार्थक-'वस्'-धातोर्लृटि तस्थाने तिप्यनुबन्धलोपे शपमपवाद्य स्यप्रत्ययेऽनिट्कत्वेनेडभावे 'सः स्यार्धधातुके' इत्यनेन सस्य तत्वे कृते 'वत्स्यति' इति सिद्धम् ।

उवाय, ववौ । ६६ । तन्तुसन्तानार्थक 'वे' धातोर्लिटि तिपि 'परस्मैपदानाम्' इति णलादेशे अनुबन्धलोपे 'वेञो वयिः' इति विभाषया वयादेशे द्वित्वेऽभ्याससंज्ञायां 'लिट्यभ्यासस्योभयेषाम्' इत्यनेन वस्य सम्प्रसारणे पूर्वरूपे 'अत उपधायाः' इति वृद्धौ 'उवाय' इति । न च वकारस्य सम्प्रसारणं कुतो [illegible]

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

वयो यः' इति निषेधात् । न च वयादेशाऽभावेऽपि द्वित्वे सति अभ्यासस्य सम्प्रसारणे कृते 'अचो ञ्णिति' इति वृद्धौ अयादेशे 'उवाय' इति सिद्धयत्येवेति वाच्यम्, 'ऊयतुः' इत्याद्यर्थमावश्यकत्वेन अत्र वयादेशाभ्युपगमात् । वयादेशाभावपक्षे 'वचिस्वपि–' इत्यनेन 'लिट्यभ्यासस्योभयेषाम्' इत्यनेन च सम्प्रसारणे प्राप्ते 'वेञः' इत्यनेन तन्निषेधे 'आदेच उपदेशेऽशिति' इत्यनेन आत्वे द्वित्वे अभ्याससंज्ञायां ह्रस्वे 'आत औ णलः' इत्यौत्वे 'वृद्धिरेचि' इति वृद्धौ 'ववौ' इति आत्मनेपदपक्षे 'ववे' इति रूपाणि भवन्ति ।

ऊयतुः । ६६, ६८ । तन्तुसन्तानार्थक–वे–धातोर्लिटि तसि तस्यातुसादेशे 'वेञो वयिः' इत्यनेन वयादेशे 'असंयोगाल्लिट् कित्' इत्यनेन लिटः कित्वेन 'ग्रहिज्ये'ति यस्य सम्प्रसारणे प्राप्ते 'लिटि वयो यः' इत्यनेन तन्निषेधे वकारस्य सम्प्रसारणे पूर्वरूपे द्वित्वेऽभ्याससंज्ञायां हलादिःशेषे सवर्णदीर्घे 'ऊयतुः' इति सिद्धम् । 'वश्चास्याऽन्यतरस्यां किति' इत्यनेन वयो यस्य विकल्पेन वत्वे तु 'ऊवतुः' इति । वयादेशाऽभावे 'वेञः' इत्यनेन सम्प्रसारणनिषेधे आत्वे द्वित्वे ह्रस्वे आल्लोपे सति 'ववतुः' इति भवति ।

ऊवतुः । ६८, ७१ । तन्तुसन्तानार्थक–डकारेत्संज्ञक–'वे' धातोर्लिटि तत्स्थाने तसि तस्यातुसादेशे 'वेञो वयिः' इत्यनेन धातोर्वयादेशे 'वय् अतुस्' इत्यवस्थायां द्वित्वे प्राप्ते, 'असंयोगाल्लिट् कित्' इति लिटः कित्वेन 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च' इत्यनेन 'न सम्प्रसारणे सम्प्रसारणम्' इति लिङ्गादन्त्यस्य यणः पूर्वं सम्प्रसारणमिति विज्ञानात् यस्य सम्प्रारणे च प्राप्ते 'सम्प्रसारणं तदाश्रयं च कार्यं बलवत्' इति नियमेन सम्प्रसारणस्यैव प्राप्तौ सत्यां 'लिटि वयो यः' इत्यनेन यस्य निषेधे वस्यैव सम्प्रसारणे 'सम्प्रसारणाच्चे'ति पूर्वरूपे द्वित्वादिके कृते तस्य 'वश्चास्यान्यतरस्यां किति' इत्यनेन वत्वे 'ऊवतुः' इति । पक्षे 'ऊयतुः' इति भवति ।

ऊयुः, ववुः । ६५, ७० । तन्तुसन्तानार्थक–'वे'–धातोर्लिटि तत्स्थाने झिप्रत्यये तस्य 'परस्मैपदानामि'त्यादिना उसादेशे 'वेञो वयिः' इत्यनेन वैकल्पिके वयादेशे 'असंयोगाल्लिट् कित्' इत्यनेन लिटः कित्वे 'ग्रहिज्यावयिव्यधिवष्टिविचवृश्चतिपृच्छभृज्जतीनां ङिति च' इत्यनेन 'न सम्प्रसारणे सम्प्रसारणमि' ति

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

लिङ्गं दन्त्यस्य गणः पूर्वं सम्प्रसारणमिति यकारस्यैव सम्प्रसारणे प्राप्ते 'लिटि वयो यः' इत्यनेन तन्निषेधे वस्यैव सम्प्रसारणे 'सम्प्रसारणाच्च' इत्यनेन पूर्वरूपे च जाते द्वित्वेऽभ्याससंज्ञायां हलादिशेषे सवर्णदीर्घे सस्य रुत्वे विसर्गे 'ऊयुः' इति सिद्धम् । 'वश्चास्यान्यतरस्यां किति' इत्यनेनाऽपि वस्य यस्य वैकल्पिके वत्वे 'ऊवुः' इति रूपम् । वयादेशाऽभावे 'ग्रहिज्येति' सम्प्रसारणस्य 'वेञः' इत्यनेन निषेधे 'ववुः' इति रूपम् । आत्मनेपदे तु 'ऊयिरे, ऊविरे' इति रूपे भवतः ।

विव्याय । ६५ ६७ । व्येञ् धातोर्लिटि तत्स्थाने तिपि 'परस्मैपदानामि' त्यादि णलादेशे अनुबन्धलोपे 'आदेच उपदेशेऽशिति' इत्यात्वे प्राप्ते 'न व्यो लिटि' इति तन्निषेधे 'अचो ञ्णिति' इति वृद्धौ 'व्यै अ' इति स्थिते 'लिटि धातोः—' इति द्वित्वे अभ्याससंज्ञायां 'लिट्यभ्यासस्योभयेषाम्' इत्यभ्यासयकारस्य सम्प्रसारणे पूर्वरूपे 'विव्यै अ' इति स्थिते ऐकारस्य आयादेशे 'विव्याय' इति सिद्धम् ।

नचात्र सम्प्रसारणात् प्राक् वस्त्वाद्धलादिःशेषेण यकारस्य निवृत्तौ ततः तकारस्य सम्प्रसारणे उकारे 'उव्याय' इति रूपापत्तिरिति वाच्यम् ? उभयेषाम् इति ग्रहणसामर्थ्येन परमपि हलादिःशेषं बाधित्वा यस्य सम्प्रसारणेनाऽदोषात् । अन्यथा 'लिट्यभ्यासस्ये' त्यत्र 'वचिस्वपियजादीनामि'त्यस्य 'ग्रहिज्ये'त्यादिसमग्रसूत्रस्य च स्वरितत्वादनुवृत्त्यैव सिद्धे उभयेषां ग्रहणस्य वैयर्थ्यं स्यात् ? न च वस्यैवाऽनेन सम्प्रसारणं कुतो नेति वाच्यम् ? 'न सम्प्रसारणे सम्प्रसारणम्' इति लिङ्गेन पूर्वं यस्यैव सम्प्रसारणावगतेः ।

शासिवसिघसीनाम् । अत्र इण्कोः इत्यधिकारः । तेन शासि वसि घसि इत्येतेषां इण्कोरुत्तरस्य सकारस्य मूर्धन्यो भवति इत्यर्थः । न च नुविसौ सुपिसः इत्यत्र षत्ववारणाय अस्य सूत्रस्य धातोः सकारस्य षत्वं चेत् तर्हि शासिवसिघसीनामेव इति नियमार्थत्वं स्वीकृत्य 'आदेशप्रत्यययोः' इति सूत्रं व्यर्थमिति वाच्यम्. आदेशावयवस्य षत्ववारणाय आदेशग्रहणम्. तेन धातुभिन्नसकारस्य चेद् भवति आदेशरूपस्यैवेति नियमप्रसंगवारणाय प्रत्ययग्रहणमपि कर्तव्यमेवेति दिक् ।

उवाय । ४८ । तन्तुसन्तानार्थकवेञ्धातोर्लिटि, तिपि णलि 'वञो वयिः इति विकल्पेन वयादेशे द्वित्वे, अभ्यासत्वे, हलादिः शेषे. 'लिट्यभ्यासस्योभयेषाम्' इति यस्य सम्प्रसारणेन उकारे 'सम्प्रसारणाच्च' इति पूर्वरूपे 'अत उपधाया' इति

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

उपधावृद्धौ उवाय इति सिद्धम्। न च अत्र 'वेञः' इत्यनेन सम्प्रसारणनिषेधः कुतो नेति वाच्यम्, ग्रहिज्या-इत्यत्र वयिग्रहणेन अत्र निषेधाप्रवृत्तेः। न च हलादिः शेषात् पूर्वं यकारस्य सम्प्रसारणं कुतो नेति वाच्यम्, 'लिटि वयो यः' इत्यनेन निषेधात्।

वयादेशाभावपक्षे तु वेधातोर्लिटि तिपि णलि, एकारस्य आत्वे द्वित्वे, अभ्यासत्वे, ह्रस्वत्वे 'आत औ णलः' इति औत्वे वृद्धौ ववौ इति सिद्धम्। आत्मनेपदे तु लिटि तप्रत्यये तस्य एशादेशे आत्वे द्वित्वे अभ्यासत्वे, ह्रस्वे ववा ए इत्यवस्थायां आल्लोपे ववे इति त्रीणि रूपाणि भवन्ति। न च ववौ इत्यत्र यजादित्वात् सम्प्रसारणं कुतो नेति वाच्यम्, वेञः निषेधात्।

जुहाव। ६०, ६५। 'ह्वे' धातोर्लिटि तत्स्थाने तिपि तस्य णलादेशेऽनुबन्धलोपे 'आदेच उपदेशेऽशिति' इत्यनेनात्वे ततो 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे प्राप्ते 'अभ्यस्तस्य च' इत्यनेन ह्वेञः सम्प्रसारणविधानेन द्वित्वं बाधित्वा परत्वात्सम्प्रसारणे 'सम्प्रसारणाच्च' इत्यनेन पूर्वरूपे 'पुनः प्रसङ्गविज्ञानात्' द्वित्वेऽभ्याससंज्ञायां 'कुहोश्चुः' इत्यनेनाभ्यासस्य चुत्वे तस्य जत्वे 'अचो ञ्णिति' इत्यनेन वृद्ध्यावादेशे 'जुहाव' इति सिद्धम्।

'ह्वेञ्' धातोर्लुङि। ५६। धातोर्लुङि प्रथमपुरुषैकवचने अह्वत्, अह्वत, अह्वास्त इति रूपत्रयम्। 'ह्वे' धातोर्लुङि तत्स्थाने तिप्यनुबन्धलोपे अडागमे 'आदेच उपदेशेऽशिति' इत्यनेन आत्वे च्लिप्रत्यये तस्य सिजादेशे प्राप्ते तमपवाद्य 'लिपिसिचिह्वश्च' इत्यनेन अङि अनुबन्धलोपे 'आतो लोप इटि च' इत्यनेन आल्लोपे 'अह्वत्' इति सिद्धम्। आत्मनेपदे तु– विकल्पेन 'आत्मनेपदेष्वन्यतरस्याम्' इत्यनेन च्लेरङि आल्लोपे 'अह्वत' इति रूपम्। अङभावे तु–अनिट्कत्वेन वलादिलक्षणेडभावेऽपृक्तत्वाभावात् 'अस्तिसिचः' इत्यनेनाऽपीडभावे अह्वास्त इति सिद्धम्।

शुशाव, शिश्वाय। ६६। श्विधातोर्लिटि तिपि णलि 'लिट्यभ्यासस्योभयेषाम्' इति अभ्याससम्प्रसारणं बाधित्वा द्वित्वात् प्रागेव 'विभाषा श्वेः' इत्यनेन परत्वात् सम्प्रसारणे पूर्वरूपे च कृते ततो णित्वे वृद्धौ आवादेशे 'शुशाव' इति। 'विभाषा श्वेः' इति विकल्पपक्षे द्वित्वे अभ्यासत्वे 'लिट्यभ्यासस्योभये

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri
थाम्' इति नित्यं सम्प्रसारणे प्राप्ते 'श्वयतेर्लिट्यभ्यासलक्षणप्रतिषेधः' इति निषेधे हलादिःशेषे वृद्धौ आयादेशे 'शिश्वाय' इति सिद्धम् ।

श्वयतेर्लुङि रूपाणि विलिख्य साधयत । ६६, ६८ । श्वियधातोर्लुङि अडागमे लस्य स्थाने तिपि अनुबन्धलोपे च्लिप्रत्यये तस्य 'जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च' इति सूत्रेणाङि 'श्वयतेरः' इति इकारस्याकारे पररूपे 'अश्वत्' इति । अङभावे-'विभाषा धेट्श्व्योः' इति च्लेश्चङि द्वित्वेऽभ्याससंज्ञायां हलादिशेषे इयङि 'अशिश्वियत्' इति । चङभावे च्लेः सिजादेशे 'सिचि वृद्धिरि'ति वृद्धौ प्राप्तायां 'ह्म्यन्ते'ति निषेधे 'आर्धधातुकस्येड्वलादेः' इति इडागमे 'अस्तिसिचोऽपृक्ते' इति ईडागमे 'इट ईटि' इति सलोपे दीर्घे गुणेऽयादेशे 'अश्वयीत्' इति । इत्थं अश्वत्, अश्वताम्, अश्वन् । अश्वः, अश्वतम्, अश्वत, अश्वम्, अश्वाव, अश्वाम । अशिश्वियत्, अशिश्वियताम्, अशिश्वियन्, अशिश्वियः, अशिश्वियतम्, अशिश्वियत, अशिश्वियम्, अशिश्वियाव, अशिश्वियाम । अश्वयीत्, अश्वयिष्टाम्, अश्वयिषुः, अश्वयीः, अश्वयिष्टम्, अश्वयिष्ट, अश्वयिषम्, अश्वयिष्व, अश्वयिष्म, इति रूपाणि ।

शूयात् । श्वियधातोराशीर्लिङि तिपि इतश्चेतीकारलोपे यासुटि तस्य कित्त्वात् 'वचिस्वपी'त्यादिना सम्प्रसारणे पूर्वरूपे सुटि 'स्कोः संयोगाद्यो'रिति सकारद्वयस्य लोपे 'हलः' इति दीर्घे शूयात् इति सिद्धम् ।

अश्वत् । ७० । श्वियधातोर्लुङि अटि तिपि 'इतश्चे'तीकारलोपे च्लेः प्रसक्तस्य सिचि प्राप्ते 'जॄस्तम्भु'-इति पक्षे अङि अश्वि अत् इति स्थिते इयङि प्राप्ते 'श्वयतेरः' इति इकारस्य अकारे पररूपे अश्वत् इति सिद्धम् । अङोऽभावपक्षे 'विभाषा धेट्श्व्योः' इति चङि द्वित्वे अभ्यासत्वे हलादिःशेषे अशिश्वि अत् इति स्थिते लघूपधगुणापेक्षया अन्तरंगत्वात् पूर्वं इयङि अशिश्वियत् इति । अङश्चङश्चाभावे-सिचि, इटि, ईटि, 'इट ईटि' इति सलोपे सवर्णदीर्घे अश्वि ईत् इति स्थिते 'सिचि वृद्धिरि'ति वृद्धौ प्राप्तायां ह्म्यन्तक्षण-इति वृद्धिनिषेधे गुणे अयादेशे अश्वयीत् इति सिद्धम् ।

आर्तीत् । ७५ । ऋतिः सौत्रो धातुस्तस्मात्लुङि तत्स्थाने तिप्यनुबन्धलोपे अजाद्यमपवादाय 'आडजादीनाम्' इत्यनेनाडागमे 'आटश्च' इत्यनेन वृद्धौ रपरत्वे
Sri Vidyabharathi Book Centre, Sringeri

 CC-O. In Public Domain. Digitized by eGangotri

ञिलप्रत्यये तस्य सिजादेशेऽनुबन्धलोपे 'आर्धधातुकस्येड्वलादेः' इत्यनेन इडागमे 'अस्तिसिचोऽपृक्ते' इत्यनेन ईडागमे 'इट ईटि' इत्यनेन सिज्लोपे सवर्णदीर्घे 'आर्तीत्' इति सिद्धम् ।

॥ इति भ्वादिप्रकरणम् ॥

अथ अदादिप्रकरणम्

जघास । ६६ । अद्धातोर्लिटि तिपि णलि 'लिट्यन्यतरस्याम्' इति अदो 'घस्लृ' आदेशे अनुबन्धलोपे 'घस् अ' इति स्थिते 'लिटि धातोरनभ्यासस्य' इति द्वित्वे अभ्याससंज्ञायां 'हलादि शेषः' इति अभ्याससकारस्य लोपे 'कुहोश्चुः' इति घस्य झत्वे 'अभ्यासे चर्च' इति चर्त्वेन झस्य जत्वे 'अत उपधायाः' इति वृद्धौ जघास इति, घस्लादेशाभावपक्षे 'आद' इति भवति ।

घस्लादेशाऽभावपक्षे अद्धातोर्लिटि तिपि णलि द्वित्वे अभ्याससंज्ञायां 'हलादिः शेषः' इत्युपधादकारस्य लोपे 'अ अद् अ' इति जाते 'अत आदेः' इत्याकारस्य दीर्घे 'अत उपधायाः' इति वृद्धौ 'आ आद् अ' इति स्थिते सवर्णदीर्घे आद इति सिद्धम् ।

जक्षतुः । ६७ । अद्धातोर्लिटि तस्थाने तसि तस्य अतुसि 'लिट्यन्यतरस्याम्' इति अदो 'घस्लृ' आदेशे अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इति द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायां 'हलादिः शेषः' इत्यनेन अभ्यासकारस्य लोपे 'कुहोश्चुः' इति घस्य झत्वे 'अभ्यासे चर्च' इति झस्य जत्वे 'असंयोगाल्लिट् कित्' इति कित्वे 'गमहनजनखनघसां लोपः क्ङित्यनङि' इति उपधाऽकारस्य लोपे 'खरि च' इति घस्य चर्त्वेन ककारे 'शासिवसिघसीनां च' इति सस्य षत्वे सकारस्य रुत्वे विसर्गे जक्षतुः इति । घस्लादेशाऽभावे तु आदतुः इति सिद्धम् ।

नच 'जघस्' इति स्थितौ 'गमहनजनखनघसाम्' इत्युपधालोपे तस्य 'अचः परस्मिन् पूर्वविधौ' इति स्थानिवत्त्वेन ... Sri Vidyabharathi Book Centre, Sringeri ...स्थान्याऽपत्त्या

जक्षतुरिति न सिद्ध्येदिति वाच्यम्, 'न पदान्तद्विर्वचन०' इति सूत्रेण चर्त्वं प्रति स्थानिवत्त्वनिषेधेन दोषाभावात् ।

आदुः । ४२ । घस्लादेशाभावपक्षे अद्धातोर्लिटि तत्स्थाने झौ 'परस्मैपदाना-मि'ति उसि द्वित्वे अभ्याससंज्ञायां 'हलादिः शेषः' इति दलोपे 'अत आदेः' इत्य-भ्यासाकारस्य दीर्घे 'अत उपधायाः' इति उपधाकारस्य वृद्धौ सवर्णदीर्घे सकारस्य रुत्वे विसर्गे आदुः इति सिद्धम् । पक्षे अदः घस्लादेशे झेरुसि द्वित्वे अभ्यासत्वे हलादिः शेषे श्चुत्वेन घस्य झत्वे चर्त्वेन झस्य जत्वे कित्वे उपधाकारस्य 'गमहने'ति लोपे चर्त्वे 'शासिवसी'ति षत्वे रुत्वे विसर्गे जक्षुः इति सिद्धम् ।

जघसिथ । ६७ । अद्धातोर्लिटि सिपि थलि अनुबन्धलोपे 'लिटयन्यतरस्याम्' इति अदो घस्लादेशे 'लिटि धातोरनभ्यासस्य' इति द्वित्वे अभ्याससंज्ञायां 'हलादिः शेषः' इति लोपे 'कुहोश्चुः' इत्युपधाघकारस्य झत्वे 'अभ्यासे चर्च' इति जत्वे 'जघस् थ' इति स्थिते 'ऋतो भारद्वाजस्य' इति इटि अनुबन्धलोपे 'जघसिथ' इति इति । घस्लादेशाऽभावे 'इडत्यर्तिव्ययतीनाम्' इति नित्यमिटि आदिथ इति सिद्ध्यति ।

आदत् । ६५, ६६ । अद्धातोर्लङि तिपि अनुबन्धलोपे 'अदिप्रभृतिभ्यः शपः' इति शपो लुकि 'इतश्च' इति तिप इकारलोपे 'आडजादीनाम्' इत्यङ्गस्याडागमे अनुबन्धलोपे 'आटश्च' इति वृद्धौ 'अपृक्त एकाल्प्रत्ययः' इति तिपस्तकारस्याऽ-पृक्तसंज्ञायाम् 'अदः सर्वेषाम्' इत्यनेन अपृक्तसंज्ञकस्य तिपस्तकारस्याडागमे अनुबन्ध-लोपे आदत् इति सिद्धम् ।

अघसत् । ६६ । अद्धातोर्लुङि 'लुङ्लङ्'-इत्यडागमे अनुबन्धलोपे तिपि 'लुङ्सनोर्घस्लृ' इति अदः स्थाने 'घस्लृ' इत्यादेशे अनुबन्धलोपे 'च्लि लुङि' इति च्लौ 'पुषादिद्युताद्युलृदितः परस्मैपदेषु' इति च्लेरङि अनुबन्धलोपे 'इतश्च' इति तिपः इकारलोपे अघसत् इति सिद्धम् ।

प्रहण्मि । ६८ । प्रोपसर्गकहन्धातोर्लटि तत्स्थाने मिपि शपि शपो लुकि 'वमोर्वा' इति विकल्पेन णत्वे उक्तं रूपं सिद्धम् । णत्वाभावपक्षे 'प्रहन्मि' इति ।

जघ्नतुः । ७० । हन्धातोर्लिटस्तसि तसोऽतुसि 'लिटि धातोरनभ्यासस्य' इति द्वित्वे अभ्याससंज्ञायां हलादिःशेषे 'कुहोश्चुः' इत्यनेन अभ्यासहकारस्य चुत्वेन

Sri Vidyadhara Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

झकारे 'अभ्यासे चर्च' इति झस्य जकारे 'ज हन् अतुस्' इति स्थिते 'असंयोगाल्लिट् कित्' इति अतुसः कित्त्वात् 'गमहनजनखनघसां लोपः क्ङित्यनङि' इति हन उपधाकारस्य लोपे 'हो हन्तेर्ञ्णिन्नेषु' इति हनो हस्य कुत्वेन घत्वे सस्य रुत्वे विसर्गे तत्सिद्धिः ।

जघनिथ । ६०, ६३ । हन्धातोर्लिटि सिपि सिपः स्थाने 'परस्मैपदानाम्' इति थलि अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इति द्वित्वे अभ्याससंज्ञायां 'हलादिः शेषे' 'कुहोश्चुः' इति चुत्वेन हस्य झत्वे 'अभ्यासे चर्च' इति झस्य जत्वे 'ज हन् थ' इति स्थिते 'लिट् च' इति थलः आर्धधातुकत्वेन भारद्वाजनियमादिड्-विकल्पे 'ज हन् इ थ' इति दशायाम् ञ्णित्प्रत्ययपरत्वाऽभाव न्नकारपरत्वाभावच्च--'हो हन्तेर्ञ्णिन्नेषु' इति सूत्राऽप्राप्त्या 'अभ्यासाच्च' इति हस्य कुत्वेन घत्वे 'जघनिथ' इति । इडभावे 'जघन्थ' इति ।

जहि । ६४, ६६ । हन्धतोर्लोटि तत्स्थाने सिपि अनुबन्धलोपे सार्वधातुक-संज्ञायां शपि 'अदिप्रभृतिभ्यः शपः' इति शपो लुकि 'सेर्ह्यपिच्च' इति सिपः सस्य हौ 'हन् हि इति जाते 'हन्तेर्जः' इति हनः स्थाने जादेशे 'जहि' इति । नच अत्र जादेशे कृते 'अतो हेः' इति अतः परस्य हेर्लुक् कतो नेति वाच्यम्. 'असिद्धवदत्रा-भात्' इत्यनेन जादेस्यासिद्धत्वेन लुगप्राप्तेः ।

वध्यात् । ६६ । 'हन्–धातोराशीर्लिङि आर्धधातुके विवक्षिते तत्प्रवृत्तेः प्रागेव 'हनो वध लिङि' इत्यनेनाऽदन्तवधादेशे 'अतो लोपः' इत्यनेनाल्लोपे लिङः स्थाने तिप्यनुबन्धलोपे 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमेऽनुबन्ध-लोपे 'सुट तिथोः' इत्यनेन सुडागमे च सद्वयस्यापि 'स्को'रिति निवृत्तौ 'वध्यात्' इति सिद्धम् ।

अवधीत् । ६४, ७० । हन्धातोर्लुङि 'लुङि च' इति हनो वधादेशे लुङः स्थाने तिपि 'लुङ्लङ्' इत्यडागमे अनुबन्धलोपे 'इतश्च' इति तिप इकारलोपे 'च्लि लुङि' इति च्लौ 'च्लेः सिच्' इति सिचि अनुबन्धलोपे 'अवध स् त्' इति जाते सिचः सस्यार्धधातुकत्वात् 'आर्धधातुकस्येड्वलादेः' इति इटि 'अतो लोपः' इति वधाकारस्य लोपे 'अवध् इ स् त्' इति स्थिते 'अस्तिसिचोऽपृक्ते' इति अपृक्तकारस्य ईटि 'इट ईटि' इति सलोपे 'सिज्लोप एकादेशे सिद्धो वाच्यः' इति सिज्लोपस्य सिद्धत्वात् सवर्णदीर्घे 'अवधीत्' इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अद्विषु: । ६५ । द्विष्धातोर्लङि अडागमे झौ 'द्विषश्च' इत्यनेन झेर्जुसादेशेऽनुबन्धलोपे शपि शपो लुकि सस्य रुत्वे विसर्गे अद्विषु: इति सिद्धम् ।

दुग्ध: । ६७ । दुह् धातोर्लटि तसि सार्वधातुकसंज्ञायां शपि 'अदिप्रभृतिभ्यः शपः' इति शपो लुकि 'दादेर्धातोर्घः' इति हस्य घत्वे 'झषस्तथोर्धोऽधः' इति तस्य धत्वे 'झलां जश् झशि' इति घस्य जश्त्वेन गत्वे तस: अपित्वेन ङित्वात् 'क्ङिति च' इति गुणनिषेधे सस्य रुत्वे विसर्गे दुग्ध: इति सिद्धम् ।

अधोक् । ६२ । दुह् धातोर्लङस्तिपि अनुबन्धलोपे शपो लुकि अडागमे 'पुगन्तलघूपधस्य च' इति हस्य घत्वे 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इति दस्य धत्वे, घस्य जश्त्वे तस्य चर्त्वेन ककारे 'अधोक् इति सिद्धम् ।

घुक्षीष्ट । ६७ । दुह् धातोराशीलिङि तत्स्थाने तप्रत्ययते 'लिङ्सिचावात्मने-' इति कित्त्वाद् गुणाऽभावे 'लिङ: सीयुट्' इति सीयुटि अनुबन्धलोपे 'लोपो व्योर्वलि' इति वलोपे 'दादेर्धातोर्घ' इति हस्य घत्वे 'एकाचो बसो भष् झषन्तस्य स्ध्वोऽ' इति भष्भावेन दस्य धत्वे घस्य जश्त्वे चर्त्वे 'आदेशप्रत्यययोः' इति सस्य षत्वे 'घुक्षी त' इति जाते 'सुट् तिथोः' इति सुटि अनुबन्धलोपे सस्य षत्वे ष्टुत्वे च कृते घुक्षीष्ट इति सिद्धम् ।

अघुक्षत् । ६७ । दुह् धातोर्लुङि अडागमे अनुबन्धलोपे तिपि च्लौ तस्य सिजादेशं प्रबाध्य 'शल इगुपधादनिट: क्स:' इति क्सादेशे अनुबन्धलोपे 'अदुह् स ति' इति जाते 'इतश्च' इति इकारलोपे 'दादेर्धातोर्घः' इति हस्य घत्वे 'एकाचो बश:–' इति दस्य धत्वे 'अ घु घ् स त्' इति जाते घस्य जश्चर्त्वे चर्त्वे सस्य षत्वे अघुक्षत् इति सिद्धम् ।

अघुक्षाताम् । ६४ । दुह् धातोर्लुङि अडागमे आतामि अनुबन्धलोपे च्लौ तस्य 'शल इगुपधादनिट: क्स:' इति क्सादेशे अनुबन्धलोपे अदुह् स आताम्' इति स्थिते 'अलोन्त्यस्ये'ति सहकारेण 'क्सस्याचि' इत्यनेन सस्याऽकारस्य लोपे 'अदुह् स् आताम्' इति जाते 'दादेर्धातोर्घः' इत्यनेन हस्य घत्वे 'एकाचः' इत्यनेन दस्य भष्भावेन धत्वे 'खरि च' इत्यनेन घस्य चर्त्वे 'अधुक् स् आताम्' इति स्थिते 'आदेशप्रत्यययोः' इत्यनेन सस्य षत्वे क्सस्य कित्त्वाद् गुणाऽभावे 'अघुक्षाताम्' इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

स्फायन्निति । ७० । स्फाय् धातोर्लटि तस्य 'लटः शतृशानचावप्रथमासमानाधिकरणे' इत्यनेन शत्रादेशेऽनुबन्धलोपे उगित्त्वान्नुमि प्रातिपदिकत्वात्सौ 'हल्ङ्याबिना' सुलोपे तकारस्य संयोगान्तलोपे 'स्फायन्नि' ति साधु ।

नच नलोपः कुतो नेति वाच्यम् संयोगान्तलोपस्यासिद्धत्वात् । न चास्य अनुदात्तत्त्वेनात्मनेपदत्वात् शानजादेशे कथं रूपसिद्धिरिति वाच्यम् ? चक्षिङो ङित्करणेन 'अनुदात्तेत्वलक्षणमात्मनेपदमनित्यमि'ति ज्ञापनेनादोषात् । न च ङित्त्वमात्मनेपदार्थमिति वाच्यम्, इकारस्याप्यनुबन्धत्वेन तत एव तस्य सुलभत्वात् । न चेकारस्येदित्वे 'ईदितो नुम् धातोः' इत्यनेन नुमापत्तिरिति वाच्यम्' तत्र 'गोः पदान्ते' इत्यतः 'अन्ते' इत्यनुवर्त्य अन्ते इदिति व्याख्यानेनादोषात् । यदि तु अन्त्येक्त्वव्याघातेन इकारस्य चारितार्थ्यात् भाष्यानुक्तत्वाच्च इकारोच्चारणमुक्तार्थं न ज्ञापकमिति मन्यते तदा स्फायन्निति पृषोदरादित्वकल्पनया यथाकथञ्चित्समाधेयमिति दिक् ।

'चक्षिङ्' इत्यत्र इकारोच्चारणस्य प्रयोजनम्—ननु चक्षिङ् इत्यत्र इकारोच्चारणं व्यर्थम् । न च मुखसुखार्थं तदिति वाच्यम्, अकारोच्चारणेनैव तत्सिद्धेः । नचानुदात्तेत्वप्रयुक्तात्मनेपदार्थं तदिति वाच्यम्, ङित्त्वादेव तत्सिद्धेरिति चेद् ? न, 'अनुदात्तेतश्च हलादेः' इति ल्युडपवादयुच्प्रत्ययार्थत्वात् । ततश्च 'विचक्षणः' इति प्रयोगः सिद्ध्यति । नुम् तु न भवति । यत्र धातौ इकारोऽन्तावयवस्तत्रैव 'इदितो नुम् धातोः' इत्यनेन नुमिति व्याख्यानात् । एवञ्च इकारस्यानुदात्तत्वात् 'अनुदात्तङित' इत्यनेनानुदात्तेत्वनिमित्तके आत्मनेपदे सिद्धे ङकारोपादानं व्यर्थमेव । तदेव व्यर्थं सत् 'अनुदात्तेत्वलक्षणमात्मनेपदमनित्यम्' इति ज्ञापयति । तेन स्फायन्निति प्रयोगे शतृप्रत्ययस्य सिद्धिरिति दिक् ।

अत्र भाष्ये ख्शादिरयामादेशः इयं पङ्क्तिका व्याख्येया । **अयमाशयः**—'चक्षिङः ख्याञ्' इत्यनेन न चक्षिङः ख्याञादेशः किन्तु ख्शाञादेश एव, तेन पुंख्यानमित्यत्र 'पुमः खय्यम्परे' इति न रुत्वम् । असिद्धकाण्डे 'शस्य यो वा' इति स्थितम् इति तस्य णत्वप्रकरणानन्तरमिति शेषः । अत एव शकारेण व्यवधानान्न 'कृत्यचः' इत्यनेन पर्याख्यानमित्यत्र णत्वम् । नापि सुख्येन निर्वृत्तं सौख्यम्, तत्र भवः सौप्रख्यीयः इत्यत्र यत्वासिद्धत्वेन 'धन्वयोपधात्' इति वुञ्, किन्तु छ एवेति दिक् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

चक्शौ, चख्यौ । ६० । ७१ । चक्षिङ्धातोर्लिटि 'चक्षिङः ख्याञ्—वा लिटि' इति चक्षिङः ख्याञादेशे ञित्वात् परस्मैपदे लिटः तिपि णलि अनुबन्धलोपे, अत्र सूत्रे भाष्ये 'क्शादिरयमादेशः' इत्यभिधाय 'ख्याञः शस्य यो वा वक्तव्यः' इत्युक्तम्, तथा च तेन सस्य यत्वभावपक्षे द्वित्वेऽभ्याससंज्ञायां 'शपूर्वाः खयः' इति खयः शेषे अन्यलोपे च कृते 'कुहोश्चुः' इति अभ्यासस्य चुत्वे खस्य चर्त्वे औ णलः' इति औत्वे वृद्धौ 'चक्शौ' इति ।

नच 'चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम्' इति कृतचर्त्वस्य कस्य खः कथं नेति वाच्यम्, चर्त्वस्याऽसिद्धत्वात् । शस्य यत्वपक्षे 'चख्यौ' इति । आत्मनपदे तु 'चख्ये चक्शे' इति रूपे भवतः । ख्याञादेशाभावे तु चचक्षे इति भवति ।

अख्यत् । ६४, ७० । चक्षिङ्धातोर्लुङि अडागमे तिपि अनुबन्धलोपे तिप इकारलोपे च 'चक्षिङः ख्याञ्' इति ख्याञादेशे अनुबन्धलोपे च्लौ 'अस्यतिवक्ति-ख्यातिभ्योऽङ्' इति च्लेरङि 'आतो लोप इटि च' इत्यालोपे 'अख्यत्' इति । आत्मनेपदेतु 'अख्यत' इति ।

अक्शासीत् अक्शास्त ख्याञादेशस्य भाष्ये क्शादित्वं प्रतिपादितं तस्यासिद्ध-काण्डे 'शस्य यो वा' इत्यनेन विकल्पेन यत्वं विहितम्. तथा च यत्वाभावपक्षे परस्मैपदे अडागमे च्लेरङ्विधौ ख्यातीति यकारनिर्देशात् अङ्भावे आदन्तत्वेन 'यमरमनमातां सक् च' इति सकागमे इटि च कृते 'अस्तिसिचोऽपृक्ते' इति ईडागमे 'इट ईटि' इति सलोपे सवर्णदीर्घे 'अक्शासीत्' इति । आत्मनेपदे तु 'अक्शास्त' इति सिद्ध्यति ।

ऐड्ढ्वम् । ६६ । स्तुत्यर्थक-ईड्धातोर्लङि तत्स्थाने आत्मनेपदे ध्वम्प्रत्यये शपि शपो लुकि अडागमं प्रबाध्य 'आडजादीनाम्' इत्यनेन आडागमे 'आटश्च' इत्यनेन वृद्धौ 'ष्टुना ष्टु'रिति ष्टुत्वेन ढकारे 'ऐड्ढ्वम्' इति सिद्धम् ।

नच 'ईडिष्व, इडिध्वम्' इत्यत्र यथा 'एकादेशविकृतमनन्यवत्' इति न्यायेन इड्भवति, तथैवात्रापि 'ईडजनोर्ध्वे च' इत्यनेन कथन्नेद् इति वाच्यम्, अत्र प्रकृति-ग्रहणे तदेकदेशविकृतस्य ग्रहणं भवति, न तु विकृतिग्रहणे तदेकदेशविकृताया अपि प्रकृतेर्ग्रहणमिति । यथा च 'पुरुषमानय' इत्युक्ते हि चक्षुष्मानचक्षुष्मान् वा पुरुष

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

आनीयते, 'अन्धमानय' इत्युक्ते तु चक्षुरहित एवानीयत न तु चक्षुष्मान्। तथा च प्रकृते ध्वम एत्वं कृते ध्वेशब्दः तेन च विकृतेन तत्प्रकृतिभूतस्याग्रहणेनेड् न भवतीति दिक्।

आसाञ्चक्रे। ६७। उपवेशनार्थकाद 'आस्' धातोर्लिटि 'इजादेश्च गुरुमतोऽनृच्छः' इत्यस्येजादित्वाऽभावेनाऽप्राप्तौ 'दयायासश्चे'ति सूत्रेणामि 'आमः' इत्यनेन लिटो लुकि 'कृञ्चाऽनुप्रयुज्यते लिटि' इत्यनेन लिट्परकस्य 'कृ' इत्यस्यानुप्रयोगे 'लिटस्तझयोरेशिरेच्' इत्यनेनेशादेशे ततो द्वित्वादिकार्ये 'आसाञ्चक्रे' इति सिद्धम्।

नमो वाकं प्रशास्महे। ६७। आङ् पूर्वकः शास् धातुरिच्छायां वर्त्तते। 'आशास्त,' 'आशासाते' इत्याद्युदाहरणम्। नचाङ्पूर्वकस्यैवास्य प्रयोगे 'प्रशास्महे' इत्यादिरूपाणामसिद्धिरिति वाच्यम् अत्राङ्पूर्वकत्वस्य प्रायिकत्वात्। धातूनामनेकार्थत्वेन 'प्रशास्महे' इत्यस्य कुर्महे इत्यर्थो बोध्यः।

सुवे। ६६। ६८। प्राणिगर्भविमोचनार्थकङकारेत्संज्ञकात्—सुधातोर्लोटि तत्स्थाने उत्तमपुरुषैकवचने आत्मनेपदे इति अनुबन्धलोपे 'धात्वादेः षः सः' इत्यनेन सत्वे शपि शपो लुकि—'टित आत्मनेपदानां टेरे' इत्यनेन टेरेत्वे 'आडुत्तमस्य पिच्च' इत्यनेन आडागमे तस्य पित्वे 'आटश्च' इत्यनेन वृद्धौ, 'सार्वधातुक'-इति गुणे प्राप्ते 'भूसुवोस्तिङि' इत्यनेन निषेधे। ततश्च उवङादेशे 'सुवै' इति सिद्धम्।

युयात्। युधातोर्विधिलिङि तिपि इकारलोपे यासुटि सुटि च कृते अनुबन्धलोपे 'लिङःसलोपोऽनन्त्यस्य' इति सकारद्वयस्य लोपे युयात् इति सिद्धम्। न च 'उतो वृद्धिर्लुकि हलि' इति वृद्धिः कुतो नेति वाच्यम्, भाष्ये पिच्च ङिन्न ङिच्च पिन्न इति व्याख्यानात्, विशेषविहितेन ङित्वेन पित्वस्य बाधात्।

यूयात्। ६९; ७०। युधातोराशीर्लिङि तिपि 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमेऽनुबन्धलोपे 'सुट तिथोः' इत्यनेन सुडागमेऽनुबन्धलोपे 'स्कोरि'ति सकारद्वयस्य लोपे 'अकृत्सार्वधातुकयोर्दीर्घः' इत्यनेन दीर्घे 'यूयात्' इति सिद्धम्।

ऊर्णुनाव। ६९, ७१। ऊर्णु धातोर्लिटस्तिपि तिपो णलि अनुबन्धलोपे 'ऊर्णु अ' इति स्थिते 'इजादेश्च गुरुमतोऽनृच्छः' इत्यामि प्राप्ते 'ऊर्णोतेराम्नेति वाच्यम्' इति निषेधे 'अजादेर्द्वितीयस्य' इति 'णु' शब्दस्य द्वित्वे प्राप्ते 'न न्द्राः संयोगा-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

दयः' इति रेफस्य द्वित्वाऽभावे णत्वस्याऽसिद्धत्वात् 'नु' शब्दस्य द्वित्वे 'रषाभ्यां नो णः समानपदे' इति प्रथमनकारस्य णत्वे 'ऊणु नु अ' इति जाते गुणं बाधित्वा नित्यत्वाद् 'अचोऽञ्णिति' इति वृद्धौ 'एचोऽयवायावः' इत्यावादेशे ऊर्णुनाव इति सिद्धम् ।

ऊर्णुनविथ । ६४ । ऊर्णु'-धातोर्लिटि तत्स्थाने सिपि तस्य 'परस्मैपदाना-मि'त्यादिना थलादेशेऽनुबन्धलोपे 'आर्धधातुकस्येड्वलादेः' इत्यनेन इटि अजादेर्द्वितीयस्य-'णु' इत्यस्य द्वित्वे प्राप्ते 'न न्द्राः संयोगादयः' इत्यनेन रेफस्य द्वित्वनिषेधे णत्वस्याऽसिद्धत्वात् 'नु'-शब्दस्य द्वित्वेऽभ्याससंज्ञायां णत्वे 'विभाषोर्णोः' इत्यनेन विकल्पेन इटो ङित्वविधानात्तदभावपक्षे गुण ततोऽवादेशे 'ऊर्णुनविथ' इति सिद्धम् । इडादिप्रत्ययस्य ङित्त्वे तु-गुणाभावे उवङि 'ऊर्णुनुविथ' इति रूपम् ।

न च णत्वस्यासिद्धत्वान्नुशब्दस्य कथं द्वित्वम् 'पूर्वत्रासिद्धीयमद्विर्वचने' इति परिभाषयाऽसिद्धत्वनिषेधादिति वाच्यम्, 'उभौ साभ्यासस्य' इत्यारम्भसामर्थ्येन तस्या अनित्यत्वज्ञापनात् । अन्यथा अनितेः इति णत्वे तत्रो द्वित्वे पाणिणत् इति सिद्धौ सूत्रं व्यर्थं स्यात् ।

और्णोः । ६६ । ऊर्णुधातोर्लुङि सिपि अनुबन्धलोपे शपि अदादित्वात्तस्य लुकि अडागमं प्रबाध्य 'आडजादीनाम्' इत्यनेनाडागमे 'आटश्च' इत्यनेन वृद्धौ 'ऊर्णोतेर्विभाषा' इत्यनेन प्राप्तां वैकल्पिकीं वृद्धिमपवाद्य 'गुणोऽपृक्ते' इत्यनेन गुणे सस्य रुत्वे विसर्गे च कृते 'और्णोः' इति सिद्धम् ।

ऊर्णविषीष्ट । ६८, ७० । ऊर्णुधातोराशीर्लिङ्स्तप्रत्यये 'लिङः सीयुट्' इति सीयुटि उदिति 'ऊर्णु सीय् त' इति स्थिते 'लोपो व्योर्वलि' इति यलोपे 'आर्ध-धातुकस्येड्वलादेः' इति इटि 'विभाषोर्णोः' इति इटो ङित्वाऽभावपक्षे गुणे अवादेशे 'सुट् तिथोः' इत्यनेन तस्य सुटि अनुबन्धलोपे षत्वे ष्टुत्वे 'ऊर्णविषीष्ट' इति । इटो ङित्वाद् गुणाऽभावपक्षे उवङि 'ऊर्णुविषीष्ट' इति च सिद्धं भवति ।

और्णावीत् । ६७, ६९ । ऊर्णु धातोर्लुङस्तिपि अनुबन्धलोपे 'आडजादीनाम्' इत्यादि 'आटश्च' इति वृद्धौ च्लेः च्लेः सिचि अनुबन्धलोपे 'इतश्च' इति तिपि इकारलोपे 'आर्धधातुकस्येड्वलादेः' इति सिचः सस्य इटि 'अस्तिसिचोऽपृक्ते' इति अपृक्तसंज्ञकस्य तस्य ईटि अनुबन्धलोपे 'इट ईटि' इति सलोपे 'विभाषोर्णोः'

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

इति इटो ङित्त्वाद् गुणाऽभावे उवङि अनुबन्धलोपे सवर्णदीर्घे 'और्णुवीत्' इति। ङित्त्वाऽभावपक्षे गुणं बाधित्वा 'ऊर्णोतेर्विभाषा' इति विभाषया वृद्धौ आवादेशे 'और्णावीत्' इति। वृद्धयभावपक्षे 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे 'और्णवीत्' इति च सिद्धं भवति।

और्णुविष्ट। ६८। ऊर्णुधातोर्लुङि आत्मनेपदे तप्रत्यये आटि 'आटश्च' इति वृद्धौ च्लौ च्लेः सिचि इटो लोपे 'आर्धधातुकस्येड्वलादेः' इति अनुबन्धलोपे 'विभाषोर्णोः' इति इटो ङित्त्वाद् गुणाऽभावे उवङि अनुबन्धलोपे सिचः सस्य षत्वे ष्टुत्वे 'और्णुविष्ट' इति। ङित्त्वाभावे—गुणे अवादेशे 'और्णविष्ट' इति सिद्धयति।

ऊर्णुञ् धातोर्लुङि रूपाणि। ६४।

परस्मैपदे	आत्मनेपदे—
और्णुवीत् और्णुविष्टाम् और्णुविषुः और्णावीत् और्णाविष्टाम् और्णाविषुः और्णवीत् और्णविष्टाम् और्णविषुः	और्णुविष्ट और्णुविषाताम् और्णुविषत और्णविष्ट और्णविषाताम् और्णविषत
और्णुवीः और्णुविष्टम् और्णुविष्ट और्णावीः और्णाविष्टम् और्णाविष्ट और्णवीः और्णविष्टम् और्णविष्ट	और्णुविष्ठाः और्णुविषाथाम् और्णुविढ्वम् (ध्वम्) और्णविष्ठा और्णविषाथाम् और्णविढ्वम् (ध्वम्)
और्णुविषम् और्णुविष्व और्णुविष्म और्णाविषम् और्णाविष्व और्णाविष्म और्णविषम् और्णविष्व और्णविष्म	और्णुविषि और्णुविष्वहि और्णुविष्महि और्णविषि और्णविष्वहि और्णविष्महि

अस्तावीद्। ६४, ६६। 'ष्टु'-धातोः 'धात्वादेः षः सः' इत्यनेन स[त्वे] निमित्तापाये नैमित्तिकस्याप्यपायः इति परिभाषया ष्टुत्वस्याऽपि निवृत्तौ ततो लुङि तत्स्थाने तिप्यनुबन्धलोपे अडागमे च्लिप्रत्यये तस्य सिजादेशेऽनुबन्धलोपेऽनिट्कत्वादिडभावे प्राप्ते 'स्तुसुधूञ्भ्यः परस्मैपदेषु' इत्यनेन सिचः इडागमे अपृक्तहलश्चेडागमे 'इट ईटि' इति सलोपे सवर्णदीर्घे 'सिचि वृद्धिः परस्मैपदेषु' इत्यनेन वृद्धौ आवादेशे अस्तावीत् इति सिद्धम्। आत्मनेपदे-अस्तोष्टेति रूपम्।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अभ्यष्टौत् । ३९ । अभिपूर्वकात् 'स्तु'–धातोर्लङि तत्स्थाने तिपि अनुबन्धलोपे अडागमे शपि तस्यादादित्वाल्लुकि यणि 'उतो वृद्धिर्लुकि हलि' इत्यनेन वृद्धौ 'प्राक्सितादड्व्यवायेऽपि' इत्यनेन षत्वे ततः ष्टुत्वे 'अभ्यष्टौत्' इति सिद्धम् ।

आत्थ । ६८, ७० । 'ब्रू'-धातोर्लटि तत्स्थाने सिपि 'ब्रुवः पञ्चानामादित आहो ब्रुवः' इत्यनेन विकल्पेन ब्रुव आहादेशे सिपस्थलादेशे च कृते 'आहस्थः' इत्यनेन हस्य थकारे तस्य चर्त्वे 'आत्थ' इति सिद्धम् ।

नच ब्रुवः परस्य हलादेः पित इड् भवतीत्यर्थकेन 'ब्रुव इट्' इत्यनेन थलि स्थानिवद्भावेन पित्वादीट् कथन्नेति वाच्यम्, झलि परे 'आहस्थः' इत्यनेन थत्वविधानेन स्थानिवद्भावाभावात् ।

उवचिथ । ७० । ब्रूधातोर्लिटः सिपि सिपस्थलादेशे थलः आर्धधातुकत्वात् 'ब्रुवो वचिः' इति ब्रुवो वचादेशे 'लिटि धातोरनभ्यासस्य' इति द्वित्वे अभ्याससंज्ञायां 'हलादिः शेषः' इति अभ्यासवकारस्य लोपे 'लिट्यभ्यासस्योभयेषाम्' इत्यभ्यासस्य सम्प्रसारणाच्च' इति पूर्वरूपे थलः आर्धधातुकत्वादिटि प्राप्ते 'एकाच उपदेशेऽनुदात्तात्' इति निषेधे भारद्वाजनियमाद् विभाषया इटि अनुबन्धलोपे 'उवचिथ' इति । इडभावपक्षे 'चोः कुः' इति कुत्वे 'उवक्थ' इति सिद्ध्यति ।

अवोचत्, अवोचत । ९८, ७० । ब्रुवो लुङि अडागमे तिपि अनुबन्धलोपे 'च्लि लुङि' इति च्लौ 'अस्यतिवक्तिख्यातिभ्योऽङ्' इति च्लेरङि अनुबन्धलोपे 'ब्रुवो वचिः' इति वचादेशे 'अ वच् अति' इति स्थिते 'इतश्च' इति तिप इकारलोपे 'वच उम्' इति उमि अनुबन्धलोपे 'अ वच् उ अ त्' इति दशायाम् 'आद्गुणः' इति गुणे 'अवोचत्' इति सिद्धम् । आत्मनेपदे तु 'अवोचत' इति ।

ईयतुः । ६९ । 'इण' धातोर्लिटि तसि तसोऽतुसि 'लिटि धातोरनभ्यासस्य' इति द्वित्वे अभ्यासत्वे 'इ इ अतुस्' इति स्थिते 'इणो यण्' इति यणि 'दीर्घ इणः किति' इत्यभ्यासस्य दीर्घे सकारस्य रुत्वे विसर्गे 'ईयतुः' इति सिद्धम् ।

आयन् । ७० । इण्धातोर्लङि तत्स्थाने झौ झस्यान्तादेशे इणो यण् इत्यनेन इकारस्य यणि तस्याभीयत्वेन असिद्धत्वादाटि 'आटश्चेति' वृद्धौ शपो लुकि 'इतश्च' इतीकारलोपे 'संयोगान्तस्य लोपः' इति तलोपे आयन् सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

निरियात् । ६७ । निरुपसर्गपूर्वकाद् इण्धातोराशीर्लिङि तत्स्थाने तिपि 'इतश्चे'ति इकारलोपे यासुटि सुटि तस्यार्धधातुकत्वे कित्वेन सलोपे 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घे 'एतेर्लिङि' इति ह्रस्वे निरियात् इति ।

अभीयात् । ६४ ७० । अभीत्युपसर्गपूर्वकात् इण्धातोर्लिङस्तिपि इकारलोपे यासुटि तस्यार्धधातुकत्वे कित्वे सुटि सलोपे सवर्णदीर्घे 'अभीयात्' इति । नच अत्र 'अन्तादिवच्च' इत्यनेन पूर्वान्तवद्भावेन पुनः एतेर्लिङि' इति ह्रस्वः कुतो नेति वाच्यम्, 'उभयत आश्रयणे नान्तादिवत्' इति निषेधात् ।

अयम्भावः–एकादेशस्य ईकारस्य पूर्वान्तत्वे तु उपसर्गानुप्रवेशात् इण्धातुत्वं न सम्भवति । परादित्वेन इण्धातुत्वाश्रयणे तु चोपसर्गात् परत्वम्, उपसर्गैकदेशस्य इकारस्य ईकारात्मना सत्वेन 'अभ्' इत्तस्य उपसर्गत्वाभावात् । वस्तुतस्तु इकारस्य दीर्घे एतेर्लिङि इति ह्रस्वत्वे सवर्णदीर्घे रूपसिद्धिः । नच पुनः ह्रस्वः कुतो नेति वाच्यम् लक्ष्ये पुनः लक्षणप्रवृत्तेः । अत्र उभयतः इत्यस्य विषय एव नेति वदन्ति ।

अगात् । ७० । इणधातोर्लुङि 'इणो गा लुङि' इति इणो गादेशे कृते लुङ्स्थाने तिपि अनुबन्धलोपे 'लुङ्लङ्' इत्यडागमे च्लौ तस्य सिचि 'गातिस्थाघपाभूभ्यः सिचः परस्मैपदेषु' इति सिचे 'इतश्च' इति सिचो लुकि इकारलोपे 'अगात्' लुकि इति सिद्धम् ।

अधिजगे । ७० । अधिपूर्वक-'इ' धातोर्लिटि तत्स्थाने तप्रत्यये तस्य एशादेशेऽनुबन्धलोपे 'गाङ् लिटि' इत्यनेन इङो गाङादेशे ततो 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वेऽभ्याससंज्ञायां ह्रस्वे 'कुहोश्चुः' इत्यनेन चुत्वे 'आतो लोप इटि च' इत्यनेन आलोपे 'अधिजगे' इति सिद्धम् ।

नचात्र "द्विर्वचनेऽचि' इत्यनेन गाङादेशनिषेधात् प्रागेव द्वित्वे उत्तरखण्डस्य गादेशे उक्तरूपं न सिद्ध्यतीति वाच्यम्, लावस्थायां लविवक्षिते वा गाङादेशप्रवृत्तौ द्वित्वनिमित्तस्याचोऽभावादुक्तसूत्रप्रवृत्तेरभावात् ।

अध्यायै । ६६, ७१ । इङ् धातोर्लोटि उत्तमपुरुषैकवचने इटि आर्धधातुकसंज्ञायां सपि 'अदिप्रभृतिभ्यः शपः' इति शपो लुकि 'टित आत्मनेपदानां टेरे' इति टेरेत्वे

Sri Vidyatheertha Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

'एत ऐ' इति एकारस्य ऐकारे 'आडुत्तमस्य पिच्च' इत्यादि 'आटश्च' इति वृद्धौ 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे यणि च कृते अध्ययै इति सिद्धम् ।

न च पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेनेत्यभियुक्तोक्त्या अन्तरङ्गत्वात् गुणादेः प्रागेव सवर्णदीर्घे यणि 'अध्ययै' इति न स्यादिति वाच्यम्, 'पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण' इति पक्षस्य 'सुट्कात्पूर्वः' इत्यत्र भाष्ये सिद्धान्तितत्वात् पूर्वं गुणायादेशयोः कृतयोरुपसर्गस्य यण् सिद्ध्यति । 'पूर्वं धातुरुपसर्गेण युज्यते' इति मते तु अन्तरङ्गत्वात्प्राप्तो दीर्घो 'णेरध्ययने वृत्तम्' इति सूत्रे 'अध्ययने' इति निर्देशान्न भवति इति दिक् ।

अध्यैयाताम् । ७० । 'इङ्' धातोर्लङि तत्स्थाने आतामि शपि तस्य लोपे 'धाङ्आदीनाम्' इत्यनेनाडागमं प्रबाध्य 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इति परत्वादियङि ततः आटि 'आटश्चे'ति वृद्धौ यणि 'अध्यैयाताम्' इति सिद्धम् ।

अधीयीत । ६० । अधिपूर्वकाद् इङो लिङस्तप्रत्यये शपो लुकि सीयुटि 'सुट् तिथोः' इति सुटि अनुबन्धलोपे सलोपे यलोपे च कृते इयङि सवर्णदीर्घे अधीयीत सिद्धम् ।

अध्यगीष्ट, अध्यैष्ट । ६९ । अधिपूर्वकादिङ्धातोर्लुङि तप्रत्यये 'विभाषा लुङ्लृङोः' इति इङो गाङादेशे 'लुङ्लङ्' इत्यडागमे अनुबन्धलोपे 'अधि अ गा त' इति स्थिते च्ली च्लेः सिचि इति गते 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' इति सिचो ङित्वे ष्टुत्वे 'अध्यगीष्ट' इति । गाङोऽभावे आटि वृद्धौ च्लौ सिचि षत्वे ष्टुत्वे 'अध्यैष्ट' इति सिद्ध्यति ।

अधियन्ति । ६६ । 'अधि' इत्युपसर्गाधिकस्मरणे धातोर्लटि तत्स्थाने झौ तस्य अन्तादेशे शपो लुकि 'इण्वदिक इति वक्तव्यम्' इति वार्तिकनिर्देशेन 'इणो यण्' इति यणि 'अधियन्ति' इति । केचित्तु 'आर्धधातुके' इत्यधिकारे 'इणो गा लुङि' इति सूत्रे 'इण्वदिकः—' इति वार्तिकपाठस्य भाष्ये दर्शनात् तदधिकारोक्तकार्यमेव आर्धधातुकाधिकारपठितत्वोरस्य- अर्हत्वानुपस्थितत्वाद् अत्र 'इणो यण्' इत्यस्य आर्धधातुकाधिकारपठितत्वाभावात् यण् न इति वदन्ति । तन्मते झस्य अन्तादेशे इयङि सवर्णदीर्घे 'अधीयन्ति' इति । एतदेव भट्टिकाव्ये 'समीतको रावणयोरधीयन्ति' इति संगच्छते ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अभ्यगात् । ६५ । 'इक' धातोर्लुङि' तत्स्थाने तिपि अनुबन्धलोपे अडागमे 'इण्वदिकः' इत्यतिदेशेन 'इणो गा लुङि' इत्यनेन गादेशे च्लिप्रत्यये तस्य सिजादेशेऽनुबन्धलोपे 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इत्यनेन सिचो लुकि यणि 'अभ्यगात्' इति सिद्धम् ।

सतीतयो राघवयोरधीयन्निति । ६६ । अधिपूर्वकात् स्मरणार्थकेग्धातोर्लटः कर्तरि अनुबन्धलोपे शपि तस्य लुकि धात्विकारस्य इयङि अनुबन्धलोपे सवर्णदीर्घे शत्रन्तादधीयच्छब्दात् प्रातिपदिकत्वेन स्वाद्युत्पत्तौ नुमादिके कृते 'अधीयन्नि'ति सिद्धम् ।

नचात्र सवर्णदीर्घात्प्राक् 'पूर्वं धातुः साधनेन युज्यते' इति नियमाच्छत्रादेशान्तरम् 'इण्वदिकः' इत्यतिदेशेन 'इणो यणि'ति यणादेशे उक्तरूपं न सिद्ध्येदिति वाच्यम्, 'आर्धधातुके' इत्यधिकारसूत्रभाष्ये 'इणो गा लुङि' इति सूत्रे 'इण्वदिक इति वक्तव्यम्' इति वार्त्तिकपाठात्तदधिकारोक्तानामेव कार्याणामुपस्थित्वेन 'इणो यण्' इत्यस्यार्धधातुकाधिकारस्थत्वाभावादतिदेशाभावेन यणाद्यप्रवृत्तौ इयङ्दीर्घादिके सति उक्तरूपं सिद्ध्यत्येवेति दिक् ।

अयुः, अयान् । ६३ । याधातोर्लङि तत्स्थाने झौ सार्वधातुकसंज्ञायां शपि 'अदिप्रभृतिभ्यः शपः' इति शपो लुकि 'लुङ्लङ्' इत्यडागमे अनुबन्धलोपे 'अ या झि' इति स्थिते 'लङः शाकटायनस्यैव' इति झेर्जुसि अनुबन्धलोपे 'उस्यपदान्तात्' इति पररूपे सस्य रुत्वे विसर्गे 'अयुः' इति सिद्धम् । जुसोऽभावे झस्यान्तादेशे इकारलोपे तलोपे च कृते सवर्णदीर्घे 'अयान्' इति सिद्धम् ।

दायास्ताम् । ६७, ७० । दाधातोराशीर्लिङि तत्स्थाने तसि तस्य 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन तमादेशे यासुडागमे अनुबन्धलोपे सुडागमे 'लिङाशिषि' इत्यनेनार्धधातुकत्वात् 'स्कोरि'ति सलोपे 'दाधाघ्वदाप्' इत्यत्रादाबिति पर्युदासेन घुत्वाभावे 'एर्लिङि' इत्यनेन एत्वाभावे 'दायास्ताम्' इति सिद्धम् ।

अयं सार्वधातुकमात्रविषयः । ६६ ; ६८ । अस्य ख्याधातोः सार्वधातुक एव प्रयोगो न त्वार्धधातुक इत्यर्थः । अत्र च 'सस्थानत्वं नमः ख्यात्रे' इति वार्तिकं, ननमभ्याहृत्य नमः ख्यात्रे इत्यत्र सस्थानत्वं जिह्वामूलीयत्वं न भवतीति व्याख्यानं भाष्यञ्च प्रमाणम् । अत्र हि चक्षिङः ख्याञादेशे शस्य यकारे शकारस्यान्तिक

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

षत्वस्यासिद्धत्वात् 'शर्परे विसर्जनीयः' इति विसर्जनीयः जिह्वामूलीयस्त्विष्टो न भवतीति भाष्यवार्त्तिकयोराशयः। अस्य ख्याधातोरार्धधातुकेऽपि प्रयोगसत्त्वे तु तृजन्ते ख्यातृशब्दे यकारस्य शकारस्थानिकत्वाभावात् असिद्धत्वाभावात् 'शर्परे विसर्जनीयः' इत्यस्याप्रवृत्तौ 'कुप्वोः' इति जिह्वामूलीयो दुर्वारः स्यात्। ततः सार्व-धातुके एव ख्याधातोः प्रयोगः इति विज्ञायते। ज्ञापकस्य सामान्यापेक्षत्वादिति दिक्।

वच परिभाषणे। अत्र भाषणे इत्येव उचितम्। तथैव क्रियाकलापे दशवल-कारियाम् व्यवहारात्। कारके स्वयमेव अभियुक्ते, भाषते, वक्तीत्यादि पर्यायतया प्रयोगात्। मूलोक्तं तु न युक्तम्। 'यः सनिन्द उपालम्भस्तत्र स्यात् परिभाषणम्' इति वचनात् वचधातोः सनिन्दोपालम्भाभावात्। परीतिविशेषणम् अनुचितम्।

विदाञ्चकार। ७०। विद्धातोर्लिटि 'उषविदजागृभ्योऽन्यतरस्याम्' इत्यामि विद् आम् लिट्' इति स्थिते आमः आर्धधातुकत्वेऽपि विदेरदन्तत्वप्रतिज्ञानात् लघूपधगुणाभावे 'आमः' इति लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इति लिट्परक-कृञोऽनुप्रयोगे 'विदाम् कृ लिट्' इति स्थिते लिटः स्थाने तिपि तिपो णलि अनु-बन्धलोपे 'लिटि धातोरनभ्यासस्य' इति द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्याससंज्ञायाम् 'उरत्' इत्यभ्यासऋवर्णस्य अत्वे रपरत्वे 'हलादिः शेषः' इति अभ्यासरेफस्य लोपे 'विदाम् क कृ अ' इति जाते 'कुहोश्चुः' इति अभ्यासककारस्य चुत्वेन चकारे 'विदाम् च कृ अ' इति स्थिते 'अचो ञ्णिति' इति वृद्धौ रपरत्वे आमो मकारस्य पदान्तत्वेन अनुस्वारे परसवर्णे च कृते विदाञ्चकार इति सिद्धम्। आमोऽभावपक्षे 'विवेद' इति। विद्धातोर्लिटि तिपि णलि 'लिटि धातोरि'ति द्वित्वे अभ्याससंज्ञायां हलादिः शेषे 'लिट् च' इति णलोऽकारस्य आर्धधातुकत्वात् 'पुगन्तलघूपधस्य च' इति गुणे विवेद इति सिद्धम्।

विदांकुर्वन्त्वित्यन्यतरस्याम्। ६३,७२। वेत्तेर्लोट्याम्, गुणाभावः, लोटो लुक्, लोडन्तकरोत्यनुप्रयोगश्च वा निपात्यते। अत्र इति शब्दः प्रकारे वर्तते तेन कुर्वन्त्वि-त्यनेन प्रथमपुरुषो बहुवचनश्च न विवक्षितम्। एवञ्च लोडन्तसामान्यस्यानुप्रयोगो-ऽनेन विधीयते। तथा च विदाङ्करोतु, विदाङ्कुरुतादित्यादीनि [illegible] सकलरूपाणि

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

उदाहरणानि । वेत्तेर्निपातनादेतद्भिन्नविद्यतिप्रभृतीनां लोडन्तकरोत्यनुप्रयोगो न भवतीति प्रत्युदाहरणानि ।

तनादिकृञ्भ्य उः । ३३ । तनादेः कृञश्च उ प्रत्ययः स्यात् इत्यर्थः । नच कृ धातोः तनादित्वादेव उप्रत्यये सिद्धे सूत्रे कृञ् ग्रहणं व्यर्थमिति वाच्यम्, तद् व्यर्थं सद् गणकार्यमनित्यमिति परिभाषां ज्ञापयति, तेन न विश्वसेद् अविश्वस्तम् इति सिद्धयति । तेन श्वस् धातोः लिङि तिपि शपि यासुटि सुटि सकारद्वयस्य लोपे यासः इयादेशे गुणे उपसर्गस्य वि इत्यस्य योगे विश्वसेत् इति सिद्धयति । यदि गणकार्यस्यानित्यत्वं न स्यात् तर्हि शपो लुकि इयादेशाभावे रूपं न सिद्धयेद् ।

न विश्वसेदविश्वस्तमिति । ६४ । ननु प्राणनार्थक श्वस् धातोर्विधिलिङि श्वस्यादिति स्थिते शपि अदादिकत्वेन शपो लुक्त्वे तु अदन्तत्वाभावेन 'अतो येयः' इत्यस्य प्रवृत्तिः स्यात् । एवञ्च 'न विश्वसेदविश्वस्तम्' इत्यत्र विश्वसेदिति रूपं न सिद्धयेत् इति चेन्न, गणकार्यस्यानित्यत्वादत्र शपो लुगभावेन रूपसिद्धेः ।

ननु अत्र किं मानमिति वाच्यम्. 'तनादिकृञ्भ्य उः' इत्यस्य तनादेः कृञश्च उप्रत्ययो भवति इत्यर्थः । तत्र तनादित्वादेव कृञोऽपि उप्रत्यये सिद्धे कृञ् ग्रहणेन गणकार्यस्यानित्यत्वावगमात् । यदि कृञ्ग्रहणं भाष्ये प्रत्याख्यातमिति विभाव्यते तदा अस गति दीप्त्यादानेषु इति धातोः विधिलिङि रूपम् असेत् इति विशु इति । नानार्थकाव्ययप्रयोगे यणि यथाकथंचित् साधनीयम् ।

विदाङ्कुरोतु । ७२ । विदधातोर्लोटि 'विदाङ्कुर्वन्त्वित्यन्यतरस्याम्' इति वार्तिके गुणाऽभावे लोटो लुकि लोट्परककृञोऽनुप्रयोगे च निपातिते 'विदाम् कृ लोट्' इति स्थिते लोटः स्थाने तिपि अनुबन्धलोपे तिपः सार्वधातुकत्वात् शपि प्राप्ते तमपबाध्य 'तनादिकृञ्भ्य उः' इत्युत्वे 'विद न् कृ उ ति' इति जाते 'आर्धधातुकं शेषः' इत्युकारस्यार्धधातुकत्वे 'सार्वधातुकार्धधातुकयोः' इति गुणे रपरत्वे च विहिते 'विदाम् कर् उ ति' इति स्थिते पुनः उकारस्य गुणे 'एरुः' इति तिप इकारस्य उत्वे मस्यानुस्वारे परसवर्णे 'विदाङ्करोतु' इति सिद्धम् । पक्षे तातङि 'अत उत्सार्वधातुके इति ककाराकारस्य उत्वे मस्यानुस्वारे परसवर्णे च कृते 'विदङ्कुरुतात्' इति । [illegible] इति । विकल्पपक्षे 'वेत्तु' इति रूपाणि भवन्ति ।

Sri Vidyabharathi Book Centre, Sringeri

 CC-O. In Public Domain. Digitized by eGangotri

विदाङ्कुर्वन्तु । ६२ । विद्धातोर्लोटि 'विदाङ्कुर्वन्त्वित्यन्यतरस्याम्' इत्यामि गुणाभावे लोटो लुकि लोडन्तकृञोऽनुप्रयोगे च निपातिते 'विद् आम् कृ लोट्' इति स्थिते लोटः स्थाने झौ 'विदाम् कृ झि' इति जाते सार्वधातुकसंज्ञायां शपि प्राप्ते तम्प्रबाध्य 'तनादिकृञ्भ्य उः' इत्युप्रत्यये 'विदाम् कृ उ झि' इति दशायामुप्रत्ययस्यार्धधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति गुणे रपरत्वे च कृते 'विदाम् कर् उ झि' इति जाते 'झोऽन्तः' इत्यनेन झस्यान्तादेशे 'अत उत्सार्वधातुके' इति ककारोत्तराकारस्य उत्वे मस्यानुस्वारे परसवर्णे 'एरुः' इत्युत्वे 'इको यणचि' इति यणि विदाङ्कुर्वन्तु इति । 'विदाङ्कुर्वन्त्वित्यन्यतरस्याम्' इति विकल्पपक्षे विदन्तु इति च सिद्ध्यति ।

विदाङ्कुरु । ७१ । विद्धातोर्लोटि 'विदाङ्कुर्वन्त्वित्यन्यतरस्याम्' इति आमि गुणाऽभावे लोटो लुकि लोडन्तकृञोऽनुप्रयोगे च निपातिते 'विद् आम् कृ लोट्' इति स्थिते लोटः स्थाने सिपि सिपः सार्वधातुकत्वात् शपि प्राप्ते तम्प्रबाध्य 'तनादिकृञ्भ्यः उः' इत्युप्रत्यये उप्रत्ययस्य अर्धधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति गुणे रपरत्वे च कृते 'सेह्यपिच्च' इति सिपः स्थाने हौ 'उतश्च प्रत्ययादसंयोगपूर्वात्' इति हेर्लुकि उक्तं रूपं सिद्धम् ।

स्तः । ६६ । असधातोर्लटः तसि सार्वधातुकसंज्ञायां शपि 'अदिप्रभृतिभ्यः शपः' इति शपो लुकि 'श्नसोरल्लोपः' इति अस्तेरकारस्य लोपे सस्य रुत्वे विसर्गे 'स्तः' इति साधु ।

एधि, स्तात् । ५३ । असधातोर्लोटि सिपि 'सेह्यपिच्च' इति सिपः स्थाने हिरादेशे 'अस् हि' इति जाते 'ध्वसोरेद्धावभ्यासलोपश्च' इति सस्य एत्वे एत्वस्याऽसिद्धत्वात् 'हुझल्भ्यो हेर्धिः' इति हेर्धौ 'श्नसोरल्लोपः' इत्यल्लोपे एधि इति सिद्धम् । तातङ्पक्षे परेण तातङा बाधः हेत्वाऽभावे स्तात् इति च रूपं सिद्धम् ।

आसीत्—६६ असधातोर्लङस्तिपि 'इतश्च' इति इकारलोपे 'आडजादीनाम्' इत्यादि 'आटश्च' इति वृद्धौ शपो लुकि 'अस्तिसिचोऽपृक्ते' इति अपृक्तसंज्ञकस्य तकारस्य ईडागमे आसीत् इति सिद्धम् ।

आस्ताम्—। ६७ । अस—धातोर्लङि तस्स्थाने तसप्रत्यये तस्य 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन तामादेशे, अजादित्वात् 'आडजादीनाम्' इत्यनेन

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

आडागमात्प्राक् परत्वात् ङिति परे 'श्नसोरल्लोपः' इत्यनेनाल्लोपे तस्य चाभीयत्वेनासिद्धत्वादाडगमे वृद्धौ 'आस्ताम्' इति सिद्धम् । नच आडागमे कृते अल्लोपः कथंनेति वाच्यम्, अत इति तपरकरणात् ।

अभूत् । ६६ । अस्धातोर्लुङि 'लुङ्लङ्'—इत्यडागमे तिपि अनुबन्धलोपे 'तश्चे'तीकारलोपे 'अस्तेर्भूः' इत्यनेन अस्धातोर्भूभावे च्लौ तस्य सिचि 'गातिस्थे'ति सिचो लुक् 'अभूत्' इति । अत्र 'अस्तिसिचोऽपृक्ते' इत्यनेन ईट तु न, भूभावे अस्तेरविद्यमानत्वात् ।

उपसर्गप्रादुर्भ्यामस्तिर्यच्परः । ६१ । उपसर्गः प्रादुस् अनयोर्द्वन्द्वः । इण्कोरित्यधिकृतम् । तच्च 'इण्' इत्युपसर्गेण सम्बध्यते न प्रादुसि ततः परस्य अस्तेः सस्य इणः परत्वाऽसम्भवात्, कोरित्यपि न सम्बध्यते असम्भवात् । अस्तिरिति षष्ठ्यर्थे प्रथमा । 'सहेः साडः सः' इत्यतः 'स' इति षष्ठ्यन्तमनुवर्तते । 'अपदान्तस्य मूर्धन्यः' इत्यतः मूर्धन्यः इत्यधिक्रियते, य-अच्-अनयोर्द्वन्द्वः यचौ परौ यस्मादिति विग्रहः, यकारे अचि च परे इति लभ्यते, तथा च-उपसर्गेण प्रादुश्च परस्याऽस्तेः सस्य षः स्याद्यकारेऽचि च, परे इत्यर्थं यपरकत्वे उदाहरणं यथा—निष्यात् प्रादुःष्यात् । अच्परकत्वे यथा—निषन्ति, प्रादुःष्यन्ति ।

निष्यात्—६४ 'नि' उपसर्गात् 'अस्' धातोराशीर्लिङि तिपि अनुबन्धलोपे यासुटि सुटि अनुबन्धलोपे 'नि अस् यास् स् ति' इति स्थिते यासुटः कित्त्वेन तस्मिन् परे 'श्नसोरल्लोपः' इत्यल्लोपे 'उपसर्गप्रादुर्भ्यामस्तिर्यच्परः' इति धातोः सस्य षत्वे 'इतश्च' इति तिप इकारलोपे 'स्कोः संयोगाद्योरन्ते च' इति सकारस्य लोपे निष्यात् इति सिद्धम् ।

मृड्ढि । ४६ । मृजधातोर्लोटि सिपि सेर्ह्यादेशे हेरपित्त्वेन ङित्त्वात् 'मृजेर्वृद्धिः' इति वृद्धिनिषेधे 'व्रश्चभ्रस्ज—' इति जस्य षत्वे 'हुझल्भ्योरि'ति हेर्ध्यादेशे षस्य जश्त्वेन डत्वे धस्य ष्टुत्वेन ढत्वे मृड्ढि इति सिद्धम् ।

रुदिहि । ४६ । 'रुद्'—धातोर्लोटि तत्स्थाने सिपि तस्य ह्यादेशे शपि तस्यादादित्वाल्लुकि 'रुद् हि' इत्यवस्थायां 'हुझल्भ्यो हेर्धिः' इत्यनेन हेर्धित्वं प्रबाध्य 'रुदादिभ्यः सार्वधातुके' इत्यनेन परत्वादिडागमे झलपरत्वाऽभावेन धित्वाऽभावे 'रुदिहि' इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अरोदत् । ६१ । 'रुद्' धातोर्लङि अडागम लस्य स्थाने तेप्यनुबन्धलोपे शपि तस्य लुकि लघूपधगुणे 'अड्गार्ग्यगालवयोः' इत्यनेन अपृक्तस्य हलः अडागमे 'अरोदत्' इति सिद्धम् । अडागमे सित्त्वाघ्यधानेन रुदादेः परत्वाभावात् 'अस्ति-सिचः' इत्यनेन ईटि 'अरोदीत्' इति सिद्धयति ।

रुद्यात् । ६६ । रुद्-धातोराशीर्लिङि तत्स्थाने तिप्यनुबन्धलोपे 'यासुट् परस्मै-पदेषूदात्तो ङिच्च' इत्यनेन प्राप्तं यासुटं परत्वाद् बाधित्वा 'अड्गार्ग्यगालवयोः' इत्यनेनाट् 'रुदश्च पञ्चभ्यः' इत्यनेनेटि च प्राप्ते प्रकृतिप्रत्ययविशेषापेक्षाभ्यामडीड्-भ्यामन्तरङ्गत्वाद्यासुडागमे एव कृते सुडागमे सद्वयस्यापि 'स्को' रिति निवृत्तौ यासुटः 'किदाशिषि' इत्यनेन कित्त्वात् लघूपधगुणनिषेधे रुद्यात् इति सिद्धम् ।

अरुदत् । ६३ । 'रुद्' धातोर्लुङि अडागमे तिपि अनुबन्धः इतश्चे'तीकार-लोपे च्लौ 'इरितो वा', इति च्लेश्चङि 'अरुदत्' इति । अङभावे सिचि इटि, ईटि सलोपे सवर्णदीर्घे 'अरोदीत्' इति सिद्धयति ।

सुषुपतुः । ५० । ष्वप् धातोर्लिटि तसि अतुसि 'धात्वादेः षः सः' इति सत्वे 'वचिस्वपि—' इति सम्प्रसारणे पूर्वरूपे 'लिटयभ्यासस्योभयेषाम्' हलादिः शेष सस्य षत्वे विसर्गे उक्तं रूपं सिद्धम् ।

सुषुषुपतु । ७३ । सूपसर्गक-'स्वप'-धातोः 'धात्वादेः षः सः' इत्यनेन सत्वे लिटि तत्स्थाने तसि तस्यातुसादेशे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे प्राप्ते 'असंयोगाल्लिट् कित्' इत्यनेनातुसःकित्त्वात् 'वचिस्वपियजादीनां किति' इत्यनेन सम्प्रसारणे च प्राप्ते लक्ष्यानुरोधात्परत्वाच्च 'पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेने'ति पक्षमवलम्ब्य सम्प्रसारणे पूर्वरूपे कृते 'सुविनिर्दुर्भ्यः सुपि-सूतिसमाः' इत्यनेन षत्वे 'सुप्' इत्यस्य पुनः प्रसङ्गविज्ञानाद् द्वित्वेऽभ्याससंज्ञायां हलादि: शेषे सस्य षत्वे विसर्गे च कृते 'सुपुषुपतुः' इति सिद्धयति ।

नच षत्वस्याऽसिद्धत्वात्कथमिह कृतषत्वस्य द्वित्वमिति वाच्यम्, 'पूर्वत्रासिद्ध-मद्विर्वचने' इति परिभाषया द्वित्वे कर्तव्ये षत्वासिद्धत्वाभावात् ।

सुषुष्वाप । ६६ । सूपसर्गक—स्वप्—धातोर्लिटि तत्स्थाने तिपि तस्य 'परस्मै-पदाना' मित्यादिना णलादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वेऽ-भ्याससंज्ञायाम् 'लिटयभ्यासस्योभयेषाम्' इत्यनेनाभ्यासस्य सम्प्रसारणे पूर्वरूपे 'सु

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सुप् स्वप् अ' इत्यवस्थायां 'सुविनिर्दुर्भ्यः सुपिसूतिसमाः' इति प्राप्तस्य षत्वस्याऽसिद्धत्वान्नित्यत्वाच्च पूर्वं हलादिः शेषे ततः सुपिरूपाभावात्षत्वाऽभावे 'आदेशप्रत्यययोः' इत्यनेन स्वपः सस्य षत्वे उपधावृद्धौ 'सुषुष्वाप' इति सिद्धम् ।

प्राणिति । ६६ । प्रोपसर्गक—'अन्'–धातोर्लटि तुस्थाने तिपि अनुबन्धलोपे शपि तस्य लुकि 'रुदादिभ्यः सार्वधातुके' इत्यनेन सार्वधातुकेऽपि वलादाविटि, भिन्नपदस्थत्वेन समानपदाभावात् पूर्वेण णत्वाप्राप्तौ 'अनितेः' इत्यनेन णत्वे सवर्णदीर्घे प्राणिति इति सिद्धम् ।

जक्षति--६० जक्षधातोर्लटि झौ शपि तस्य लुकि 'जक्षित्यादयः षट्' इत्यभ्यस्तसंज्ञायाम् 'अदभ्यस्तात्' इति झस्य अन्तादेशं प्रबाध्य अदादेशे 'जक्षति' इति सिद्धम् ।

जाग्रोऽविचिण्णल्ङित्सु—६८ जाग्रः इति षष्ठी । 'अविचिण्णल्ङित्सु' इति च्छेदः । वि चिण् णल् ङित् एषां द्वन्द्वे नञ्समासः । जाग्रतेर्गुणः स्याद् विचिण्णल्ङिद्भ्योऽन्यस्मिन् वृद्धिविषये प्रतिषेधविषये च इति सूत्रार्थः । प्रत्युदाहरणं यथा; वि—जागृविः । चिण्—अजागारि । णल्—जजागार । ङित्—जागृतः इति ।

जजागरुः । ६९ । जागृधातोर्लिटि झौ 'परस्मैपदानाम्—' इति झेरुसादेशे 'उषविदजागृभ्योऽन्यतरस्याम्' इत्यामोऽभावपक्षे 'लिटि धातोः—' इति द्वित्वे अभ्यासत्वे हलादिः शेषे 'जजागृ उस्' इति स्थिते कित्वाद् गुणनिषेधे प्राप्ते 'जाग्रोऽविचिण्णल्ङित्सु' इत्यनेन गुणे रपरत्वे सस्य रुत्वे विसर्गे 'जजागरुः' इति सिद्धम् ।

अजागः । ६८ । जागृधातोर्लङि अडागमे अनुबन्धलोपे तिपि 'इतश्च' तीकारलोपे सार्वधातुकसंज्ञाया शपि शपो लुकि 'जाग्रोऽविचिण्णल्ङित्सु' इति गुणे रपरत्वे हल्ङ्यादिना तलोपे रुत्वे विसर्गे 'अजागः' इति सिद्धम् ।

अजागरुः । ६५ । 'जागृ' धातोर्लङि अडागमे तत्स्थाने झिप्रत्यय 'जक्षित्यादयः षट्' इत्यनेनाभ्यस्तसंज्ञायाम् 'अदभ्यस्तात्' इत्यनेन झस्यादादेशे प्राप्ते-'सिजभ्यस्तविदिभ्यश्च' इत्यनेन झेर्जुसादेशेऽनुबन्धलोपे शपो लुकि 'सार्वधातुकमपित्' इत्यनेन ङित्वात् 'जाग्रोऽविचिण्णल्ङित्सु' इति सूत्रेण अविचिण्णल्ङित्विति

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri
पर्युदासाद् गुणस्याप्राप्तौ 'जुसि च' इत्यनेन गुणे रपरत्वे सस्य रुत्वे विसर्गे च कृते 'अजागरुः' इति सिद्धम् ।

अजागरीत् । ७१ । जागृधातोर्लुङिः अडागमे तिपि अनुबन्धलोपे 'इतश्च' इति तिप इकारलोपे च्लौ तस्य सिजादेशे इत्त्वावितौ 'आर्धधातुकस्येड् वलादेः' इति सस्य इटि यणि प्राप्ते तं प्रबाध्य 'सार्वधातुकार्धधातुकयोः' इति गुणे प्राप्ते तञ्च बाधित्वा 'सिचि वृद्धिः—' इति वृद्धिः प्राप्ता तामपि प्रबाध्य 'जाग्रोऽविचिण्णल्ङित्सु' इति गुणे रपरत्वे च कृते 'अजागर् इ स् त्' इति स्थिते हलन्तलक्षणायाः वृद्धे 'नेटि' इति निषेधे ततः 'अतो हलादेर्लघोः' इति वृद्धिः प्राप्ता ताञ्च बाधित्वा 'अतो ल्रान्तस्य' इत्यनेन प्राप्ताया वृद्धेः 'ह्म्यन्त—' इति निषेधे 'अस्तिसिचोऽपृक्ते' इत्यनेन ईडागमे 'इट ईटि' इति सलोपे सवर्णदीर्घे अजागरीत् इति । तदाह मूले—

गुणो वृद्धिर्गुणो वृद्धिः प्रतिषेधो विकल्पनम् ।
पुनर्वृद्धिर्निषेधोऽतो यण्पूर्वाः प्राप्तयो नव ॥ ६३ ६८ ।

दरिद्राञ्चकार । ६६ । दुर्गत्यर्थक–'दरिद्रा' धातोर्लिटि 'कास्प्रत्ययादाममन्त्रे लिटि' इति सूत्रस्थेन 'कास्यनेकाच आम्वक्तव्यः' इत्यनेनामि सवर्णदीर्घे 'आमः' इति लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इत्यनेन लिट्परक–कृ'–इत्यस्यानुप्रयोगे लिटः स्थाने तिपि 'परस्मैपदाना'मित्यादिना णलादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वेऽभ्यासादिकार्ये 'दरिद्राञ्चकार' इति सिद्धम् ।

केचित्तु—'आत औ णलः' इत्यत्र 'औ' इत्येव सिद्धे औकारविधानं दरिद्रातेरालोपे कृते श्रवणार्थम् अत एव ज्ञापकादामेनेति मते 'ददरिद्रौ' इति रूपमिति वदन्ति । अन्ये तु णलि 'ददरिद्र' इत्याहुः–तत् 'कास्प्रत्ययादाममन्त्रे लिटि' 'कस्येकाजाद्घसाम्' इति सूत्रस्य भाष्यकैयटविरोधान्निर्मूलमेव ।

ददरिद्रौ । ६७ । दुर्गत्यर्थक 'दरिद्रा' धातोर्लिटि तत्स्थाने तिपि तस्य 'परस्मैपदाना' मित्यादिना णलादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वेऽभ्यासंज्ञायां हलादिः शेषे 'आत औ णलः' इत्यनेन णल आकारे वृद्धौ सत्यां 'ददरिद्रौ' इति सिद्धम् ।

न चात्र औकारस्यैव विधाने वृद्धौ सत्यामुक्तरूपस्य सिद्धिः स्यादेवेति औकार विधानं व्यर्थमिति वाच्यम्, तथा सति 'आतो लोप इटि च' इत्यनेनाल्लोपे

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सति औकारस्याश्रवणापत्तेः। नचात्रानेकाच्त्वेनाम् कुतो नेति वाच्यम्. आमि सति णल एवाप्रसक्त्याऽस्माद्धातोरेव परस्योकारश्रवणार्थौकारविधानस्य वैयर्थ्यापत्तेः। यच्च ददरिदेति रूपं तद्दस्येकाजाद्धसामिति सूत्रस्थभाष्यकैयटविरोधान्निर्मूलमेति दिक्।

अचकाः। ६८। 'चकासृ' धातोर्लङि अडागमे तिपि अनुबन्धलोपे 'इतश्च' इति तिर इकारलोपे 'हल्ङ्यादि'ना तलोपे 'सिपि धातोरुर्वा' इति रुत्वाभावपक्षे 'तिप्यनस्तेः' इति सस्य दत्वे 'वाऽवसाने' इति चर्त्वे अचकात्' इति। रुत्वपक्षे अचकाः इति सिद्ध्यति।

शाधि। ७१। शास् धातोर्लोटि तत्स्थाने सिपि अनुबन्धलोपे तस्य 'सेर्ह्यपिच्च' इत्यनेन ह्यादेशे शपि तस्य 'अदिप्रभृतिभ्यः शपः' इत्यनेन लुकि, 'शास इदङ्हलोः' इत्यनेन प्राप्तं इत्वमपवाद्य 'शा हौ' इत्यनेन शादेशे, तस्य आभीयत्वेन 'असिद्धवदत्राभात्' इत्यनेनासिद्धत्वात् 'हुझल्भ्यो हेर्धिः' इति हेर्धिरित्यादेशे 'शाधि' इति सिद्धम्। नच शासः शादेशाभावेऽपि हेर्धित्वात् 'धि च' इत्यनेन सलोपे रूपं सिद्ध्यत्येवेति 'शा हौ' इति सूत्रं व्यर्थमिति वाच्यम्, तथा सति सलोपस्यासिद्धत्वात् 'शास इदङ् हलोः' इतीत्वं प्रसज्येत तद्बाधनार्थं शाविधानस्यावश्यकत्वात्।

दीध्ये। ७०। 'दीधी' धातोर्लटि तत्स्थाने इटि अनुबन्धलोपे 'टित आत्मनेपदानां टेरे' इति टेरेत्वे प्राप्ते परत्वात् 'यीवर्णयोर्दीधीवेव्योः' इत्यनेन ईकारस्य लोपे च प्राप्ते नित्यत्वल्लोपं बाधित्वा टेरेत्वे ततः इवर्णपरत्वाभावात् लोपाभावे 'एरनेकाचोऽसंयोगपूर्वस्य' इत्यनेन यणादेशे 'दीध्ये' इति सिद्धम्।

सधि। ७१। षस्--धातोर्लोटि तत्स्थाने सिपि 'धात्वादेः षः सः' इति सत्वे शपो लुकि 'सेर्ह्यपिच्च' इत्यनेन सेर्ह्यादेशे 'हुझल्भ्यो हेर्धिः' इत्यनेन हेर्धित्वे 'धि च' इत्यनेन सकारलोपे 'सधि' इति सिद्धम्। नचात्र धीत्यस्य स्थानिवद्भावेन हित्वात् 'अतो हेः' इति हेर्लुक् स्यादिति वाच्यम्, 'पूर्वत्रासिद्धमि'ति सलोपस्यासिद्धत्वेन अतः परत्वाभावेन दोषाभावात्।

सन्ति। ६६। 'ससृ' धातोर्लटि झिपि शपि शपो लुकि इदित्वाद् 'इदितो नुम् धातोः' इति नुमि अनुबन्धलोपे 'नश्च' इति नस्यानुस्वारे 'श्नसोः-' इति

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

सलोपे परसवर्णे 'झरो झरि सवर्णे' इति सलोपे सन्ति इति । तलोपाभावे द्वितकारकं सन्त्ति इति भवति ।

उड्ढि । ६० । 'वश्' धातोर्लोटि तत्स्थाने सिपि शपो लुकि सेर्ह्यपिच्च' इत्यनेन सेर्ह्यादेशे 'हुझल्भ्यो हेर्धिः' इत्यनेन धिभावे अपित्वे 'सार्वधातुकमपित्' इत्यनेन ङित्वात् 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च' इत्यनेन सम्प्रसारणे पूर्वरूपे शस्य 'व्रश्चे'ति षत्वे धस्य ष्टुत्वेन ढकारे षस्य जश्त्वेन डकारे 'उड्ढि' इति सिद्धम् ।

औष्टाम् । ६८ । वश्-धातोर्लङि तत्स्थाने तसि तस्य तामादेशे शपो लुकि 'ग्रहिज्यावयिव्यधिष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च' इत्यनेन सम्प्रसारणे 'सम्प्रसारणाच्च' इत्यनेन पूर्वरूपे 'आडजादीनाम्' इत्याडागमे 'आटश्च' इति वृद्धौ 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इत्यनेन शान्तत्वात्षत्वे ष्टुत्वे औष्टाम् इति सिद्धम् ।

इत्यदादिप्रकरणम् ॥

अथ जुहोत्यादिप्रकरणम्

हु दानादनयोः । दानं चेह न स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वापादानम् किन्तु प्रक्षेपः । स च वैधे आधारे (आहवनीयादौ हविषः विधिबोधितद्रव्यस्य) इति स्वभावाल्लभ्यते । तेन वैधे आधारे प्रमादेन अवैधद्रव्यप्रक्षेपो न होम सिद्धम् ।

परस्मैपदिनः । अयं हु धातुः केवलं परस्मैपदी नतु आत्मनेपदी इति बोधनाय परस्मैपदिनः इति, 'येन संकल्पादौ' अहं होष्ये इति प्रयोगोऽसाधुरेव । नचैवं स्मराग्नौ जुह्वानाः इति शानचः परस्मैपदात् कथं प्रयोग इति वाच्यम्, तत्र शानचोऽप्रवृत्तावपि चानशस्य सत्वात् । यद्यपि काशकृत्स्नधातुपाठे उभयपदी । तन्मते तु होष्ये इति प्रयोगस्य साधुत्वं शक्यते वक्तुम्, तथापि पाणिनिमते तथा प्रयोगस्य चिन्त्यत्वात् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

जुहोति । ६७ । हु—धातोर्लटि तत्स्थाने तिपि अनुबन्धलोपे सार्वधातुकसंज्ञायां शपि 'जुहोत्यादिभ्यः श्लुः' इत्यनेन शपः श्लावादेशे 'श्लौ' इति द्वित्वे अभ्याससंज्ञायां 'कुहोश्चुः' इति कुत्वे 'सार्वधातुकार्धधातुकयोः' इति गुणे जुहोति इति सिद्धम् ।

जुहवाञ्चकार, जुहाव ६२ । हुधातोर्लिटि 'भ्हीभृहुवां श्लुवच्च' इति लिटः पाक्षिके आमि श्लुवद्भावे च कृते द्वित्वे अभ्यासत्वे चुत्वेन हस्य झत्वे 'अभ्यासे चर्च' इति मस्य जत्वे गुणेऽवादेशे 'आमः' इति लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इति लिट्परककृञोऽनुप्रयोगे 'जुहवाम कृ लिट्' इति स्थिते लिटस्तिपो णलि द्वित्वे अभ्यासत्वे 'उरत्' इत्यत्वे रपरत्वे 'हलादिः शेषः' इत्यनेन रेफस्य लोपे 'कुहोश्चुः' इति अभ्यासककारस्य चुत्वे 'जुहवाम् च कृ अ' इति स्थिते 'अचो ञ्णिति' इति वृद्धौ रपरत्वे च विहिते मस्यानुस्वारे परसवर्णे 'जुहवाञ्चकार' इति । आमोऽभावपक्षे लिटस्तिपि णलि द्वित्वादिकार्ये 'अचोऽञ्णिति' इति वृद्धौ आवादेशे जुहाव इति सिद्धम् ।

जुहुधि । ६२ । दानाऽदनार्थक—हु—धातोर्लोटि तत्स्थाने सिपि अनुबन्धलोपे सेर्ह्यादेशे 'जुहोत्यादिभ्य श्लुः' इत्यनेन श्लौ श्लाविति द्वित्वेऽभ्याससंज्ञायां 'कुहोश्चुः' इत्यनेन चुत्वे 'हुझल्भ्यो हेर्धिः' इत्यनेन हेर्धिभावे कृते जुहुधि इति सिद्धम् ।

अजुहवुः ६६ । हुधातोर्लङि अडागमे झौ झेर्जुसि सार्वधातुकसंज्ञायां शपि शपः 'श्लौ' इति द्वित्वे अभ्यासत्वे 'कुहोश्चुः' इति हस्य झत्वे 'अभ्यासे चर्च' इति जत्वे 'जुसिच' इति गुणे आवादेशे अजुहवुः इति सिद्धम् ।

बिभीतः ६६ । 'भी'—धातोर्लटि तत्स्थाने तसि शपि तस्य श्लौ 'श्लौ' इत्यनेन द्वित्वेऽभ्याससंज्ञायां ह्रस्वे 'अभ्यासे चर्च' इत्यनेन चर्त्वे भस्य बत्वे बि… 'बिभीतः' इति । 'भियोऽन्यतरस्याम्' इत्यस्य वैकल्पिके इकारपक्षे तु—बिभितः इति रूपं सिद्ध्यति ।

बिभयाञ्चकार, बिभाय ६८ । भीधातोर्लिटि 'भीह्रीभृहुवां श्लुवच्च'—इत्यामि आमः श्लुवद्भावात् 'श्लौ' इति द्वित्वे अभ्यासत्वे अभ्यासस्याचो ह्रस्वो भस्य बत्वे 'आम' इति लिटो लुकि 'कृञ् चानुप्रयुज्यते लिटि' इति लिट्परककृञोऽनुप्रयोगे

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

'लिटि धातोः—' इति द्वित्वे अभ्यासत्वे 'उरत्' इत्यत्वे हलादिः शेषे 'कुहोश्चुः' इति चुत्वे 'सार्वधातुकार्धधातुकयोः' इति गुणे आयादेशे 'बिभयाम् च कृ अ' इति स्थिते 'अचोञ्णिति' इति वृद्धौ रपरत्वे 'बिभयाञ्चकार' इति। आमोऽभावपक्षे लिटस्तिपि णलि द्वित्वादिकार्ये वृद्धौ आयादेशे 'बिभाय' इति सिद्धम्।

बिभितात्–बिभीतात्–बिभेतु । ६७ । भियो लोटि तिपि शपि, 'जुहोत्यादिभ्यः श्लुः' इति शपः श्लुत्वे 'श्लौ' इति द्वित्वे 'ह्रस्वः' इति ह्रस्वे 'अभ्यासे चर्च' इति बत्वे 'बिभीति' इति दशायाम् 'एरुः' इति तिप इकारस्य उत्वे 'तुह्योस्तातङ्-ङाशिष्यन्यतरस्याम्' इति तातङि अनुबन्धलोपे 'भियोऽन्यतरस्याम्' इत्यनेन ईकारस्य इकारे 'बिभितात्' इति सिद्धम्। 'भियोऽन्यतरस्याम्' इति विकल्पपक्षे 'बिभीतात्' इति। तातङभावपक्षे 'सार्वधातुकार्धधातुकयोः' इति गुणे बिभेतु इति च रूपं भवति।

जिह्रयाञ्चकार--जिह्राय । ६८ । ह्रीधातोर्लिटि 'भीह्रीभृहुवां श्लुवच्च' इत्यामि श्लुवद्भावे च कृते 'श्लौ' इति द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्यासत्वे 'ह्रस्वः' इति इकारस्य ह्रस्वे 'हलादिः शेष' इति अभ्यासरेफस्य लोपे 'कुहोश्चुः' इति अभ्यासहकारस्य झत्वे 'अभ्यासे चर्च' इति झस्य जत्वे 'जिह्री आम् लिट्' इति स्थिते 'आमः' इति लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इतिभूते लिटस्तिपि तिपो णलि अनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इति कृञो द्वित्वे अभ्यासत्वे उरदत्वे 'हलादिः शेषः' इति रेफस्य लोपे 'कुहोश्चुः' इति कस्य चत्वे 'जिह्री आम् च कृ अ' इति स्थिते 'सार्वधातुकार्धधातुकयोः' इति गुणे अयादेशे 'जिह्रयाम् च कृ अ' इति भूते 'अचोञ्णिति' इति वृद्धौ रपरत्वे च कृते मस्यानुस्वारे परसवर्णे 'जिह्रयाञ्चकार' इति। आमोभावपक्षे लिटस्तिपि तपो णलि द्वित्वादिकार्ये 'अचोञ्णिति' इति वृद्धौ आयादेशे 'जिह्राय' इति भवति।

पिपर्ति । ७० । पृ—धातोर्लटि तिपि अनुबन्धलोपे शपः श्लौ 'श्लौ' इति द्वित्वे अभ्याससंज्ञायाम् 'अर्तिपिपर्त्योश्च' इत्यभ्यासस्येकारे अन्तादेशे रपरत्वे हलादिः शेषे त्र कृते उत्तरखण्डस्यस्य ऋकारस्य 'उदोष्ठ्यपूर्वस्य' इत्यनेन उत्वे प्राप्ते तं प्रबाध्य परत्वाद् गुणे रपरत्वे पिपर्ति इति सिद्धम्।

पिपूर्तः । ६७ । पृधातोर्लटस्तसि सार्वधातुकसंज्ञायां शपि शपः श्लौ 'श्लौ' इति द्वित्वे अभ्याससंज्ञायाम् 'अर्तिपिपर्त्योश्च' इतिअभ्यासस्य इकारान्तादेशे रपरत्वे

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

हलादिः शेषे 'पि पृ तस्' इति स्थिते 'उदोष्ठ्यपूर्वस्य' इति उत्वे रपरत्वे 'हलि च' इति धातोरुपधायाः दीर्घे सस्य रुत्वे विसर्गे पिपूर्तः इति सिद्धम् ।

पिपुरति । ६२ । पृधातोर्लटि झौ शपि शपः श्लौ द्वित्वे अभ्यासत्वे 'ह्रस्वः' इति ह्रस्वे 'उरत्' इत्युत्वे हलादिः शेषे 'अर्तिपिपर्त्योश्च' इत्यभ्यासस्य इत्वे 'उभे अभ्यस्तम्' इति झेरति 'उदोष्ठ्यपूर्वस्य' इत्युत्वे 'पिपुरति' इति सिद्धम् ।

अप्रवुः । ६८ । पृधातोर्लिटस्तसि तसोऽतुसि 'लिटि धातोरनभ्यासस्य' इति द्वित्वे अभ्यासत्वे ह्रस्वे उदरत्वे रपरत्वे अभ्यासलोपे 'पपृ अतुस्' इति जाते 'शृदृप्रां ह्रस्वो वा' इत्यनेन वैकल्पिके ह्रस्वे 'इको यणचि' इति यणि सस्य रुत्वे विसर्गे 'पप्रतुः' इति । ह्रस्वाऽभावपक्षे 'ऋच्छत्यृताम्' इति गुणे रपरे च कृते 'पपरतुः' इति रूपं भवति ।

अपिपः—पृधातोर्लङि अडागमे अनुबन्धलोपे तिपि तिप इकारलोपे शपि शपः श्लो द्वित्वे अभ्यासकार्ये 'अर्तिपिपर्त्योश्च' इति अभ्यासस्य इत्वे गुणे रपत्वे हल्ङ्यादिना तलोपे रेफस्य विसर्गे अपिपः इति सिद्धम् ।

अपिपरुः ६२ । पृधातोर्लङि अडागमे झौ शपि शपः श्लुत्वे द्वित्वे अभ्यासादिकार्ये 'अर्तिपिपर्त्योश्च' इत्यभ्यासस्य इत्वे 'उभे अभ्यस्तम्' इत्यभ्यस्तसंज्ञायां 'सिजभ्यस्तविदिभ्यश्च' इति झेर्जुसि 'जुसि च' इति गुणे रपरत्वे सस्य रुत्वे विसर्गे अपिपरुः इति सिद्धम् ।

अपारिष्टाम् । ६९ । पृधातोर्लुङि अडागमे तसि तसस्तामि च्लौ च्लेः सिचि इषि गते 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ रपरत्वे सिचः सस्य इटि 'वृतो वा' इति इटो दीर्घे प्राप्ते 'सिचि च परस्मैपदेषु' इति निषेधे सस्य षत्वे ष्टुत्वे अपारिष्टाम् इति सिद्धम् ।

भृञामित् । ६६ । अत्र बहुत्वमाद्यर्थकम्, तेन भृञ्-माङ्-ओहाङ् इति त्रयाणां संग्रहः । तेन एषां त्रयाणामभ्यासस्य इत्स्यादित्यर्थः । तस्य मिमीते, जिहीते, इत्यादावप्यभ्यासस्येत्वसिद्धिः फलम् ।

अबिभरुः । ६६ । भृधातोर्लुङि अडागमे तत्स्थाने झिप्रत्यये, अनुबन्धलोपे सार्वधातुकसंज्ञायां शपि, तस्य 'जुहोत्यादिभ्यः श्लुः' इत्यनेन श्लौ, तस्मिन्परे 'श्लौ' इत्यनेन द्वित्वे, अभ्याससंज्ञायां, 'उरदि' त्यनेन अत्वे रपरत्वे हलादिःशेषे

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

'अभ्यासे चर्च' इत्यनेन जश्त्वे 'उभे अभ्यस्तम्' इत्यभ्यस्तसंज्ञायां 'सिजभ्यस्तविदिभ्यश्च' इत्यनेन अभ्यस्तत्वाज्झेर्जुसि, अनुबन्धलोपे 'जुसि च' इत्यनेन गुणे अबिभरुः इति सिद्धम् ।

जहाहि-जहिहि-जहीहि । ७१ । ओहाक् त्यागे अस्माद्धातोर्लोटः स्थाने सिपि 'सेर्ह्यपिच्च' इति तस्य 'हि' इत्यादेशे सार्वधातुकसंज्ञायां शपि, शपः श्लौ 'श्लौ' इति द्वित्वे अभ्याससंज्ञायां 'ह्रस्वः' इत्यभ्यासस्याचो ह्रस्वे 'कुहोश्चुः' इति अभ्यासहकारस्य कुत्वेन झत्वे 'अभ्यासे चर्च' इति झस्य जत्वे 'आ च हौ' इति आत्पक्षे 'जहाहि' इति, जहातेश्च इत्वपक्षे 'जहिहि' इति ईहल्यघोः इति ईत्वपक्षे तु 'जहीहि' इति रूपत्रयं सिद्धं भवति ।

जह्यात् । ६४ । हाधातोर्लिङि तिपि शपि शपः श्लौ द्वित्वे अभ्यासत्वे ह्रस्वे हस्य झत्वे तस्य जत्वे च कृते यासुटि अनुबन्धलोपे सुटि 'लिङः सलोपोऽनन्त्यस्य' इति सकारद्वयस्य लोपे 'इतश्च' इति तिप इकारलोपे 'लोपो यि' इत्याकारलोपे 'जह्यात्' इति सिद्धम् ।

हेयात् । ६८ । हाधातोराशीर्लिङि तिपि यासुटि उटाविवौ सुटि 'इतश्च' इति तिप इकारलोपे स्कोः-'इति सलोपे 'एर्लिङि' इति इकाराकारस्य एत्वे 'हेयात्' इति सिद्धम् ।

अदित । ७१ । दाधातोरात्मनेपदे लुङस्तादेशे अडागमे अनुबन्धलोपे च्लौ च्लेः सिचि अनुबन्धलोपे 'दाधाघ्वदाप्' इति घुत्वात् 'स्थाघ्वोरिच्च' इति सिचो लुकि 'उश्च' इति कित्वात् गुणाभावे 'आदित' इति सिद्धम् ।

धत्तः । ६५ । धाधातोर्लटि तसि सार्वधातुकसंज्ञायां 'कर्तरि शप्' इति शपि जुहोत्यादिभ्यः श्लुः इति श्लौ 'श्लौ' इति धातोर्द्वित्वे पूर्वस्य अभ्याससंज्ञायां 'ह्रस्वः' इति ह्रस्वे 'अभ्यासे चर्च' इति धकारस्य दकारे 'उभे अभ्यस्तम्' इति अभ्यस्तसंज्ञया 'श्नाभ्यस्तयोरातः' इति आकारस्य लोपे 'दधस्तथोश्च' इति भष्भावे 'खरि च' इति चर्त्वे सकारस्य रुत्वे विसर्गे च रूपम् ।

न चात्र 'अचः परस्मिन् पूर्वविधौ' इति सूत्रेण अकारलोपस्य स्थानिवद्भावेन झषन्तत्वाभावाद् भष्भावो न स्यादिति वाच्यम्, अत्र भष्भावे कर्तव्ये आल्लोपो न स्थानिवत्, सूत्रारम्भसामर्थ्यात् इति वामनमाधवौ ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

वस्तुतस्तु 'पूर्वत्रासिद्धे न स्थानिवत्' इति परिभाषया त्रिपादीस्थे षत्वभावे कर्तव्ये सपादसप्ताध्यायीस्थाकार लोपस्य स्थानिवत्वनिषेधेन परिभाषया कार्यनिर्वाहे वचनारम्भाश्रयणन्निष्फलमिति वदन्ति ।

धेहि । ६९ । धाधातोर्लोटः सिपि 'सेह्यपिच्च' इति सेर्हित्वे सार्वधातुकसंज्ञायां शपि शपः श्लौ 'श्लौ' इति द्वित्वे अभ्याससंज्ञायाँ 'ह्रस्वः' इत्यभ्यासाकारस्य ह्रस्वे 'दाधाघ्वदाप्' इति घुत्वे 'घ्वसोरेद्धावभ्यासलोपश्च' इति एत्वे अभ्यासलोपे च कृते धेहि इति सिद्धम् ।

बिभ्रति । ६९ । भृञ्धातोर्लटः झौ सार्वधातुकसंज्ञायां शपि शपः श्लौ द्वित्वे अभ्यासत्वे 'भृ भृ झि' इति स्थिते भृञामित्' इति अभ्यासस्य इत्वे रपरत्वे 'हलादिः शेषः' इति अभ्यासरेफस्य 'लोपे अभ्यासे चर्च' इति अभ्यासभकारस्य बत्वे 'बि भृ झि' इटि स्थिते 'उभे अभ्यस्तम्' इति अभ्यस्तसंज्ञायाम् 'अदभ्यस्तात्' इति झस्य अति 'इको यणचि' इति यणि 'बिभ्रति' इति सिद्धम् ।

बिभराञ्चक्रे । ७० । भृधातोर्लोटि 'भीह्रीभृहुवां श्लुवच्च' इत्यामि श्लुवद्भावे द्वित्वे अभ्यसदिकार्ये 'भृञामित्' इत्यभ्यासस्य इत्वे 'सार्वधातुकार्धधातुकयोः' इति गुणे रपरे 'आमः' इति लिटो लुकि 'कृञ् चानुप्रयुज्यते लिटि' इति लिट्परकक्रञोऽनुप्रयोगे आत्मनेपदपक्षे लिटः तादेशे तस्य एशादेशे द्वित्वादिकार्ये मस्यानुस्वारे परसवर्णे लकारस्य यणि उक्तं रूपं सिद्धम् । आमोऽभावपक्षे बभ्रे इति च सिद्धयति ।

अबिभरुः । ६६ । भृधातोर्लङि 'लुङ् लङ्' इत्यटि तत्स्थाने झौ सार्वधातुकसंज्ञायां शपि शपः श्लौ 'श्लौ' इति द्वित्वे अभ्यासत्वे 'भृञामित्' इति अभ्यासस्य इत्वे रपरत्वे हलादिःशेषे 'अभ्यासे चर्च' इत्यभ्यासभकारस्य बत्वे 'अबि भृ झि' इति जाते 'जुसि च' इति ऋकारस्य गुणे रपरत्वे च विहिते 'सिजभ्यस्तविदिभ्यश्च' इति झेर्जुसादेशे सस्य रुत्वे विसर्गे 'अबिभरुः' इति सिद्धम् ।

भ्रियात् । ७१ । भृधातोराशीर्लिङि तिपि अनुबन्धलोपे इतश्चेतीकारलोपे यासुटि सुटि च 'स्कोः संयोगाद्योरन्ते च' इति सलोपे 'भृ या त्' इति स्थिते 'रिङ् शयग्लिङ्क्षु' इति ऋकारस्य रिङादेशे अनुबन्धलोपे 'रिङ्' विधानसामर्थ्यात् 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घाऽभावे 'भ्रियात्' इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अभूत । ६७ । भूधातोर्लुङि आत्मनेपदे लुङस्तादेशे अडागमे च्लेः सिचि 'ह्रस्वादङ्गात्' इति सिचो लुकि 'उश्च' इति कित्वात् गुणनिषेधे 'अभूत' इति सिद्धम् ।

नेनेक्ति । ७१ । निज्धातोर्लटि तिपि सार्वधातुकसंज्ञायां शपि शपः श्लौ अनुबन्धलोपे 'श्लौ' इति द्वित्वेऽभ्याससंज्ञायां हलादिःशेषे लघूपधगुणे पूर्वखण्डस्य 'निजां त्रयाणां गुणः श्लौ' इत्यनेन गुणे 'चोः कुः' इत्यनेन कुत्वे चर्त्वे च कृते 'नेनेक्ति' इति रूपं सिद्धम् ।

नेनेग्धि । ७० । णिजिर् धातोर्लोटि 'इर इत्संज्ञा वाच्या' इति इर इत्संज्ञायां लोपे च विहिते 'णो नः' इति धातोर्णस्य नत्वे 'निज् लोट्' इति स्थिते लोटः स्थाने सिपि सार्वधातुकसंज्ञायां शपि शपः श्लौ द्वित्वे अभ्यासगुणे 'हुझल्भ्यो हेर्धिः' इति हेर्ध्यादेशे 'चोः कुः' इति जस्य गत्वे 'नेनिग्धि' इति सिद्धम् ।

नेनेजानि । ६८ । णिजिर् धातोर्लोटि 'इर इत्संज्ञा वाच्या' इति वार्तिकेन इर इत्संज्ञा लोपे च कृते 'णो नः' इति धातोर्णस्य नत्वे 'निज् लोट्' इति स्थिते लोटः स्थाने मिपि 'मेर्निः' इति मेर्न्यादेशे सार्वधातुकसंज्ञायां शपि शपः श्लौ 'श्लौ' इति द्वित्वे अभ्याससंज्ञायां 'हलादिः शेषः' इति अभ्याससम्बन्धिजकारस्य लोपे 'नि निज्' इति स्थिते 'आडुत्तमस्य पिच्च' इत्याटि अनुबन्धलोपे 'निजां त्रयाणां गुणः श्लौ' इत्यभ्यासस्य गुणे 'नेनिज् आनि' इति स्थिते आटः पित्वात् 'पुगन्तलघूपधस्य च' इति गुणे प्राप्ते 'नाभ्यस्तस्याचि पिति सार्वधातुके' इति निषेधे नेनिजानि इति सिद्धम् ।

ऐयरु । ६३ । ऋधातोर्लङि तत्स्थाने झौ झेर्जुसि शपः श्लौ द्वित्वे अभ्याससंज्ञायाम् उरदत्वं बाधित्वा 'अर्तिपिपर्त्योश्च' इत्वे रपरत्वे हलादिःशेषे 'अभ्यासस्यासवर्णे' इतीयङि उत्तरखण्डस्य गुणे रपरत्वे सस्य रुत्वे विसर्गे 'इयरु:' इति स्थिते आटि 'आटश्चे'ति वृद्धौ ऐयरुः इति सिद्धम् ।

अनेनिजम् । ६६ । णिज्धातोर्लङि णस्य नत्वे अडागमे मिपि अमि शपि शपः श्लौ द्वित्वे अभ्यासादिकार्ये 'णिजां त्रयाणां गुणः श्लौ' इति अभ्यासस्य गुणे 'नाभ्यस्तस्याचि पिति सार्वधातुके' इति गुणनिषेधे अनेनिजम् इति सिद्धम् ।

Sri Vidyabharathi Book Centre Bangalore

CC-O. In Public Domain. Digitized by eGangotri

अनिजत् । ६८ । इरित्संज्ञक 'णिज्' धातोर्लुङि 'णो नः' इति धातोर्णस्य नत्वे 'लुङ्लुङ्' इत्यटि ऊनुबन्धलोपे लुङः स्थाने तिप्यनुबन्धलोपे 'इतश्च' इति तिप इकारलोपे 'च्लि लुङि' इति च्लौ 'इरितो वा' इति विभाषया च्लेरङादेशे ङित्वाद् गुणाऽभावे ऊनिजत् इति । अङभावे च्लेः सिच्यनुबन्धलोपे 'अस्तिसिचोऽपृक्ते' इत्यपृक्तसंज्ञकस्य तिपस्तकारस्य ईटि 'वदव्रजे'ति वृद्धौ जस्य कुत्वे सस्य षत्वे-ऽनैक्षीत् इति सिद्धम् ।

इयर्ति । ७० । ऋ-धातोर्लटि तिपि शपि शपः श्लौ अनुबन्धलोपे 'श्लौ' इत्यनेन द्वित्वेऽभ्याससंज्ञायाम 'उरत' इत्यत्वं बाधित्वा 'अर्तिपिपर्त्योश्च' इत्यनेनाभ्यासस्य ऋकारस्य इत्वे रपरत्वे हलादिः शेषे च कृते उत्तरखण्डस्थस्य ऋकारस्य गुणे रपरत्वे 'इ अर् ति' जाते 'अभ्यासस्याऽसवर्णे' इत्यनेनेयङादेशे इयर्ति इति सिद्धम् ।

इयृति । ६२ । ऋ धातोर्लटि तत्स्थाने झिप्रत्यये शपि तस्य 'जुहोत्यादिभ्यः श्लुः' इत्यनेन श्लौ श्लाविति द्वित्वेऽभ्याससंज्ञायाम् उरदत्वे प्राप्ते 'अर्तिपिपर्त्योश्च' इत्यनेन इयङि, ङकारस्येत्संज्ञायां लोपे च अभ्यस्तसंज्ञायाम् 'अदभ्यस्तात्' इत्यनेन झस्यादादेशे 'इयृति' इति सिद्धम् । न च 'बहुलं छन्दसि' इत्यनेन इत्वविधानेनै-वोक्तरूपसिद्धौ पुनः 'अर्तिपिपर्त्योश्च' इत्यत्र तिग्रहणं किमर्थमिति वाच्यम्, 'लोकेऽप्यस्य प्रयोगः इति ज्ञापनार्थत्वात् ।

ऐयः । ७३ । ऋधातोर्लङि तिपि सार्वधातुकसंज्ञायां शपि, श्लौ 'श्लौ' इति धातोर्द्वित्वे 'उरत्' इति अभ्यासस्य ऋकारस्याकारे रपरे 'हलादिः शेषे 'अर्तिपिपर्त्योश्च' इति अभ्यासस्याकारस्येत्वे 'अभ्यासस्यासवर्णे' इतीयङि 'आडजादीनाम्' इत्यादि 'आटश्च' इति वृद्धौ 'सार्वधातकार्धधातुकयोः' इति गुणे 'इतश्च' इतीकारलोपे 'हल्ङ्याब्भ्यः' इति तकारस्य लोपे रेफस्य विसर्गे 'ऐयः' इति रूपं सिद्धम् ।

आरत् । ७० । ऋधातोर्लुङस्तिदि च्लौ 'सर्तिशास्त्यर्तिभ्यश्च' इति च्लेरङि अनुबन्धलोपे 'ऋदृशोऽङि गुणः' इति गुणे रपरत्वे आटि वृद्धौ तिप इकारलोपे आरत् इति सिद्धम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

बब्धः । ६१ । भस् धातोर्लटि तत्स्थाने तसि, शपि, तस्य श्लौ, 'श्लौ' इति द्वित्वे अभ्याससंज्ञायां हलादिः शेषे 'अभ्यासे चर्च' इत्यनेन जश्त्वे 'बभस् तस्' इति दशायाम्, उपधासंज्ञायां 'घसिभसोर्हलि च' इत्यनेन उपधालोपे 'झलो झलि' इत्यनेन सलोपे 'झषस्तथोर्धोऽधः' इत्यनेन तकारस्य धकारे भस्य जश्त्वे च कृते सस्य रुत्वे विसर्गे बब्धः इति सिद्धम् ।

जजातः । ६४ । 'जन्' धातोर्लटि तत्स्थाने तसि शपि तस्य श्लौ 'श्लौ' इति द्वित्वेऽभ्याससंज्ञायां हलादिःशेषे 'जनसनखनां सञ्झलोः' इत्यनेन नस्याकारान्तादेशे सवर्णदीर्घे सस्य रुत्वे विसर्गे च कृते जजातः इति सिद्धम् ।

जज्ञति । ६६ । जनधातोर्लटि तत्स्थाने झौ शपि शपः श्लौ 'श्लौ' इति द्वित्वे अभ्याससंज्ञायां हलादिः शेषे अभ्यस्तसंज्ञायान् 'अदभ्यस्तात्' इति झस्य आदेशे झलादित्वाभावात् 'जनसनखनाम्—' इति आत्वाभावे 'गमहनजनखनघसां लोपः क्ङित्यनङि' इत्यनेन उपधालोपे नस्य श्चुत्वे जज्ञति इति सिद्धम् ।

इति जुहोत्यादिप्रकरणम् ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

१९६१

१ 'शेषे' इति सूत्रस्य लक्षणत्वाधिकारत्वयोः साफल्यं प्रदर्श्य—'पुराणप्रोक्तेषु ब्राह्मणकल्पेषु' 'कार्मस्ताच्छील्ये' 'तदर्थं विकृतेः प्रकृतौ' एषु द्वे सूत्रे सोदाहरणं व्याख्येये । १०

अथवा—पूर्वेषुकामशमः, साङ्कश्यकः, ब्राह्मणकीयः । पूर्वपाञ्चालकः । आयसम् । भ्रातृकम् । ताक्षशिलः । शौनकिनः । कुत्सकुशिकिका । हास्तिपदः । एषु यथेच्छं पञ्चैव प्रयोगाः साधनीयाः ।

२ पैप्पलम् । जम्बूः । पवित्रम । दर्शकादर्शिकी । कर्मण्यः । पाथेयम् । औषधेयम् । द्वैपारायणिकः । ब्राह्मवर्चस्यम् । दक्षिण्यः एषु यथेच्छं पञ्चैव साधु संसाधयत । १०

३ औत्तरापथिकम् । द्विवार्षिको मनुष्यः । दून्यम् । पुत्रपौत्रीणः । निबिडम् । कियान् । इषेत्वकः । वटकिनी । वातूलः । कृपीवलः । एषु यथेच्छं पञ्चानाम् सिद्धिं रचयत । १०

४ तदानीम् । भिषक्पाशः । ज्यायान् । वर्षिष्ठः । रासभकः । व्याकरणकः । एषु त्रयाणां सिद्धिं विधाय—'पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च' इति सूत्रस्थलोपग्रहणफलं, 'न सामिवचने' इत्यस्य ज्ञापकत्वञ्च ग्रन्थोक्तरीत्योपवर्णयत । १०

५ लोहितध्वजाः । पितृदैवत्यम् । प्रवाहिकातः । खरटखरटाकरोति । शूलाकरोति । एकैकयाहुत्या । एषु त्रयाणां सिद्धिं विधाय—

दलद्वये टाबभावः क्लीबे चादड्विरहः स्वमोः ।
समासे सोरलुक् चेति सिद्धं बाहुलकात् त्रयम् ॥

सोदाहरणं व्याख्येया फक्किकेयम् ।

१९६१

१ भवन्ति, बभूविथ, भवेत्, प्रभवाणि, एधे, एधाञ्चकृढ्वे, एधिषीय, एषु पञ्चानां साधुत्वप्रकारः प्रदर्शनीयः । १०

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

२ 'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः' इति सूत्रस्यार्थं सम्यगुपपाद्य 'कृञ्चानुप्रयुज्यते लिटि' इत्यत्र कथं कृभ्वस्तिलाभः? कथञ्च तदर्थप्रकृत्यर्थयोरन्वयः? १०

३ देधे, आतीत्, ववृके, आनृजे, बिभयिथ, तोप्सीष्ट, गोपायाञ्चकार, कामयाञ्चक्रे, एषु पञ्च साधुत्वं लेख्यम्। १०

४ अध्ययि, धिनु, ओषाञ्चकार, अबुधत्, गृहति, सस्वरिव, अश्रीषीत्, बीभत्सते एषु पञ्च प्रयोगाः साधनीयाः। १०

५ दद्रष्ठ, इयाज, जघास, प्रहृण्मि, ईडिये, ऊर्णुनाव, प्राणियाति, एषु पञ्चनां साधुत्वप्रकारो वर्णनीयः। १०

६ आसन्, वज'गरुः, अचकाः, सधि, जुहाव, विमितः, नेनेक्ति अजायत एषु पञ्च प्रयोगाः साधनीयाः। १०

७ 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यस्मिन् ङिद्ग्रहणफलं विवेचनीयम्। १०

१९६३

सिद्धान्तकौमुद्याः शैषिकादिद्विरुक्तप्रक्रियान्तभागे प्रश्नाः।

सूचना—सर्वे प्रश्नाः समानाङ्कभाजः। यथेच्छं केचन पञ्चैव प्रश्नाः समाधेयाः।

१ कौक्षेयकोऽसिः, दावकः, मदीयः, शारदिकः, औपनीविकः, गाम्भीर्यम्, पात्त्वणात्विकः, देवदत्तरूप्यम्, आश्मरथः कल्पः, पाराशरिणो भिक्षवः, एषु पञ्च प्रयोगान् सूत्रविग्रहादिनिर्देशपूर्वकं साधु साधयत। १०

२ जातुषम्, आप्यम्, नैयग्रोधम्, शौवापदम्, वांशकठिनिकः, पद्याः शर्करा, धेनुष्या, शीर्षण्यः, आर्षभ्यो वत्सः, एषु यथेच्छं पञ्च प्रयोगान् साधयत। १०

३ आर्धद्रौणिकम्, वासनम्, सप्तदशः, वैरङ्गिकः, षण्मास्यः, एकागारिकश्चौरः, यथाकामो, श्रौत्रम्, अद्यश्वीना वडवा, हैयङ्गवीनम्, एषु पञ्च प्रयोगा यथाशास्त्रं साध्यन्ताम्। १०

४ कियान्, उष्णिका यवागूः, मत्काः' क्षेत्रियः, वणा, अमुतः, परारि, उपरिष्टात्, तार्तीयीकः, ज्यायान्, एषु पञ्च साधयत। १०

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

५ तूष्णीकः, देविकः, वाचिकः, कुटीरः, द्विशतिकां व्यवसृजति, एषु त्रीन् प्रयोगान् संसाध्य, अनुकम्पित उपेन्द्रदत्त इति विग्रहे तद्धिते प्रथमैकवचने कति रूपाणि कथञ्च तानि सिद्ध्यन्ति । १०

६ प्रतनम्, विरजीकरोति, विप्रत्राकरोति, इतरेतरं कुले भोजयतः, द्वन्द्वम्, एषु चतुरः प्रयोगान् संसाध्य, नातः परस्येतिसूत्रस्थतपरफलं निर्दिशत । १०

७ शेष इति लक्षणञ्चाधिकारश्चेति ग्रन्थकृदुक्तिं विमृशत ।

दलद्वये टावभावः क्लीबे चादड्विरहः स्वमोः
समासे सोरलुक् चेति सिद्धं बाहुलकात् त्रयम् ॥
इति कारिका सोदाहरणा व्याख्येया ।

१९६४

सूचना—एषु केचन पञ्चैव प्रश्नाः समाधेयाः ।

१ भवन्ति, भवानि, भवेः एधे, एधताम्, एधै, ऐधिषत, ऐधिष्येथाम्, ऐषु पञ्चानां साधुत्वप्रकारः प्रदर्शनीयः । १०

२ देधिरे, सस्वदे, निषिषेध, प्रणदति, उवोक्ष, आनृजे, कुञ्चयात् ऐषु पञ्चानां साधुत्वं प्रदर्शनीयम् । १०

३ विवेष्टे, अकटीत्, तिप्सीष्ट, जुगोपिथ, चक्षण्वहे, क्रामात, मा भवानालीत्, जिगाय, धिनु, एषु पञ्च प्रयोगाः साधनीयाः । १०

४ अधृक्षत, घत्स्यति, अचर्हीत्, दिद्युते, कल्प्स्यति, तक्ष्यति दधि, आमयति, एषु पञ्चानां साधुत्वं प्रदर्शनीयम् । १०

५ श्रेमतुः, शीयते, चस्नतुः, अधात्, ह्वर्यात्, आर, बीभत्सते, ऊषतुः एषु पञ्च प्रयोगाः साधनीयाः । १०

६ जवसिथ, चख्यौ, ईडिषे, अभ्यगीष्ट, सन्ति, अरोदीत, अचकात्, जुहुति, बिभर्ति, इयर्ति, एषु पञ्चैव प्रयोगाः साध्यन्ताम् । १०

७ "सन्वल्लघुनि चङ्परेऽनग्लोपे" अस्य सूत्रस्य सूत्रार्थः मतभेदप्रदर्शनपुरस्सरं साधु प्रदर्शनीयः । १०

Sri Vidyabharathi Book Centre, Sringeri

१९६४

CC-O. In Public Domain. Digitized by eGangotri

सूचना—सर्वे प्रश्नाः समानाङ्काः, केचन पञ्चैव समाधेयाः ।

१—नादेयम्, नित्यः, तदीयः, गह्वीयः, मदीयः, सायन्तनम्, गाम्भीर्यम्, अर्जुनकः पालाशम्, एषु पञ्चानां साधनप्रकारः प्रतिपाद्यताम् ।

२—शौकम्, कंसीयम् परिजः पारिषद्यः, श्राणिकः, कंसिकः, गौतुञ्छिकम् पुत्रीयः, एतेषु पञ्चानां साधुत्वं कुरुत ।

३—द्विकुलिजी, षड्क्तिः, दण्ड्यः, पान्थः, योग्यः, आलस्यम्, अध्वत्यः, पक्षतिः, तारकितं नभः, एषु पञ्च प्रयोगाः साधनीयाः ।

४—कियान्, षष्ठः पथकः गोमान्, चूडाला, सुखरः, हृदयालुः सुखी, शुभंयुः एतेषु पञ्चानां साधनकारः विलिख्यताम् ।

५—अधुना, ज्यायान्, कनिष्ठः, देविकः, एषु कयोश्चिद् द्वयोः साधूत्वं विधाय चतुर्थ्यादानजादौ चेत्यादिकारिकायाः सोदाहरणं व्याख्यानं क्रियताम् ।

६—मुख्यः, वैसारिणः, पाड्रम्, अल्पशः कृष्णीकरोति, पटपटाकरोति, सुखाकरोति, अभ्यग्नि सुखम्, एतेषु पञ्चानां साधुत्वं क्रियताम् ।

७—दलद्वये टाबभाव इत्यादिकारिकाव्याख्यानं विधीयताम् ।

१९७४

(सिद्धान्तकौमुद्या भ्वादिजुहोत्याद्यन्तभागे प्रश्नाः)

सूचना—समानाङ्केषु निजेच्छया पञ्चैव समाधेयाः ।

१—भवतात्, भवेयुः, एधाञ्चक्रे, अतीत्, अस्वादीत्, बवृके, अभ्रंचत्, एषु प्रयोगान् संसाध्य "अनन्तोऽकारवान्वा यः" इत्यादिकारिका विस्पष्टं १०
व्याख्यायताम् ।

२—जृम्भते, अर्चत्कमत, क्राम्यति, अप्यायि, जिगाय, ओषञ्चकार घत्स्यति, एषु चत्वारि रूपाणि साधयित्वा 'संहितैकपदे नित्या—" इत्यादिपद्यं १०
साधु व्याख्येयम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

३—अद्य् तव्, कल्पते, अपप्तत्, गूहति, भ्रियात्, अदधत्, शृण्वन्ति, इयाज, अस्मिन् प्रयोगाष्टके केचन पञ्च प्रयोगाः सुसाधनीयाः ।

४—'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः' 'प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च' अनयोः कस्याप्येकस्य सुस्पष्टं सूत्राय, पाध्या- ष्मेति सम्पूर्णं सूत्रं वा विलिख्य यासुटो ङित्करण प्रयोजनं प्रतिपादनताम् । ०१

५—जक्षतुः जहि, शेते, रवीति, अवोचत् अध्यगीष्ट, विदाङ्कुरुतात्, एषु केषाचित् पञ्चप्रयोगाणां साधुत्वं विधीयताम् । १०

६—एधि, दरिद्रत, शिष्ट, पिपर्ति, जहितः, ऐयः, जजात, अत्र यथेच्छं पञ्च- प्रयोगाः प्रधानासूत्रनिर्देश पुरस्सरं साध्यन्ताम् ।

७—ग्रन्थकारोक्तदिशाऽजन्तेषु धातुष्वनुदात्तत्वविधायकं लक्षणमुल्लिख्य ऊर्णु नावेति प्रयोगः शङ्कासमाधानाभ्यां समुपपाद्यताम् । १०

१९७५

(अधोलिखितेषु केचन पञ्च प्रश्नाः समाधेया सर्वे प्रश्ना समाङ्कभाजः ।)

१—चाक्षुषं रूपम्, नादेयम्, कौरवकः, प्रावृषिकः, श्रविष्ठः, दिश्यम्, जिह्वा- मूलीयम्, एषु पञ्चानां साधुत्वमुपपादनीयम् ।

२—शौनकिनः, छान्दोग्यम्, आश्वः, गोमयम्, कांस्यम्, पर्पिकः, पाक्षिकः, एषु पञ्च प्रयोगाः साधनीयाः ।

३—आस्तिकः, वयस्यः, सतीर्थ्यः, आत्मनीनाम्, परमनैष्ठिककः साहस्रम् एषु साहस्रम्, दस्तिकः, एषु पञ्चानां साधुत्वं विधेयम् ।

४—त्रैशानि, षडिजयः, पारायणिकः, प्रावृषेण्यः, याथाकथाचम्, अपटुत्वन्, पौरोहित्यम् एषु पञ्चप्रयोगाणां साधनप्रकाराः प्रदर्शनीयाः ।

५—मौद्गीनम् अध्वन्यः, तारकितं नमः, द्वितीयम्, षष्ठ, कृतपूर्वी, कृतपूर्वी, गोमान् एषु पञ्चानां साधुत्वमुपपादनीयम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

६—तपस्वी, ब्राह्मणधर्मी, कुतः, पूर्वेद्युः, पञ्चधा, लघीयान्, कानि तेषां। पञ्चप्रयोगान् साध्नोतु।

७—बहुपटुः, चञ्चा, द्विपदिकासु, अनुपमयः, राजसात्करोति, पचति पचति, पटुपट्वी, एषु केचन पञ्चैव साधनीयाः।

१९६५

(समानाङ्काः समाधेयाः प्रश्नाः पञ्च निजेच्छया।

१—दश लकारान् विलिख्य, केषु तिङां सार्वधातुकत्वस्य फलमित्युल्लिख्य, अष्टादश लादेशाः परस्मैपदानां णलादयो नवादेशाश्चोल्लिख्यन्ताम्।

२—बभूविथ, प्रणिभवति, एधेरन्, पस्पर्द्धे, ऊर्दते, अच्युतत्, गङ्गां विसेधति, एषु यथेच्छं पञ्चप्रयोगाः धात्वर्थनिर्देशपुरस्सरं सुसाधनीया।

३—आनर्द, नन्द्यात्, ऊखतुः, विव्यतुः, अवंषीत् अकटीत्, तिप्सीष्ट, एषु यथारुचि केऽपि पञ्चप्रयोगा संसाध्याः।

४—त्रेपे, गोपायाञ्चकार, सायात्, धिनोति, रोषिता, अघसत्, अनुव्यन्दते जलम्, विव्यथे, अस्मिन् प्रयोगाष्टके केषाञ्चित् पञ्चानां साधुत्वं विधीयताम्

५—फेणतुः, प्रण्यपतत्, परिसोढा, चस्नतुः, अभृत, धेयात्, असावीत्, अत्र निजेच्छया केचन पञ्चचप्रयोगा' साध्यन्ताम्।

६—दिग्ये, अदर्शत्, ऊयतुः, अह्वि अवधीत्, शेरते, एषु त्रीन् प्रयोगान् संसाध्य "भविताव, देधे" एष्वन्यतमः प्रयोगः शङ्कासमाधानाभ्यां समुपपाद्यताम्,

७—आह, विरियात्, अयुः, मार्ष्टि, अजागरीत् गुह्वति, जहाति, धत्तः, नेनिजानि, एसु त्रयाणां साधुत्वं विधाय, 'नेर्गदनद....' 'प्रह्विज्या.....' अत्र किमप्येकं सूत्रं पूरणीयम्, यद्वा शितपाशपाऽनुबन्धेनेति पद्यं प्रदर्श्य सावतरणं व्याख्येयम्।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सिद्ध-प्रयोग-सूची

	पृ. सं.		पृ. सं.		पृ.सं.
(अ)		अग्रुचत्	१११	अदित	१७७
अकटीत्	११४	अग्लुचन्	११२	अदियाः	१९३
अक्रमीत	१२३	अघसत्	१५३	अर्द्धक	७७
अक्राक्षीत्	१४५	अघुक्षत्	१५५	अद्युतत्	१२६
अक्राष्टाम्	१४५	अघुक्षाताम्	१५५	अद्योतिष्ट	१२६
अक्ष्णोति	१२५	अघ्र्यः	४८	अद्राक्षीत्	१४५
अक्ष्णुतः	१२५	अचकाः	११२	अद्विषुः	१५५
अक्ष्यति	१२५	अचीकमत	१२२	अधाक्षि	१२४
अक्लृप्त	१२९	अच्छावाकीयम्	६२	अधाक्षीत्	१४६
अक्षमिष्ट	११९	अजगवं पिनाकः	६७	अधस्तात्	७३
अक्षैषीत्	११७	अजथ्या	४०	अध त्	१३८
अखदीत्	१०९	अजन्तोऽकारवान्वा	११३	अजासीत्	१३८
अखादीत्	१०९	अजागः	१७०	अधिजगे	१६२
अख्यत्	१५७	अजागरुः	१७०	अधियन्ति	१६३
अगात्	१६२	अजागरीत्	१७१	अधिराज्यम्	५५
अगादीत्	११६	अजुहवुः	१७४	अध्यनात्	१६४
अगास्त	१४२	अणुकः	८३	अधीयीत	१६३
अगुह्वहि	१३६	अर्णवः	६७	अधुना	७१
अगूढ़	१३६	अत एकहलम०	१०६	अधोक्	१५५
अगूहत	१३६	अतिग्रहाव्यथन०	८९	अध्यगीष्ट	१६३
अगोवायीत्	११८	अतीर्थ्यः	३९	अध्यैष्ट	१६३
अग्नीभवति	८७	अनमाऽग्येरुयादि०	२५६	अध्ययै	१६३
अगे	१४७	अद्रघत्	१३७	वध्यैयाताम्	१६३
अग्लासीत्	१३८	[illegible]	१४५	अधिक	४४

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

	पृ. सं.		पृ. सं.		पृष्ठ संख्या
अर्धद्रोणिकम्	४३	अभूत्	१६२	अवर्धीत्	१५९
अध्वनीनः	५८	अभूत्	१००	अवर्षीत्	१४१
अनिजत्	१८०	अभूत्	१७२	अवाक्षीत्	१४७
अनुगवीनः	५८	अभ्यष्टौत्	१६१	अवारपारीणः	२
अनुस्यन्दते	१२८	अभ्रमीत्	१३५	अविभरुः	१७८
अनुस्वदते	१०७	अमात्यः	३	अवभ्रटम्	५९
अनेनिजम्	१७९	अमावास्यः	१६	अवोढाम्	१४७
अपदुत्वम्	५४	अमावास्यकः	१६	अव्ययानां भमात्रे टिलोपः	३
अपप्तत्	१३५	अम्रत्	१११	अश्वत्	१५१
अपरहैमनः	१४	अमुतः	७०	अंशकः	६२
अपरेण ग्रामम्	७३	अम्रोचीतः	१११	अशब्दे फिञ्चर्गोत्रा०	१९
अपरिष्टाम्	१७६	अय सार्वधातुक०	१६४	अशिश्रि यत्	१३७
अपिपरुः	१७६	अयंसीत्	१४५	अशीति	४८
अपिपः	१७६	अयाक्षीत्	१४६	अशीचय्	२१
अपूत्यम्	३९	अयान्	१६४	अश्ममयम्	२७
अपोषीत्	१२५	अयुः	१६४	अश्वषङ्गवम्	५९
अपौरुषेयः	४१	अरंस्त	१३६	अष्टकम्	४७
अप्यायि	१२२	अरुदत्	१६२	असमासे निष्कादिभ्यः	४२
अप्रतुः	१७६	अरोदत्	१६९	असंज्ञायां पूर्वेषु०	४
अबिभरुः	१७६	अर्थवान्	६९	असावीत्	१४०
अशोचत्	१६१	अर्वाके	८३	असासोत्	१३९
अबोधत	१६१	अर्वाचीनम्	[illegible]	अस्तावं त	१६०
अबोधिष्ट	१३६	अल्पं ददाति	८६	अस्तिसिचोऽपृक्ते	९९
अभार्षीत्	१३८	अवः	३	अस्यदत्	१२८
अभीकः	६२	अवकटः	५९	आस्वरीत्	१४०
अभीयात्	१६२	अवटीटम्	५९	अस्वार्षीत्	१४०
				अहंयुः	७०

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

	पृ. सं.
[आ]	
आकर्षीत्	३७
आकर्षिकी	३२
आकर्षिक:	३२
आकालिक:	५२
आङ्गक:	८
आक्षिकम्	२१
आक्षौदा द्विजा:	२२
आगवान:	८०
आंगुलिक:	८०
आग्निष्टोमिक:	२०
आग्निष्टोमिकी	५१
आचार्य भागीन:	४१
आचितिकी	४६
आञ्छ	११२
...कीना	४६
...ढ्यचर:	७४
...तत्	१०८
आतीत्	१०८
आतिथेयम्	३५
आत्थ	१६१
आत्विजो नो यजमान:	४९
आत्मनीनम	४०
आदत्	१५३
आदु:	१५३
आध्यात्मिकम्	१८

	पृष्ठ संख्या
आधिदैविकम्	२४
आनर्च	११६
आनर्द	११०
आनृजे	१११
आनुकूलिक:	३३
आनुलेमिक:	३३
आमोभकारस्य नेत्वम्	१०२
आम्प्रत्ययव०	१०२
आरण्यक:	९
आरातीय:	२६
आर्तीत्	१५१
आनुगादिक:	८३
आत्यम्	२७
आप्रपदीन:	५७
आभिजित्य:	८१
आमलकम्	२९
आमयावी	६८
आयन	१६१
आरत्	१८०
आरिथ	१४०
आर्णवण:	२६
आर्हन्ती	५४
आलम्बिन:	२२
आशितङ्गवीनम्	८३
आशौचम्	२१
आश्रम:	२६

	पृष्ठ संख्या
आश्मनम्	२७
आश्मरथ:	२३
आर्षभ्य:	४१
आष्टाम्	१५५
आसन्दी०	६५
आसाञ्चक्रे	१५८
आसीत्	१६७
आस्ताय्	१६७
आस्तिक:	३५
आस्तेयम्	१८
[इ]	
इतरेतराम्	९१
इत्थम्	७२
इन्द्राञ्चकार	१०२
इन्द्रियम	६४
इन्द्रियम-इ०	६२
इयर्ति	१८०
इयान्	६०
इयृति	१८०
[ई]	
ईजतु:	१४६
ईजे	१४६
ईश्वराधीन:	८३
ईयतु:	१६

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

	पृ. सं.
[उ]	
उच्चैस्तमाम्	७४
उड्डि	१७३
उत्तम्भते	११५
उन्मनीस्यात्	८७
उपरि	७३
उपसर्गप्रादु०	१६८
उपेन्द्रदत्तकः	७८
उपयेछुः	७२
उवचिथ	१६१
उवाय	१४६
उवाय	१४७
उवोब्व	११०
उषोढ़	१४७
[ऊ]	
ऊषतुः	१११
ऊर्जस्वलः	६८
ऊर्णुञ् धा० रु०	१६०
ऊयतुः	१४८
ऊयुः	१४८
ऊर्णुनविथ	१५६
ऊर्णुनाव	१५८
ऊवतुः	१४८
ऊर्णुविषीष्ट	१५९
ऊवे	१४९
[ऋ]	
ऋतोर्वृद्धिम०	१५
[ए]	
एकाकिनोऽपि प०	४१
एकं बहुव्रीहिवत्	८६
एकशालिकः	८०
एकाकी	७४
एकाच उपदेशेऽनुदा०	१०३
एकादशम्	६१
एकैकमक्षरम्	८९
एकैकया आहुत्या	८९
एकैकस्मै देहि	९०
एणीपचनीयः	६
एतर्हि	७१
एधस्व	१०५
एधाञ्चक्रे	१०४
एधाञ्चकृषे	१०४
एधामास	३०४
एधिताहे	१०५
एधिड्ढवम्	१०५
एधिषीष्ट	१०५
एधेरन्	१०५
एधि	१७२
एषि	१६७
[ऐ]	
ऐकागारिकः	१२
ऐकाह्निकः	३६
ऐणेयम्	२९
ऐड्ढ्वम्	१५७
ऐन्द्रायुधम्	२८
ऐयः	१८०
ऐयरुः	१७९
ऐरावतकः	८
ऐषमः	७२
ऐहलौकिकम्	११
[ओ]	
ओर्देशे ठञ्	७
ओषीष्ट	१४२
[औ]	
औजसिकः	३३
और्णवीत्	१५९
और्णोः	१५९
और्णुविष्ट	१६०
औपधेयम्	४१
औपनिषदः	२१
औपनीविकः	१७
औपयिकः	८५
औपरिष्टः	३
औमीनम्	५६
औष्टाम्	१७३
[क]	
ककुदावर्ती	६९

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

	पृ. सं.
कङ्करीयः	४८
कतमः	७९
कतिपयथः	६१
कथं काव्यमिति	५६
कथं विततोर्व्वं०	१२१
कथं पौष्टी सुदा	२८
कपोतपाकाः	८२
कम्पने चलिः	१३१
कम्बः	७०
कल्मासि	१२८
करिष्ठः	७४
कर्णजाहम्	५८
कणिलः	६८
कर्माध्ययने वृ०	३६
कलापकम्	१८
कंसीयम्	३०
काकतालीयः	८०
काकरीतम्	४०
काकोलूकिका	२५
काच्छकं हसितम्	९
काठकम्	२५
काण्वाः	५
कापित्थम्	२७
कान्यकम्	२
काकंणः	२१
कामंः	३६
कामंस्ताच्छील्ये	३६
कार्मुकम्	५२
कांस्यम्	३०
कालपाः	२३
काशिका	६
काश्यपिनः	२२
कास्तीरकी	७
किमेत्तिङ् ०	७४
कियाम्	६९
किरातार्जुनीयम्	२१
कुत्र	७०
कृत्वाऽनुप्रयु०	१०१
कृतपूर्वी	६३
कृत्रिमम्	३३
कृस्तृभृस्तु०	११३
कृष्णी करोति	८६
क्लृप्सीष्ट	१२८
केशवः	६७
कौक्षेयकः	२
कौटिलिकः	३३
कौपिञ्जलः	२४
कौ[illegible]नम्	५८
कौरुजाङ्गलम्	१८
क्षंसीष्ट	११९
क्षीयात्	११७
क्षेत्रियः	६४
क्षोदिष्ठः	७५
क्षौद्रम्	२४
क्षौद्रकी	८१
क्रतुयज्ञेभ्यश्च	२०
क्राम्यति	११७
क्रीतवत् परिमाणात्	२९
क्व	७०

[ख]

	पृ. सं.
खायात्	१३६
खारीकम्	४५
खन्यात्	१३६

(ग)

	पृ. सं.
गणान्तरे पठि०	१३०
गतगतः	९०
गतगता	९०
गमिष्यति	१४४
गरिष्ठः	७६
गर्दभाण्डीयः	६२
गहीयः	९
गाम्भीर्यम्	१८

Sri Vidya Bharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

	पृ. सं.
गार्गम्	२५
गार्गी भवेति	८७
गासीष्ट	१४१
ग्रामीणः	२
गुणोऽर्तिसंयो०	१३९
गुडपुष्पिका	६३
गे०	१४१
ग्रैवेयम्	१८
ग्रैष्मम्	१७
ग्रैष्मकम्	१७
गोत्रोक्ति-सौत०	५
गोपायाञ्चकार	११७
(घ)	
घस्लृ अदने	१२५
घुक्षीष्ट	१५५
घ्रेयात्	१३८
(च)	
चक्रीवान्	६५
चक्लृपे	१२८
चक्लौ	१६७
चक्षिङ् इत्यत्र इका	१५६
चख्यौ	१५७
चतुः	८४
चतुर्थादनजादौ०	७८
चर्मण्वती	६५
चतुर्वेदाः	५५

	पृ. सं.
चत्वारिंशत्	४८
चाक्षुषम् रूपम्	१
चातुर्मासी	५१
चिक्किनम्	५१
चिक्कम्	६०
चिक्षयिथ	११७
चिक्षेथ	११७
चित्रा	१७
चिरन्तनम्	४१
चुच्योत	११६
चूडालः	६६
चूडावान्	६६
चौरी	३६
(छ)	
छन्दस्यः	२०
छात्रः	३६
छान्दोग्यम्	२५
छान्दसः	२०
(ज)	
जक्षति	१७०
जक्षतुः	१५२
जघनिथ	१५४
जघसिथ	१५३
जघास	१४२
जघृक्षे	१२४
जघ्नपुः	१५३

	पृ. सं.
जजागरु	१७०
जजातः	१८१
जक्षति	१८१
जनपदतदवध्योश्च	८
जम्बूः	३०
जम्बु	३०
जम्भते	११६
जहि	१५४
जहाहि	१७७
जहिहि	१७७
जहीहि	१७७
जह्यात्	१७
जह्वार	१३९
जाग्रोऽवि०	१७०
जातरूप्यः प०	२८
जातुषम्	२७
जाम्बवम्	३०
जिगाय	१२२
जिह्लयाञ्चकार	१७५
जिह्लाय	१७५
जिह्वामूलीयम्	१९
जुगोप	११७
जुगुप्सते	१४३
जुगोपिथ	११८
जुगुप्साञ्चक्रे	१४२
जुहाव	१७४

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

	पृ. सं.		पृ. सं.		पृ. सं.
जुहाव	१५०	तरिता	१४२	त्रिशल्कः	४४
जुहोति	१७४	तस्मान्नुड्द्विहलः	१०९	त्रिशत्	४७
जुहुधि	१७४	तस्य विकारः	२६	त्रेपिरे	११५
जुहवाञ्चकार	१७४	तस्मिन्नणि चयुस्मा०	१०	त्रेपे	११५
ज्योत्सना	६७	ताक्षशिलः	२२	त्वं स्वयंम्	५४
ज्योत्सनातमिस्रा०	६७	ता .कः	११	(द)	
(ञ)		तावकीनः	११	दक्षिणात्	७२
ञितश्वतत्प्र०	२८	तावतिकः	४४	दक्षिण्यः	४८
(ट)		तावत्कः	४४	दददे	१०७
टुभ्राज दीप्तौ०	१३५	तावान्	६०	ददरिद्रौ	१७१
(ण)		तितिपिषे	११४	दरिद्राञ्चकार	१७१
णट नृत्तौ	१३०	तित्सीष्ट	११५	दलद्वये टावमावः०	९१
णेर्निटि	१२०	तीरसुपान्ता०	४	दशैकादशिकी	३४
णोनःखोरदे०	१०९	तुरीयः	६२	दीक्षा	५
(त)		तुर्यः	६२	दाधिकम्	३२
तक्ष्णोति	१२५	तृतीयः	६२	दामन्यादि०	८१
ततमः	७९	तृप्रालुः	६९	दायात्	१३६
ततोभवन्यम्	७१	तेन तुल्यं क्रिया०	५३	दायास्ताम्	१६४
तत्प्रकृतवचने०	८४	तैत्तिरीयाः	२२	दार्तेयम्	१८
तत्रादौ दशलकाराः	९२	तैषम्	१३	दार्वक	८
तदर्थं विकृतेः प्र०	४१	त्रपिष्ठः	७६	दार्षदाः	१
तदवेतस्येत्यादि	५६	त्वत्काः	६३	दिग्ये	१४३
तदीयः	६	त्वदीयः	११	दिवाभूतारात्रिः	८७
तनादिकृञ्भ्य उः	१६६	त्रयम्	६०	दिव्यु	११३
तपस्वी	६	त्रितयम्	६०	दीध्ये	१७३
तमिस्रा	६८	त्रिशकः	४४	दुग्धः	१५४

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

	पृ. सं.
दुरयते	१२१
दूत्यम्	५५
देघे	१५६
देवत्रा वन्दे	८८
देवपथः	८०
देविलः	७७
देवदत्तीयः	६
दैवासुरः	६२
दैवासुरम्	२५
दैष्टिकः	३५
दोह्रीयसीधेनुः	७५
द्राघिष्ठः	७६
द्वन्द्वम्	९२
द्वन्द्वरहस्य०	९२
द्रव्यम्	९२
द्वयजर्शिति	२१
द्वारादीनां च	३१
द्विकंसम्	४५
द्विकुलिजिकी	४६
द्विपदिकाम्	८२
द्विपाद्यम्	४५
द्विमोदकिका	८२
द्वितीयकम्	६२
द्विमास्यः	५०
द्विवर्षः	५०
द्विवौर्पिकम्	१३

	पृ. सं.
द्रुवयम्	२९
द्वैतीयीकः	७४
द्वैशाणम्	४५
(ध)	
धत्तः	१७७
धानकाः	७७
धानुष्कः	३५
धानुष्क.	३२
धान्यार्थी	७०
धिनबाव	१२४
धिनु	१२५
धिनोति	३३
धुर्यः	३७
धूपायाञ्चका०	१२८
धेनुष्वा	३७
धेयात्	१३८
धेहि	१७८
धौरेयः	३७
(न)	
नकम्यमिचमाम्०	१३४
न ते नासिकायाः	५९
न द्वयचः प्रात्यम— रतेषु	६
न नञ्पूर्वात्	५३
नभ्यम	३९

	पृ. सं.
नमो वाकं प्रशास्महे	१५८
नवतिः	४८
न विश्वसेदविश्व०	१६६
नस्यम्	४०
नागरकः चौरः शिल्पीवा	९
नाट्यम्	२५
नातः परस्य	४४
नान्येमितो०	१२९
निरयते	१२१
निविडम्	५९
निविरीसम	५९
निशामयतदु०	१३२
निरियात्	१६२
निषेधति	१०६
निष्टयः	४
निष्यात्	१६८
नूत्नम्	८४
नेनेक्ति	१७६
नेनेग्धि	१७६
नेनेजानि	१७९
नैयग्रोधम्	३०
नैशम्	१३
नौवयोधर्मविष०	३७
न्यषेधत्	१०८
न्यषेधीत्	१०९

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

	पृ. सं.		पृसं.		पृ. सं.
(प)		पाणिनीयम्	५	पूर्वपाटलिपुत्रकः	१
पङ्क्तिः	४७	पाथ्यः	४८	पूर्ववार्षिकः	२०
पंक्तिविंशति०	४७	पाद्यम्	३८	पूर्ववार्षिकः	१५
पचतितराम्	७४	पाद्यम्	८४	पूर्वी	६३
पञ्चकः	४७	पान्थः	४९	पूर्वेषुकामशमः	१६
पञ्चाशत्	४८	पायसिकः	२२	पौरोहित्यम्	५५
पञ्चमः	६१	पारदारिकः	३१	पौर्वपञ्चालः	१५
पञ्चम्युष्ट्रः	६९	पारायणिकः	४९	पौर्वमद्रः	४
पटपटा करोति	८८	पारावारीणः	५७	पौर्ववार्षिकः	१५
पणायति	१२८	पाराशर्यशिला०	२३	पौर्वशालः	४
पणायाञ्चकार	११९	पारिखेयी भूमिः	४२	प्रज्वलयति	१३०
पथ्यम्	३८	पारिपन्थिकः	३४	प्रणिदति	११६
पद्या	३७	पारिपार्श्विकः	३३	प्रणिमयते इत्य०	१४२
परमनैष्ठिकः	४३	पारीणः	२	प्रणिभवति	१०१
परम्परीणः	५७	पार्थवम्	५४	प्रतिकः	४४
परस्परम्	९०	पालाशम्	२७	प्रत्ययः	१२१
परस्मैपदिनः	१७३	पाराशरिणः	२४	प्रत्यये किं वक्र०	१०३
परावराधमोत्त०	१२	पिपर्ति	१७५	प्रथिमा	५४
पर्यवसितं नित्य०	१३१	पिपुरति	१७६	प्रवाहिकातः	८६
परिष्वस्वजे	११४	पिपूर्तः	१७१	प्रह्रासे च मन्यो०	६४
परिष्कण्ठ. इ०	१४८	पिप्ये	१२२	प्रविघाटयिता	१२९
परिसोढा	१३५	पिप्याते	१२२	प्रहण्मि	१५३
पस्पर्धे	१०६	पुगन्तलघु०	९५	प्रकारीयः देशः	४२
पाकयज्ञिकः	२०	पुरः	७३	प्रकारीयाः	४२
पाञ्चजन्यम्	१८	पुरस्तात्	७३	प्राणिति	२७०
पाटलानि पु०	[illegible]	[illegible]	[illegible]	प्रातिकूलिकः	३३

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

	पृ. सं.		पृ. सं.		पृ. सं.
प्रत्ययोत्तरपद०	११	बिभाय	१७४	भियात्	१७८
प्रासूतिकः	३१	बिभराञ्चक्रे	१७८	भियात्	१३७
प्रावृषिकः	१३	बिभयाञ्चकार	१७४	भेमतुः	१३५
प्रावृषेण्यः	१३	बिभिताद्	१७५	(म)	
प्राशित्रम्	५२	बिभीतः	१७४	मणिकः	८४
प्रासादीयम्	४२	बिभीताद्	१७५	मत्काः	६३
प्राह्णेतनम्	१४	बिभेतु	१७५	मध्यमः	१२
प्रियप्रियेण	९१	ब्राह्मणकीयः	१०	मदीयः	११
प्रियस्थिरस्फिरो०	७५	ब्रह्मण्यम्	५४	मदी हर्षग्ले०	१३१
प्रेष्ठः इति	७९	ब्रह्मण्यम्	४०	मद्राकरोति	८८
प्रौष्ठपादोमाणवकः	१७	ब्रह्मीभवति	८६	मरुतः	६९
(फ)		ब्रीहयः	३०	मात्रीकरोति	८७
फण गतौ	१३३	(भ)		मायावी	६८
फल्गुनी	२०	भद्राकरोति	८१	मायिकः	६८
(ब)		भवतात्	९६	मारणतोषण०	१३१
बभ्रुः	१८१	भवदीपः	६	मार्दवम्	५४
बभूव	९४	भवानि	९७	माद्रनगरः	१८
बभूविथ	९५	भविता	५६	मामकः	२१
बंहिष्ठ	७६	भवेत्	९८	मामकीनः	११
बहुकः	४४	भवेयुः	९९	मारीचिकम्	३२
बहुधाः	८४	भावत्कः	६	मानिकः	३४
बहुनिष्कम्	४५	भूमनिन्दा	६४	मार्तिकः	२६
बहुपटुः	७७	भूयात्	७७	मायूरः	२६
बहुशः	८५	भूयात्	९९	मालाप्रस्थकः	८
बाहूवर्तकः	६	भृजामित्	१७६	माशब्दिकः	३१
				मासिकम्	१७

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

	पृ. सं.
माह्वानाह्निक:	५१
माह्विषिक:	९
माह्किप्रस्थ:	५
मिमिदे	१२७
मीमांसते	१४४
मुखतीयम्	१०
मुखर:	६७
मुख्य:	८०
मुद्गा:	३०
मूल्यम्	३८
मृड्डि	१६८
मृत्स्ना	८५
मैनिक:	३४
मोदकिकम्	८४
म्रदिमा	५४
[य]	
यज्ञियो देश:	४९
यतम:	७९
यथायथं ज्ञाता	६१
यवापूप्यम्	४३
यशस्य:	४६
याज्ञवल्क्यानि ब्रा०	२३
यात्रम्	३५
याथाकथाचम्	५२
या सुटोऽङ्क्तिकरणस्य	९८
युयात्	१५८

	पृ. सं.
युष्कदस्मदारन्य०	१०.
युष्मदीय:	१०
युष्मद्युपपदेसमाना०	९३
यूयात्	१५८
यौगिक:	५२
यौजनशतिक:	४९
यौवनम्	५५
[रा]	
राङ्क्वायण:	३
राजकीयम्	१०
राजसात्सम्पद्यते	८७
रजो विश्रामयन्०	१३१
राजतम्	२८
राजन्वती	६५
राज्यम्	५५
राष्ट्रिय:	२
रासभक:	७८
रुदिहि	१६८
रुद्यात्	१६९
रेजे	१२४
रोहणी	१७
[ल]	
ल: कर्मणि चाभावे०	९३
लघीयान्	७४
लालाटिक:	३५
लावणिक:	३५
लुक् तद्धितलुकि	१७

	पृ. सं.
लोहितिक:	८५
लौकिक:	३६
लोहितध्वज्य:	८०
लोहिनिका	८५
[व]	
वर्टकिनी	६३
वध्यात्	१५४
वत्स्यति	१४७
वर्तिक:	२९
ववु:	१४८
वनु चनोच्यते	१३३
वरिष्ठ:	७६
वर्षिष्ठ:	७६
नत्स्यंति	१२७
ववृके	११०
ववनतु:	११६
ववौ	१४७
वाऽत्यनुवृत्ते०	६३
वाकम्	३८
वाचाट:	४९
वाचाल:	६९
वाचिकम्	८५
वाचिक:	७८
वाटरम्	२८
वातूल:	६६
वारपथिक:	५०
वारत्रम्	४२

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

	पृ. सं.
वारवन्तीयम्	६२
वाराणसेयम्	२
वार्त्तः	५६
वार्धुषिकः	३३
वार्षिकं वासः	१३
वासनम्	४५
वासिष्ठिकः	२०
वासुदेवः	८०
विज्ञापना भ०	१३१
विदाङ्कुरु	१६७
विदाङ्कुर्वन्तु	१६७
विदाङ्करोतु	१६६
विदांकुर्वन्त्वित्य०	१६५
विदाञ्चकार	१६५
विदुष्मान्	६५
विद्युत्वान्	६५
विद्युते	१२६
विधिवत्	५३
विना	५८
विप्रश्नाकरोति	८८
विभाषा हविर०	३९
विशपिथ	११४
विवाय	११२
विव्यतुः	११२
विव्यथे	१३०
विव्याय	१४९

	पृ. सं.
विंशतिः	४७
विंशम	६१
विशीर्णतायां०	१३५
विश्वजनीनम्	४०
विषपुष्पकः	६३
विषयग्रहणं किं०	८
विष्णुः	६६
विस्तम्भते	६६५
वीजाकरोति	८८
वीयात्	११४
वीवधिकः	३२
वीवधिकी	३३
वृक्षकः	७९
वृक्षवृक्षं सिञ्चति	८९
वृद्धात्प्राचाम्	८
वृन्दिष्ठः	७६
वृष्टुम्	४०
वैमाजित्रेम्	३५
वैमुक्तः	६२
वैरङ्गिकः	४८
वैल्वम्	२७
वैशस्त्रम्	३५
व्याकरणसमाप०	५२
व्याडिः	३१

[श]

	पृ. सं.
शङ्कव्यम्	४०

	पृ. सं.
शतम्	४८
शत्यः	२९
शतिकः	४६
शतिकम्	४४
शत्यः	४६
शमो दर्शने	१३२
शम्वाकरोति	८८
शरण्यः	३८
शलालुकः	३५
शयात्	१५१
शर्कराः	६६
शक्तीकः	३५
शातमानम्	४५
शाधि	१७२
शाब्दिकः	३४
शामीलम्	२८
शामीवत्यः	७२
शारदोवारागःआतपोवा	१२
शारदिकः	१२
शारदिकम्	१२
शारीरकीयः	२१
शालावत्यः	८२
शालीयः	६
शालेपम्	५६
शांशपः	१९
शासिवसिघसो०	१४९

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

	पृ. सं.
शिश्वाय	१५०
शीर्यण्य:	४०
शुक्लिमा	५४
शुशाव	१५०
शूद्रक:	७२
शून्यम्	३९
शेषे	१
शेषेलक्षणंचा०	१
शैवपुरम्	५
शौकम्	२८
शौण्डिक:	२१
शौवस्तिकम्	४
शौवस्त्तिकम्	१३
शौवापदम्	३२
श्रृणु	१४१
श्रृणुतात्	१४१
श्रृणुम:	१४१
श्रृणम:	१४१
श्रृण्युः	१४१
श्रृण्वन्ति	१४१
श्रपयति	१३०
श्रविष्ठ:	१६
श्रविष्ठा	१६
श्राद्धम्	५२
श्राद्ध:	६६
श्रायसम्	१९

	पृ. सं.
श्रावण:	१
श्रेयान्	७५
श्रोत्रिय:	६३
श्रौत्रम्	५६
श्वगणिक:	३२
श्वयतेलुङि ६०	१५१
श्वस्त्यम्	४
श्वस्तनम्	४
श्वापदम्	३२
[ष]	
षडिक:	७९
षषष्ठाजादि०	६९
षष्ठ:	६१
षष्टि:	४८
षष्टिक:	५१
षाण्मासिक:	५०
षात्वणत्विक०	१९
षोपदेशकारिका	१२७
[स]	
संकटम्	५६
सङ्ख्याया: गुण:	६१
संख्याया: सव०	६०
सकति	१४५
संज्ञाया: कार्य०	१२०
सत्या	७८
सद्य: परुत्	७१
सन्ति	१७२

	पृ. सं.
सत्वल्लघुनि०	१२०
सप्तति:	४८
सप्तदश	४७
सभ्य:	३९
समांसमीना	५७
समीन:	५०
सर्वजनीन:	४१
सर्वाङ्गीण:	५७
सर्वचर्मीण:	५७
सर्वपथीन:	५१
ससीतयोरा०	१३२
सतीतयोराघवयोर०	१६४
सस्वरिम	१४०
सस्वरिव	१४०
सस्यन्दे	१२७
सावतुक:	३८
साधीयान्	७५
सान्तापिक:	५२
सामान्य:	३८
सामाजिक:	३४
सामिकृतम्	८३
सामिधेनी	२४
सायम्प्रातिक:	१२
सायात्	१२३
सार्वचर्मीण:	५७
सार्वभौम:	४६
सात्वक:	९

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

	पृ. सं.
सांवहित्रम्	२४
सांस्थानिकः	३६
साहस्रम्	४५
साहायकम्	५६
साहाय्यम्	५६
सिकताः	३६
सिकतिलः	६६
सिध्मलः	६६
सिषेध	१०८
सिषेधिथ	१०८
सीत्यम्	३८
सुखाकरोति	८८
सुपाञ्चालकः	१५
सुवे	१५८
सुषुपतुः	१६६
सुषुपतः	१६६
सुसुष्वाप	१६९
सैरिकम्	२४
सौखशायनिकः	३१
सौदर्शनिकी	७
सौदामनी	२४
सौपम्	१९
सौवर्णः	१८
स्खदिः अवपविः	१३२
स्तः	१५७
स्तान्	१६७
स्तेयम्	५५
स्थेयात्	१३९
स्थालीबिल्याः स्था०	४९
स्थाविरम्	५५
स्थेष्ठः इति	७६
स्फायन्निति	१५६
स्फेष्ठः	७६
स्यन्त्स्यति	१२७
स्रजिष्ठः	७८
स्रौघ्नः	३२
स्रौघ्नः	१७
स्वागतिकः	३१

[ह]

	पृ. सं.
हलादिःशेषः	६४
हस्ती	६९
हुदानादनयोः	१७३
हृदयालुः	६९
हृद्यः	३८
हृद्गोलयाः	२२
हैमनम्	१४
हैमन्तम्	१४
हैमवती	२१
हैयङ्गवीनम्	५८
ह्रीञ् धातोर्लुङि	१५०

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

मूल्य 15–00

भारतीय विद्या प्रकाशन

वाराणसी • दिल्ली

Sri Vidyabharathi Book Centre, Sringeri